ग मोऽहृष्टव्यः जविष्टं वेगव न्तं स्वस्ति श्रीन्द्रं हिं सा
को पिता इति । स पत्नै ई यीं धना दिभिः को पि
…र्धं न हे लेन क चयग्र हणा दि भि रिति ई ध्रं न
…र्य घा गर दा न ने न्न गृह्य दाहा दी
…न्मि लिता न्तृ पा न्नवा दि ते भी

१२२

एकादशस्कंधपत्रै ३० तीस

…धक
…तना
…नीति
…पादस्व॥ २

श्री ए
भा टी
१

गणेशाय नमः ॥ ॐ नमो भगवते वासुदेवाय ॥ ॐ श्रीगोविंद गुरुचरणकमलेभ्यो नमः ॥
ॐ विजयते परानंद हंसपादरजोध्वजः ॥ या धृतां मूर्ध्नि जायंते महेंद्रादि महासजनः ॥ ॐ उक्तौ कांत्रिंश
त्तिरेकादशे ततः ॥ जायंते येति हासेद्यः समासव्याससरूपतः ॥ नारदो वसुदेवाय समासेनान्यवर्णयत्
नुद्धवायाथ विस्तरेण पपत्रिभिः ॥ तत्र प्रथमेध्याये यदुवंशस्य संक्षयः ॥ उपक्षिप्तो विरागाय मैशलव
तः ॥ प्रश्नोत्तरैः परानंद हंस क्रीडानुवर्णिता ॥ तत्रिंशत्या परानंद पदारोहोनुवर्ण्यते ॥ ५ ॥ एवं तावद्दशम
भारावतारणाय निजविभूतिविभूषित यदुवंशस्य यदुवंशावतारितसकलसुरांशस्य भगवतः श्रीकृष्ण
वित प्रवृत्ति विडंबनेन तत्श्रवण मननादि पराणां परेषां मानंदकानां चाधिकारिणस्तदंशानां मोक्ष
देशेन तत्तदधिकारिपदप्रापकं पूर्वकं च ब्रह्माद्यनुग्रहाय निःश्रेयस पदारोहो निरूप्यते ॥ तत्र कुरुदेवत्रय
यामविरक्तस्य वसुदेवस्य कर्मणा कर्म निर्हारो यथा स्यात्तदुच्यतामित्येवं कर्मयोगं पृष्टवतो नारदादिभिः क
र्मयोगो निरूपितः कर्मणा कर्म निर्हार एष साधु निरूपितः ॥ यच्छ्रद्धया प्रविततेन स्वलोकेने ज्यत इत्यादिना
नेन च विष्णुहंसतनुस्य श्रीकृष्णस्य रामो परमेश्वरत्वेन ज्ञातवतः षट्गर्भीनयनाध्याये श्रीकृष्णेनात्मनस्तत्व प
दिष्टं ॥ वचो वः समवेतार्थं तातैतदुपमन्महे ॥ यन्नः प्र[illegible]स्महृष्यतेत्वग्राम उदाहृत इत्यादिना ॥ नचेद्विषय
भोगातिशयेन पुनस्तिरोहितमासीत् ॥ तदेवेदानीमा[illegible]मुखेन प्रथमे पंचाध्यायीं निरूप्यते ॥ तत्र प्रथमेऽ
ध्याये वैराग्योत्पादनाय यदुकुलस्य ब्रह्मशापो[illegible]त्रन विषयसुखानामपि नित्यता प्रतिपाद्यते
ततश्चतुर्भिर्निमिजायंतेयसंवा[illegible]निरूपणं ततः षष्ठे भगवदुद्धवसंवाद प्रस्ता
वः ॥ ततस्त्रयोविंशत्या उद्धव[illegible]नतोद्भ्यां मैशलक्रीडेत्येवमेवत्रिंशताध्याये
रेकादशस्कंधस्य [illegible] यथामति व्याख्यानमा
[illegible]र्थं पूर्वसंपार्थ्यं [illegible] कृत्वेति ॥ ॥ ॥
अनुवदति ॥

अवतारयदित्यत्रागमोऽद्रष्टव्यः जविष्ठं वेगवत्तरं अतिशीघ्रं हि साध्यं वसायिनमित्यर्थः कालिं कलहं प्रसिद्धं तन्
॥ एतद्धि हरणोति ये कोपिता इति । सपत्नैर्ईर्ष्या धनादिभिः कोपिताः कोपकारिताः सुबहु यथा भवति तथा बहुवास
नित्यर्थः । तद्देवाह ऽद्युतहेलनकचग्रहणादिभिरिति ऽद्युतं कपटद्यूतं हेलनमवज्ञा कचग्रहणं दुःशासनेन
द्रौपद्याः केशाकर्षणं एतान्यादिर्येषां गरदानजतुगृहदाहादीनां तैः कृत्वा ये कोपिताः तान् ऽद्युतान्निमित्तं कृत्वा
इतरेतरतऽभयोः पक्षयोः समेतान्मिलितान्नृपान्कृत्वा दितेर्भारं निरहरत् हृतवान् यद्वा ये कोपिता ये अकोपिताः तानि

श्रीबादरायणिरुवाच ॐ कृत्वा दैत्यवधं कृष्णः सरामो यदुभिर्वृतः ॥ भुवोऽवतारयद्भारं जवि
ष्ठं जनयन्कलिं ॥ १ ॥ ये कोपिताः सुबहु पाण्डुसुताः सपत्नैर्दुर्द्यूतहेलनकचग्रहणादिभि
स्तान् ॥ कृत्वा निमित्तमितरेतरतः समेतान् हत्वा नृपान्निरहरत्क्षितिभारमीशः ॥ २ ॥ रा म

तरेतरतः परस्परं निमित्तं कृत्वेत्यन्वयः । ये तावत्पुरा दैत्याः पूतनादयः तान्स्वयमेव हतवान् ये तु दैत्यांशक्ष
त्रेनास्थिताः तान्परस्परं निमित्तं विधाय हतान् भुवो भारमपाहृतवानित्यर्थः । अधुना तदेव भूभारभूतराजहननो
समागतस्य पालदैत्यनिवर्हणाय स्वमायया प्रपंचविधानेनान्योन्यतः कलहं कुर्वाणाः द्वापरे गच्छतः तेन जानंतीति
समहिमानमगाधायैर्निरूपयति यदूनां गीतासु ममायया ऽरत्ययेति तदेतदसौ परमेश्वरः क्षितेर्भारमपाहरत् । २

श्री
भा० ए
टी०
२

अपि च भूभारेत्यादि अन्यास्य भवो भारभूता राजपृतना राज्ञां पृतनाः सेनाः ताः संस्लेषां हननाश्चेनिवा स्वबाहुभि
गुप्तैः परिरक्षितैर्यदुभिर्विवाहादिछलेन निरस्य हत्वा बाहुभिरिति बहुवचनं च नवस्तुतस्य च गर्भजाभिप्रायेण न
न्वेवं हि लङ्घ्रिकीर्तिनिलाम्बाक थं तस्मेदशलायय यादवानन्तु उपेतितत्राह अप्रमेयः प्रमातुमशक्यः चिंतामाह म
ने४ न्ये इति नान्तेति वितर्के अवनेर्भूमेर्भारो यद्यपि लोकप्रतीत्यागतः तथाप्यहमगतमेव मन्ये यद्यस्मादविषह्यः सोढुम ६
शक्यं यादवकुलमिति अनेन स्ववंशपालनस्य यदुहननं न मनुचितमिति चिंतितं ॥२॥ न हीदं मम मन्येऽन्यतो नाशनत्राह नैवेति

भूभारराजपृतना यदुभिर्निरस्य गुप्तैः स्वबाहुभिरचिंतयदप्रमेयः ॥ म
न्येवनेर्ननु गतोप्यगतं हि भारं यद्यादवं कुलमहो अविषह्यमास्ते ॥२॥
नैवान्यतः परिभवोस्य भवेत्कथंचिन्मत्संश्रयस्य विभवोन्नहनस्य नित्यं ॥
अंतः कलिं यदुकुलस्य विधाय वेणुस्तंबस्य वह्निमिव शांतिमुपैमि धाम ॥४

पि अन्यतः देवादिभ्यो [illegible] यादवकुलस्य परिभवः तिरस्कारो न भवेत् कुतः मत्संश्रयस्य मत्संश्रयत इति मत्संश्रयं कुलं
तस्य किंच नित्यं विभवोन्नहनस्य विभवैर्गजतुरंगादिभिरुच्छृंखलस्य यद्यप्येतन्नहीदं किमिति संहर्तव्यं तत्राह विभ राम
वोन्नहनस्येति तस्मादेवं करिष्यामीत्याह अंतः कलिमिति शांतिमुपधाम मनुपैमि वर्तमानसामीप्ये वर्तमानवद्वा ७
पैष्यामि तदनंतरं धाम च वैकुंठाख्यमुपैष्यामीत्यर्थः मनुमिति विधाय मायाप्रपंचं विधाय विस्तार्य वेणुस्तंभस्य वे
णुकाष्ठस्य वह्निमिवेति तत्रैवं चकारेत्यर्थः तदेव प्रश्नमग्रे प्रकटीकरोति अत्र शांतिमितिवा पाठः ॥४॥ कुल

एवं व्यवसित इत्यादिना कथयति व्यवसितः कृतनिश्चयः संजह्रे उपसंहृतवान् तदेवमवतारप्रयोजनं सर्वं संपाद्य
स्वलोकं जगामेत्याह श्लोकद्वयेन स्वमूर्त्येति लोकानां लावण्यं निर्मुक्तिस्त्यागो यया यस्मिन्नेव त्यलोके बहुलावण्येना
स्तीत्यर्थः यद्वा लोके या लावण्यस्य विनिर्मुक्तिर्दानं यतः पत्कर्षप्रकर्षेण लोकालावण्यवती भवतीत्यर्थः तया मूर्त्या नृ
णां लोचनमाच्छिद्याकृष्य ततोन्यस्माद्विलोकनेन लोचनस्याप्रवृत्तेः तथा स्वगीर्भिः ताः गिरः स्मरतां चित्तं वाच्छिद्य तथाप

एवं व्यवसितो राजन्सत्यसंकल्प ईश्वरः ॥ शापव्याजेन विप्राणां संजह्रे स्वकुलं विभुः ॥४
स्वमूर्त्या लोकलावण्यनिर्मुक्त्या लोचनं नृणां ॥ गीर्भिस्ताः स्मरतां चित्तं पदैस्तानीक्षतां क्रि
याः ॥६॥ आछिद्य कीर्तिं सुश्लोकां वितत्य ह्यंजसा नु कौ ॥ तमोनया तरिष्यंतीत्यगात्स्वंपदमी
श्वरः ॥७॥ भक्तौ।

६
दैः तत्र तत्रांकितैः तानि पदानीक्षतां मीक्षमाणानां अन्यतो गमनादिकाः क्रियाः आच्छायत तदानीं तेनां सर्वेषां वल्ल
रादिप्रवृत्ती [illegible]क निष्ठाः कृतेत्यर्थः किं च इत उपरि जनिष्यमाणानां संसारमरणायकी महाशोभनाः श्लोका यस्यां
तां स्वकीर्तिं वितत्य विस्तार्य तया कीर्त्या अंजसा सुखेनैव तत्वनिश्चितं तरिष्यंतीत्यीश्वरः स्वंपदं स्थानमगादिति ॥७

श्री
भा० ए०
टी०
३

ब्रह्मण्यानां ब्रह्मदानेभ्यो वा ब्राह्मणसेवकेभ्यो वा विप्राः क्रुध्यन्ति हि शापयन्तु न तत्र ये सात्वताः किंच कोपे जाते पि कृष्णचेतसां
३ कथमभूत्तत्रापि भेदित्यर्थः अतः स्पष्टं शापनिमित्तस्याभावान्निमित्तान्तरं पृच्छति यन्निमित्त इति एकात्मना
मेकचित्तानां कथं भेदः कलहः ईश्वरेच्छैवात्र निमित्तमिति सौन्दर्यादि विषयपुरं लंघितमंगलं कर्माचरन्तोनित्याम्
~~...~~ परिहरति बिभ्रदिति सकलानामंगानां सुन्दरः सन्निवेशो विन्यासविशेषो यस्मिं

श्रीराजोवाच ॥ ब्रह्मण्यानां वदन्यानां नित्यं वृद्धोपसेविनां ॥ विप्रशापः कथमभूद्वृष्णीनां कृ
ष्णचेतसां ॥ ८ ॥ यन्निमित्तः स वै शापो यादृशो द्विजसत्तम ॥ कथमेकात्मनां भेद एतत्सर्वं
वदस्व मे ॥ ९ ॥ श्रीबादरायणिरुवाच ॥ बिभ्रद्वपुः सकलसुंदरसन्निवेशं कर्माचरन्भुवि सुमंग
लमाप्तकामः ॥ आस्थाय धाम रममाण उदारकीर्तिः संहर्तुमैच्छत कुलं स्थितकृत्यशेषः ॥ १० ॥

स्तद्वपुर्बिभ्रत्तर्हि किमिति सौंदर्यादिविषयपरः नेत्याह सुमंगलं कर्माचरन् तर्हि किं कयापि कामनया नाप्तकामः तर्हि
किमिति कर्मेत्यत आह धाम द्वारकामास्थाय रममाणः गृहे रममाणो न तु दृष्टयापि केवलं मां प्राप्त्यर्थमित्यर्थः
ननु किमात्मसुखपरत्वात्कर्म निवृत्तं नाह उदारकीर्तिः बहुफलप्रदा कीर्तिर्यस्य सः कीर्तिविस्तारार्थमित्यर्थः
एवं परमैश्वर्येण वर्तमान एव कुलं संहर्तुमैच्छत् ननु कस्य हेतोः स्थितः कृत्यशेषो भूभारहरणलक्षणो यस्य सः ॥ १० ॥

दा० म०
३

ईश्वरेच्छयोत्थितब्रह्मशापं निमित्तं कृत्वावतीर्णमाह कर्माणीति कर्मार्थमाह तानि कर्माणि कृत्वा निःस्पृहा मुनयः तपोध
नाः पिंडारकं समगमन् नित्यं तयोः निःस्पृहाः प्रस्थापिताः पूर्वोक्ता मदारकीर्तिवा विहएवत्कर्माणि विशिनष्टि पुण्यानि बृह
नीत्यादिभिः त्रिभिः पदैः कानिचिद् अश्वमेधादिकर्माणि पुण्यमेव जनयंति पुत्रोपलालनादीनि तत्कालसुखमेव जनयंति
प्रायश्चित्तादीनि तु पापमेव हरंति एतानि तु सर्वस्वरूपाणीत्याह पुण्यानि बृहन्ति कीर्तनादिना पुण्यानि निर्वहंति पापं

नामतीर्थं २

कर्माणि पुण्यानि बृहन्ति सुमंगलानि गायज्जगत्कलिमलापहराणि कृत्वा ॥ कालात्मनानि
वसता यदुदेवगेहे पिंडारकं समगमन्मुनयो निःस्पृहाः ॥११॥ विश्वामित्रोऽसितः कण्वो दु
र्वासा भृगुरंगिराः ॥ कश्यपो वामदेवोऽत्रिर्वसिष्ठो नारदादयः ॥१२॥ क्रीडंतस्तानुपव्रज्य कुमारा
यदुनंदनाः ॥ उपसंगृह्य पप्रच्छुरविनीता विनीतवत् ॥१३॥ ते वेषयित्वा स्त्रीवेषैः सांबं जांबव
तीसुतं ॥ कृत्वोदरं वस्त्रमहद्दृस्त्रीधैर्यदुनंदनाः ॥१४॥ एषा पृच्छति वो विप्रा अंतर्वत्न्यसितेक्षणा
प्रष्टुं विलज्जती साक्षात्प्रब्रूतामोघदर्शनाः ॥ प्रसोष्यंती पुत्रकामा किंस्वित्संजनयिष्यति ॥१५

तीति तथा सुमंगलान्यतिसुखात्मकानि गायतो जगतः कलिमलापहराणि कृत्वा मुनिप्रस्थापने हेतुः कालात्म
ना संहारकरूपेण वसुदेवगृहे निवसता स्वकुलं संजिहीर्षतेत्यर्थः पिंडारकं तन्नामानं तीर्थविशेषं ॥११॥ उपसंगृह्य
पं० २ पादग्रहणं कृत्वा ॥१३॥ प्रश्नप्रकारमाह द्वयेन ते वेषयित्वेति हे अमोघदर्शना विप्रा एषा अंतर्वत्नी गर्भिणी वो युष्मान्स्त्री
त्वात्प्रष्टुं विलज्जमाना अस्मन्मुखेन पृच्छति प्रसोष्यंती आसन्नप्रसवा किंस्वित्संजनयिष्यति कन्यां वा पुत्रं वा तद्ब्रूत १५

प्रलब्धा वंचिताः ॥१५॥ तस्मिन्नुदरे अयस्मयं लोहमयं ॥१६॥ मंदभाग्यैरस्माभिः किमिदं कृतं नोस्मान् किं वदिष्यंतीति वि
ह्वलिताः संतो मुसलमादाय गेहान्ययुः ॥१७॥ राज्ञे उग्रसेनाय न तु श्रीशस्याप ॥१८॥ आहुक उग्रसेनः सोपि वसुदेवस्य हि
नः श्रीकृष्णमहद्देवशास्त्रप्रवर्तिप्रवान् ॥२०॥ अयस्मयमुसलस्य चूर्णीक्रियमाणस्यावशेषितं लोहं च प्रास्यन् तरलैः तरंगैः

एवं प्रलब्धा मुनयस्तानूचुः कुपिता नृप । जनयिष्यति वो मंदा मुसलं कुलनाशनं ॥१५॥ तच्छ्रुत्वा ते
तिसंत्रस्ता विमुच्य सहसोदरं । साम्बस्य ददृशुस्तस्मिन्मुसलं खल्वयस्मयं ॥१६॥ किं कृतं मंद
भाग्यैर्नः किं वदिष्यंति नो जनाः । इति विह्वलिता गेहानादाय मुसलं ययुः ॥१७॥ तच्चोपनीय सदसि
परिम्लानमुखश्रियः । राज्ञ आवेदयां चक्रुः सर्वयादवसन्निधौ ॥१८॥ श्रुत्वामोघं विप्रशापं दृष्ट्वा
च मुसलं नृप । विस्मिता भयसंत्रस्ता बभूवुर्द्वारिकौकसः ॥१९॥ तच्चूर्णयित्वा मुसलं यदुराजः स
आहुकः । समुद्रसलिले प्रास्यल्लोहं चास्यावशेषितं ॥२०॥ किंचिन्मत्स्योग्रसील्लोहं चूर्णानि तर
लैस्ततः । उह्यमानानि वेलायां लग्नान्यासन्किलैरकाः ॥२१॥ मत्स्यो गृहीतो मत्स्यघ्नैर्जालेनान्यैः स
हार्णवे । तस्योदरगतं लोहं स शल्ये लुब्धकोकरोत् ॥२२॥ भगवान् ज्ञातसर्वार्थ ईश्वरोपि तदन्यथा । क
र्तुं नैच्छद्विप्रशापं कालरूप्यन्वमोदत ॥२३॥ इति श्रीभागवते एकादशस्कंधे प्रथमोध्यायः ॥१॥

२१॥ एरकाः प्रसिद्धतृणविशेषाः ॥ अन्यैर्मत्स्यैः सह मत्स्यघ्नैः शल्ये शराग्रे ॥२२॥ ज्ञाताः सर्वेर्था येन सः ईश्वरोपि समर्थोपि स
न्नन्यथा कर्तुं नैच्छत् किंचान्वमोदत यतः कालरूपी ॥२४॥ इति श्रीभावार्थदीपिकायामेकादशे प्रथमः

कथं २

द्वितीये निमिजायन्तसंवादेनाह नारदः ॥ धर्मान्भागवतान्सम्यग्वसुदेवाय पृच्छते ॥ अभीक्ष्णं वसत्यपि तोऽपि पुनः पुनरवात्सीदित्यर्थः ॥ ननु नाम [illegible] पात्रैकत्रवासः संभवतीत्याशंक्याह गोविंदभुजगुप्तायामिति ॥ ननु तस्याः शापादेः अभाव इत्यर्थः कृष्णोपासने लालसा औत्सुक्यं यस्य सः यद्वा जनेभ्यः शापानामपि ईदृशमौत्सुक्यं कुतस्त्यं को नु नाम न भजेदित्याह कोन्विति इंद्रियवानिति इंद्रियवत्त्वमात्रमेव यत्राधिकारिविशेषणमित्यर्थः सर्वतः सर्वत्रापि लोके मृत्युर्यस्य सः ॥२॥ यथा पित्रोर्यात्रा आगमनमपत्यानां स्वस्तये मंगलाय यथा चोत्तमश्लोकस्य व

श्रीशुक उवाच ॥ गोविंदभुजगुप्तायां द्वारवत्यां कुरूद्वह ॥ अवात्सीन्नारदोऽभीक्ष्णं कृष्णोपासनलालसः ॥१॥ को नु राजन्निंद्रियवान्मुकुंदचरणांबुजं ॥ न भजेत्सर्वतोमृत्युरुपास्यममरोत्तमैः ॥२॥ तमेकदा तु देवर्षिं वसुदेवो गृहागतं ॥ अर्चितं सुखमासीनमभिवाद्येदमब्रवीत् ॥३॥ श्रीवसुदेव उवाच ॥ भगवन्भवतो यात्रा स्वस्तये सर्वदेहिनां ॥ कृपणानां यथा पित्रोरुत्तमश्लोकवर्त्मनां ॥४॥ भूतानां देवचरितं दुःखाय च सुखाय च ॥ सुखायैव हि साधूनां त्वादृशामच्युतात्मनां ॥५॥ भजंति ये यथा देवान्देवा अपि तथैव तान् ॥ छायेव कर्मसचिवाः साधवो दीनवत्सलाः ॥६॥

यात्रा ५

र्त्मभूतानां महतां यात्रा कृपणानां स्वस्तये तथा भगवद्रूपस्य भवतो यात्रा सर्वदेहिनां स्वस्त्ययनमिति ॥४॥ देवैरपि महतां मुपमानमनुचितमित्याह देवानां चरितं अतिहृष्टादिना भूतानां दुःखायापि भवति नात्वादृशां त्वया सदृशानामस्य न्याशान्त्या येषां तेषां किंच सुखे च उत्तवतोऽपि देवा भजनानुसारेण उत्तर्वर्तिनः तथा साधवः इत्याह भजंतीति छायेव यथा पुरुषो यावत्करोति तावद् देवनस्य छायापि तथा कर्मसचिवाः कर्मसहायाः ॥६॥ श्रीवासुदेवाय नमः ॥

श्री॰
भा॰ ए॰
टी॰
४

तदेवं यद्यपि भवतस्समागमनमात्रेणैव वयं कृतार्थाः तथापि पृच्छामः तदेव नितरां वयं धर्मैः प्रसन्नो भगवान्नतानित्यः
र्थः॥७॥ननु त्वयापि भगवत्प्रसादपात्रमस्तीति तत्राह अहं किलेति भुवि प्रजार्थं पूजयं पुत्रलाभप्रयोजनः सन्
पूजितवान् किलेति स्वनीचत्वे भगवद्भक्तवचनमनुस्मरति अतो यथा वयं मुच्येम तथा नोऽस्मान् शाधि
शिक्षयेत्यर्थः॥८॥विचित्राणि व्यसनानि यस्मिंस्तस्मात्संसारात् तथा विश्वतः सर्वतो भयं यस्मिन् भवद्भिः हे

ब्रह्मंस्तथापि पृच्छामो धर्मान्भागवतांस्तव॥यान्श्रुत्वा श्रद्धया मर्त्यो मुच्यते सर्वतो भयात्॥७॥
अहं किल पुरानंतं प्रजार्थो भुवि मुक्तिदं॥अपूजयं न मोक्षाय मोहितो देवमायया॥८॥यथा विचि
त्रव्यसनाद्भवद्भिर्विश्वतो भयात्॥मुच्येम ह्यंजसैवाद्धा तथा नः शाधि सुव्रत॥९॥श्रीशुकः॥रा
जन्नेवं कृतप्रश्नो वसुदेवेन धीमता॥प्रीतस्तमाह देवर्षिर्हरेः संस्मारितो गुणैः॥१०॥श्री
नारदः॥सम्यगेतद्व्यवसितं भवता सात्वतर्षभ॥यत्पृच्छसे भागवतान्धर्मांस्त्वं विश्वभावनान्
॥११॥श्रुतोऽनुपठितो ध्यात आदृतो वानुमोदितः॥सद्यः पुनाति सद्धर्मो देवविश्वद्रुहोऽपि हि॥१२

मुच्येमहि अंजसा अनायासेन अद्धा साक्षान्निश्चयेन च हरेर्गुणैर्वर्णनीयत्वेन प्रस्तुतैः प्रारब्धैर्हरिं संस्मा
रित इत्यर्थः॥१०॥प्रीतिमाविष्करोति सम्यगिति त्रिभिः पृच्छसे पृच्छसि विश्वभावनान् सर्वशोधकान्॥११॥
आदृत आस्तिकेन गृहीतः अनुमोदितः परैः क्रियमाणः संस्तुतः सद्धर्मो भागवतो धर्मः देवद्रुहो वसुदेवे
त्यर्थः यद्वा देवमायाविश्वस्य च द्रुह्यन्ति येनानपि॥१२॥ श्रीहरिः

रामः
४

किंचत्वयाममस्वरूपकारःकृतइत्याहत्वयेतिपुण्येश्रवणकीर्तनेयस्यसः॥१३॥अत्रापिभगवद्धर्मनिर्णयेपिविदेहस्य
जनकस्य॥१४॥आर्षभाणामन्वयंतिसात्वयाविविच्यकथयतिसप्तभिःप्रियव्रतइति॥१५॥मोक्षधर्मविवक्षयामोक्ष
धर्माणांवक्तुमिच्छातयाअवतरणमवतारःअवतीर्णंवासुदेवांशमित्याहुःतस्यचवेदपारगंसुतशतमासीत्
१६॥तेषांऋषभसुतानांमध्येनवयोगेश्वराणांचरितंवक्तुंइतरेषांचरितंतावद्विविच्याहतेषामितिएतदजनाभ

ऋषभपुत्राणां

त्रिमे:२

त्वयापरमकल्याणःपुण्यश्रवणकीर्तनः॥स्मारितोभगवानद्यदेवोनारायणोमम॥१३॥
अत्राप्युदाहरंतीममितिहासंपुरातनं॥आर्षभाणांचसंवादंविदेहस्यमहात्मनः॥१४॥
प्रियव्रतोनामसुतोमनोःस्वायंभुवस्ययः॥तस्याग्नीध्रस्ततोनाभिरृषभस्तत्सुतःस्मृतः॥१५
तमाहुर्वासुदेवांशंमोक्षधर्मविवक्षया॥अवतीर्णंसुतशतंतस्यासीद्ब्रह्मपारगं॥१६॥ते
षांतुभरतोज्येष्ठोनारायणपरायणः॥विख्यातंवर्षमेतद्यन्नाम्नाभारतमद्भुतं॥१७॥स
भुक्तभोगांत्यक्त्वेमांनिर्गतस्तपसाहरिं॥उपासीनस्तत्पदवींलेभेवैजन्मभिस्त्रिभिः॥१८॥
तेषांनवनवद्वीपपतयोस्यसमंततः॥कर्मतंत्रप्रणेतारएकाशीतिर्द्विजातयः॥१९॥न
वाभवन्महाभागामुनयोह्यर्थशंसिनः॥श्रमणावातरशनाआत्मविद्याविशारदाः॥२०

नामवर्षंयस्यनाम्नाभारतमित्युक्तंविख्यातमासीत्तपसेननतस्यधर्मातिरेकोनिरूपितः॥१७॥इमांपृथ्वींगृहात्
निर्गतःहरिमुपासीनःसेवमानःसन्॥१८॥नवसुतानवद्वीपपतयःनवानांनवावर्तादिभूखंडानांपतयःअ
स्यभारतवर्षस्यैकाशीतिस्सुताःकर्ममार्गप्रवर्तकाःब्राह्मणाअभूवन्॥१९॥अर्थशंसिनःपरमार्थनिरूपकाः
श्रमणाःश्रमवंतःआत्माभ्यासेकृतश्रमाइत्यर्थःवातरशनादिगंबराःआत्मविद्यायांविशारदाःनिष्णाताः
॥२०॥

श्री
भा ए
टी
६

तेषां पारमहंस्यचरितमाह द्वाभ्यां एत इति ॥ भगवद्रूपं विश्वं पश्यंतः सदसदात्मकं स्थूलसूक्ष्मरूपं तच्च स्वात्मव्यतिरेके
ण पश्यंतः ॥२२॥ अव्याहता अप्रतिहता इष्टा अभिप्रेता गतिर्येषां ते मुक्ता अनासक्ताः ॥२३॥ महात्मनो निमेर्वितायमा
नेऽनुष्ठीयमाने अजनाभे भारतवर्षे ॥२४॥ यजमानो निमिः अग्नयः आहवनीयादयः विप्रा ऋत्विगाद

कविर्हविरंतरिक्षः प्रबुद्धः पिप्पलायनः ॥ आविर्होत्रोथ द्रुमिलश्चमसः करभाजनः ॥२१॥ त एते भ
गवद्रूपं विश्वं सदसदात्मकं ॥ आत्मनोव्यतिरेकेण पश्यंतो व्यचरन्महीं ॥२२॥ अव्याहतेष्टग
तयः सुरसिद्धसाध्यगंधर्वयक्षनरकिंनरनागलोकान् ॥ मुक्ताश्चरंति मुनिचारणभूतनाथवि
द्याधरद्विजगवां भुवनानि कामं ॥२३॥ त एकदा निमेः सत्रमुपजग्मुर्यदृच्छया ॥ वितायमानमृ
षिभिरजनाभे महात्मनः ॥२४॥ तान्दृष्ट्वा सूर्यसंकाशान्महाभागवतान्नृप ॥ यजमानोग्नयो विप्राः
सर्व एवोपतस्थिरे ॥२५॥ विदेहस्तानभिप्रेत्य नारायणपरायणान् ॥ प्रीतः संपूजयांचक्रे आसन
स्थान्यथार्हतः ॥२६॥ तान्रोचमानान्स्वरुचा ब्रह्मपुत्रोपमान्नव ॥ पप्रच्छ परमप्रीतः प्रश्रयावनतो नृप ॥२७॥
विदेह उवाच ॥ मन्ये भगवतः साक्षात्पार्षदान्वो मधुद्विषः ॥ विष्णोर्भूतानि लोकानां पावनाय चरंति हि ॥

यः ॥२५॥ अभिप्रेत्य ज्ञात्वा ॥२६॥ स्वरुचैव रोचमानान्नवाभरणादिप्रकाशैः ब्रह्मपुत्रोपमान् सनत्कुमारा
दिसदृशान् ॥२७॥ परमप्रीत्या तद्दर्शनमभिनंदति द्वाभ्यां मन्य इति ॥ ननु भगवतः पार्षदानां कथमत्राप
लब्धिः तत्राह विष्णोरिति ॥ विष्णुभक्ताः लोकपावनार्थं सर्वत्र पर्यटंतीत्यर्थः ॥२८॥

रा म
६

मया दुर्लभं लब्धमहो भाग्यमित्याह दुर्लभ इति बहवो देहा भवंति येषां ते देहिनो जीवास्तेषां क्षणभंगुरोपि मानुषो देहो दुर्लभः परमपुरुषार्थसाधनत्वात् वैकुंठः प्रियो येषां वैकुंठस्य वा प्रियास्तेषां दर्शनं ॥२९॥ हे अनघाः निरवद्याः भवतः युष्मानात्यंतिकं क्षेमं पृच्छामः यतः क्षणार्धकालं भवोपि सत्संगः शेवधिर्निधिर्निधिलाभे यथानंदो भवति तथात्र परमानंद इत्यर्थः ॥३०॥ तदर्थं च भागवतान्धर्मान्ब्रूत यदि नोस्माकं श्रुतये

दुर्लभो मानुषो देहो देहिनां क्षणभंगुरः ॥ तत्रापि दुर्लभं मन्ये वैकुंठप्रियदर्शनं ॥२९॥
अत आत्यंतिकं क्षेमं पृच्छामो भवतोनघाः ॥ संसारेस्मिन्क्षणार्धोपि सत्संगः शेवधिर्नृणां ॥३०॥
धर्मान्भागवतान्ब्रूत यदि नः श्रुतये क्षमं ॥ यैः प्रसन्नः प्रपन्नाय दास्यत्यात्मानमप्यजः ॥३१॥
नारदः एवं ते निमिना पृष्टा वसुदेव महत्तमाः ॥ प्रतिपूज्याब्रुवन्प्रीत्या ससदस्यर्त्विजं नृपं ॥३२॥

श्रवणाय क्षमं योग्यं भवति कथंभूतान् यैर्धर्मैः प्रपन्नाय भक्तायाजो हरिरात्मानमपि दास्यति तान् ॥३१॥ सह सदस्यैर्ऋत्विग्भिश्च वर्तमानं तेपि भगवद्धर्मश्रवणपरा बभूवुरित्यर्थः ॥ भगवद्धर्मतत्त्वं क्रमायातं तत्र वर्णानि च ब्रह्मकर्मावतरे ह्याभक्ते प्राप्य युगक्रमात् तान् क्रमेण कृतवानव प्रश्नान्निमिनृप एकैकस्योत्तरं प्रोचुः कविमुख्या मुनीश्वराः ॥ ३२ ॥ श्रीहल ॥

श्री
भा॰ ए
टी॰ ७

प्रथमम् आत्यंतिकं क्षेमं कथयति मन्य इति न कुतश्चिद्भयं यस्मात् तद् अकुतश्चिद्भयं अत्र संसारे असदात्मभावात् अस
ति देहादौ आत्मभावनात् नित्यं सर्वदा उद्विग्नबुद्धेर्विश्वात्मना सर्वथा निःशेषं यत्पदाम्बुजोपासने भीर्निवर्तते नेत
इत ॥३३॥ भागवतधर्मलक्षणमाह ये वै इति मन्वादिमुखेन वर्णाश्रमादिधर्मा उक्ता निरहस्यत्वात् स्वमुखे
नैव भगवता विदुषाम् अपि अंजसा अंजः सुखेनैव आत्मलब्धये ये ये उपायाः प्रोक्ताः तान् भागवतधर्मान् विद्धि ॥३४॥
अंजः पदेनोक्तं सुकरत्वं विवृणोति यानिति यान् आस्थाय आश्रित्य योगादिषु न प्रमाद्येत न विघ्नैर्न विहन्यत ॥ किं

ना३

कविः॥ मन्येऽकुतश्चिद्भयम् अच्युतस्य पदांबुजोपासनम् अत्र नित्यं ॥ उद्विग्नबुद्धेर् असदा
त्मभावात् विश्वात्मना यत्र निवर्तते भीः ॥३३॥ ये वै भगवता प्रोक्ता उपाया ह्यात्म
लब्धये ॥ अंजः पुंसाम् अविदुषां विद्धि भागवतान् हि तान् ॥३४॥ यान् आस्थाय नरो रा
जन्न प्रमाद्येत कर्हिचित् ॥ धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिह ॥३५॥ ॐ

च निमील्य नेत्रे धावन्नपि इह एषु भागवतधर्मेषु न स्खलेत् निमीलनं नाम अज्ञानं ॥ यथाहुः ॥ श्रुतिस्मृ
ती उभे नेत्रे विप्राणां परिकीर्तिते ॥ एकेन विकलः काणो द्वाभ्याम् अंधः प्रकीर्तित इति ॥ अज्ञात्वापीत्यर्थः॥
यथा पदन्यासस्थानम् अनतिक्रम्य शीघ्रपरतः पदन्यासेन गतिर्धावनं तद्वद् अत्रापि किंचित्किंचि
दतिक्रम्यातिशीघ्रम् अनुष्ठानं धावनं तया अनुतिष्ठन्नपि न स्खलेत् न प्रत्यवायी स्या
त् न पतेत् फलान्न भ्रश्येत् ॥३५॥ किंच

रा म
७

ननु के ते भागवता धर्माः ईश्वरार्पितानि सर्वकर्माण्यपीत्याह कायेनेति आत्मना चित्तेनाहंकारेण वानुसृतो यः स्व-
भावस्तस्मात् अयमर्थः न केवलं विधितः कृतमेवेति नियमः स्वभावानुसारि लौकिकमपीति तथा च भगवद्गीतासु
यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणं इति यद्वा ननु कायादीनामे-
व कर्मेणां नात्मन इत्याशंक्याह बुद्ध्यात्मनेनानुसृतात् ब्राह्मणत्वादि स्वभावाद्यद्यत्करोतीत्यर्थः तत्सकलं परस्मै
परमेश्वरायनारायणायेति समर्पयेत् तथा सति सकलमपि कर्म भागवतो धर्मो भवतीति भावः ॥३६॥ ननु किमेवं
परमेश्वरभजनेनाज्ञानेकल्पितभयस्य ज्ञानेकनिवर्त्यत्वादित्याशंक्याह भयमिति यतो भयं तन्मायया भवत् अतो

कायेन वाचा मनसेंद्रियैर्वा बुद्ध्यात्मना वानुसृतस्वभावात् ॥ करोति यद्यत्सकलं परस्मै
नारायणायेति समर्पयेत्तत् ॥३६॥ भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययोऽ-
स्मृतिः ॥ तन्माययातो बुध आभजेत्तं भक्त्यैकयेशं गुरुदेवतात्मा ॥३७॥ राम ॥ हल

बुद्धिमान् तमेवाभजेत् ननु भयं देहाभिनिवेशतो भवति स च देहेऽहंकारतः स च स्वरूपास्मरणात् किं तत्र तस्य
माया करोति तत्राह ईशादपेतस्येति ईशविमुखस्य तन्मायया अस्मृतिर्भगवतः स्वरूपास्मृतिः ततो विपर्ययो
देहोऽस्मीति ततो द्वितीयाभिनिवेशाद्भयं भवति एवं बुद्धिप्रसिद्धं लौकिकी चापि मायामुक्तं च भगवता दैवी ह्ये-
षा गुणमयी मम माया दुरत्यया ॥ मामेव ये प्रपद्यंते मायामेतां तरंति ते इति एकया अव्यभिचारिण्या भक्त्या भ-
जेत् किंच गुरुदेवतात्मा गुरुरेव देवता ईश्वर आत्मा प्रेष्ठश्च यस्य तथा दृष्टिः सन्नित्यर्थः ॥३७॥

श्री भा० टी० ए
८

ननु विषयविक्षिप्तस्य कुतोऽव्यभिचारिणी भक्तिः संभवति कुतस्तरामभयं तत्र न तावद्विषयो नाम वास्तवोऽस्ति
किं तु मनोविलासमात्रं अतो मनोनियमनेन भजनादभयं स्यादित्याह अविद्यमानोऽपीति। द्वयो द्वैतप्रपंचः
ध्यातुः पुंसः धिया मनसा स्वप्नश्च मनोरथश्च यथा ततस्तस्मात्कर्माणि संकल्पयति विकल्पयति च यन्मनः तन्निरु-
ध्यात् निरुध्य केन तत्रैवकया भक्त्या भजनादभयं स्यादित्यर्थः ॥३८॥ एतदत्यन्ताशक्यमित्याशंक्य सुगमं मार्गमाह
शृण्वन्निति तदर्थकानि जन्मानि कर्माणि चार्थोपेतानि नामान्यपि संकल्पनत्यागमशक्यानीत्याशंक्याह यथा

विषयक्लृप्तमनोरूपयोः २

अविद्यमानोऽप्यवभाति हि द्वयो ध्यातुर्धिया स्वप्नमनोरथौ यथा। तत्कर्मसंकल्पविकल्पकं मनो
बुधो निरुन्ध्यादभयं ततः स्यात् ॥३८॥ शृण्वन्सुभद्राणि रथांगपाणेर्जन्मानि कर्माणि च यानि लोके।
गीतानि नामानि तदर्थकानि गायन्विलज्जो विचरेदसंगः ॥३९॥ एवंव्रतः स्वप्रियनामकीर्त्या जाता-
नुरागो द्रुतचित्त उच्चैः। हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकबाह्यः ॥४०॥

नि लोके गीतानि प्रसिद्धानि तानि शृण्वन् गायंश्च विचरेदसंगो निःस्पृहः ॥३९॥ एवं च भजतः संजातप्रेमलक्षण-
भक्तियोगस्य धर्मस्य संसारधर्मातीतां गतिमाह एवमिति एवंव्रतं नैष्ठिको व्रताचारो यस्य सः स्वप्रियस्य हरेर्नामकीर्त्या जा-
तोऽनुरागः प्रेम यस्य सः अत एव द्रुतचित्तः श्लथहृदयः कदाचिदहो अपराजितं भगवन्तमालब्ध्यकल्प्यौच्चैर्हसति ए-
तावन्तं कालं नापेक्षितोऽस्मीति रोदिति अत्यौत्सुक्याज्जौतिक्रोशति हे हरे मामनुगृहाणेति अतिहर्षेण गायति
जितं जितमिति नृत्यति किं दाम्भिकवत् स्मरणप्रकाशयितुं नेत्याह उन्मादवत् ग्रहगृहीतवत् लोकबाह्यः विवशः ॥४०॥

राम
८

किंच खमिति सत्त्वानि भूतान्याकाशादि यत्किंचिद्भूतमात्रं हरेः शरीरमिति मत्वा प्रणमेत संभावनायां लिङ् ॥४१॥ न
न्वियमारूढयोगानामपि बहुजन्मभिर्दुर्लभा गतिः कथं नामकीर्तनमात्रेणैकस्मिन्नपि जन्मनि भवेदित्याशंक्य स
दृष्टान्तमाह भक्तिरिति प्रपद्यमानस्य हरिं भजतः पुंसः भक्तिः प्रेमलक्षणा परेशानुभवः प्रेमास्पदभगवद्रूपस्फूर्तिः त
न्निर्वृतस्य ततोऽन्यत्र गृहादिषु विरक्तिरित्येष त्रिकः एककालः भजनसमकाल एव स्यात् यथाश्नतो भुंजानस्य तुष्टिः सु

खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्त्वानि दिशो द्रुमादीन् ॥ सरित्समुद्रांश्च हरेः श
रीरं यत्किंच भूतं प्रणमेदनन्यः ॥४१॥ भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एक
कालः ॥ प्रपद्यमानस्य यथाश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनुग्रासं ॥४२॥ इत्य
च्युताङ्घ्रिं भजतोऽनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः ॥ भवन्ति वै भागवतस्य राजंस्ततः
परां शान्तिमुपैति साक्षात् ॥४३॥ श्रीराजोवाच ॥ अथ भागवतं ब्रूत यद्धर्मो यादृ
शो नृणां ॥ यथाचरति यद्ब्रूते यैर्लिंगैर्भगवत्प्रियः ॥४४॥

हरिंभजतः

खं पुष्टिरुदरभरणं क्षुन्निवृत्तिश्च प्रतिग्रासं स्युः उपलक्षणमेतत् प्रतिसिक्थमपि यथा स्युः तद्वदेवमेवैकस्मिन्न
जने किंचित्प्रेमादि त्रिकं जायमानमनुवृत्त्या निरंतरं भजतः परमप्रेमादि जायते बहुग्राससमाप्तौ निरवपरमतुष्ट्यादि
॥४२॥ ततश्च भगवत्प्रसादेन कृतार्थो भवतीत्याह इत्यच्युताङ्घ्रिमिति भागवतस्य भवन्तीत्युक्तेस्तस्य लक्षणं पृच्छति
अथेति यद्धर्मो यस्मिन्धर्मे परिनिष्ठितः यादृशः यत्स्वभावः यथाचरति वदति तेन चेष्टितेन वाचा यैर्लिंगैर्भगवतः प्रियो
भवति ॥४३॥४४

श्री॰ ए
भा॰ टी॰
८

यद्धर्मेत्यस्योत्तरमाह त्रयेण सर्वभूतेष्विति। आत्मनः स्वस्य सर्वभूतेषु ब्रह्मभावेन समन्वयं यः पश्येत् तथा ब्रह्मरूपे स्वा
त्मनि अधिष्ठाने भूतानि च यः पश्येत्। यद्वा आत्मा ततत्वाच्च मातृत्वाद्वा आत्मा हि परमो हरिरिति तंत्रोक्तेः आत्मनो हरेः स
११२ र्वभूतेषु मशकादिष्वपि नियंतृत्वेन वर्तमानस्य भगवद्भावं निरतिशयैश्वर्यमेव यः पश्येन्न त्वेतस्य तारतम्यं तथात्म
नि हरावेव भूतानि च पश्येत् न कार्यं भूते भगवति अप्रच्युतैश्वर्यादिरूपेण न पुनर्जन्ममलिनभूतात्मरूपत्वेन जा
त्यादिप्रसक्त्या ऐश्वर्यादिप्रच्युतिं पश्येत् सर्वत्र परिपूर्णं भगवन्तं पश्यन् भागवतोत्तम इत्यर्थः ॥४५॥ प्रेम च

हरिरुवाच ॥ सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः ॥ भूतानि भगवत्यात्मन्येष भा
गवतोत्तमः ॥४५॥ ईश्वरे तदधीनेषु वालिशेषु द्विषत्सु च ॥ प्रेममैत्रीकृपोपेक्षा
यः करोति स मध्यमः ॥४६॥ अर्चायामेव हरये पूजां यः श्रद्धयेहते ॥ न तद्भक्तेषु
चान्येषु स भक्तः प्राकृतः स्मृतः ॥४७॥ गृहीत्वापीन्द्रियैरर्थान्यो न द्वेष्टि न हृ
ष्यति ॥ विष्णोर्मायामिदं पश्यन्स वै भागवतोत्तमः ॥४८॥ ऊल

मैत्री च कृपा चोपेक्षा च ता ईश्वरादिचतुर्षु यः करोति स मध्यमो भागवतः एवंभूतस्य भेदस्य दर्शनात् ॥४६॥ अर्चायां
प्रतिमायां पूजामीहते करोति न तु तद्भक्तेष्वन्येषु च सुतरां न करोति प्राकृतः प्रकृतिः प्रारंभः अधुनैव प्रारब्धभक्तिः शनैः श
नैरुत्तमो भविष्यतीत्यर्थः ॥४७॥ पुनरष्टभिः श्लोकैरभ्यर्हितत्वादुत्तमभागवतस्यैव लक्षणमाह गृहीत्वापीति
श्रीवासुदेवाविष्टचित्तो न गृह्णाति तावदिंद्रियैरर्थान्न गृहीत्वापीत्यपिशब्दार्थः इदं विश्व ॥४८॥ वासुदेव ॥

राम
८

किंच देहादीनां संसारधर्मैर्जन्माप्ययादिभिर्यो हरेः स्मृत्या अविमुह्यमानः स भागवतप्रधानः। तत्र देहस्य जन्माप्ययौ प्रा
णस्य क्षुत्पिपासे मनसो भयं बुद्धेस्तर्षः तस्या इन्द्रियाणां कृच्छ्रं श्रमः॥४९॥ न कामाश्च कर्माणि च बीजानि च वासनाः
तेषां वासुदेव एको निलय आश्रयो यस्य सः एतेन नरहरौ वापीवादि श्लोकत्रयेण ईदृशं धर्ममाह कामादिरहित
स्वचरतीति यथाचरतीत्यपेक्षायां नेतर उक्तं॥५०॥ यैर्लिंगैर्भगवत्प्रिय इत्युच्यते तान्याह न यस्येति जन्म कुलं कर्म तपआ
दि जातयः अनुलोमप्रतिलोमजाः मूर्धावसिक्तादयः अस्मिन्देहे अहंकारो हि तैः सत्कुलकर्मादिलिंगैर्हरेः प्रियो

देहेंद्रियप्राणमनोधियां यो जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः॥ संसारधर्मैरविमुह्य-
मानः स्मृत्या हरेर्भागवतप्रधानः॥४९॥ न कामकर्मबीजानां यस्य चेतसि संभवः॥ वासु-
देवैकनिलयः स वै भागवतोत्तमः॥५०॥ न यस्य जन्मकर्मभ्यां न वर्णाश्रमजातिभिः॥
सज्जतेस्मिन्नहंभावो देहे वै स हरेः प्रियः॥५१॥ न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा॥
सर्वभूतसमः शांतः स वै भागवतोत्तमः॥५२॥ त्रिभुवनविभवहेतवेप्यकुंठस्मृतिरजितात्म-
सुरादिभिर्विमृग्यात्॥ न चलति भगवत्पदारविंदाल्लवनिमिषार्धमपि स वैष्णवाग्र्यः॥५३॥

भवतीत्यर्थः॥५१॥ वित्तेषु स्वीयं परकीयमिति आत्मनि स्वः पर इति॥५२॥ किंच त्रिभुवनविभवहेतवेपि त्रैलो
क्यराज्यार्थमपि लवार्धमपि निमिषार्धमपि भगवत्पदारविंदभजनाद्यो न चलति स वैष्णवाग्र्यः। ननु लवार्ध
मात्रभजनोपरमे चेत्त्रैलोक्यलाभो भवेत् तत्कुतो न चलेत् तत्राह अकुंठस्मृतिः भगवत्पदतोन्यत्सारं नास्तीत्येवं कुण्
ठा अनपगता स्मृतिर्यस्य सः भगवत्पदारविंदादन्यत्सारं नास्तीति ज्ञानतः अनन्याह अजिते हरावेवात्मा येषां
ते तथाभूतैः सुरादिभिरपि दुर्लभात् किं तु केवलैर्विमृग्यात् तत्पदेन तया सर्वस्य तुच्छत्वं स्मरन् न चलतीत्यर्थः॥५३

श्री ए भा टी १०

अपि च विषयाभिसंधिना चलनं कामेन तानि संतापे सति भवेत् स च कामो भगवत्सेवया निहतो भवतीत्याह भगवत इति उरुक्रमो चरणौ तयोः शाखा अंगुलयः तासु नखानि तान्येव मणयः तेषां चंद्रिका प्रीतलादीप्तिः तया नि रस्तः कामादितापो यस्मिंस्तस्मिन्नुपसीदतां भजतां हृदि कथं पुनः संतापः प्रभवति चंद्रे उदिते सति अर्कस्य ताप इव नयस्य स्वः परस्त्यादि नाम्ना वात्त्रयेण याहशः त्यसोऽनरम्भं वेदितव्यं यइतरत्यस्य च हरिना मानीति सा

ताप:। भजतां = ४ ८।

भगवत उरुविक्रमांघ्रिशाखानखमणिचंद्रिकया निरस्ततापे ॥ हृदि कथमुपसीदतां पुनः स प्रभवति चंद्र इवोदितेऽर्कतापः ॥५४॥ विसृजति हृदयं न यस्य साक्षाद्धरिरवशाऽभिहितोप्यघौघनाशः ॥ प्रणयरशनया धृतांघ्रिपद्मः स भवति भागवतप्रधान उक्तः ॥५५॥ इति श्रीभागवते एकादशस्कंधे द्वितीयोऽध्यायः ॥२॥ श्रीराजोवाच ॥ ॐ परस्य विष्णोरीशस्य मायिनामपि मोहिनीं ॥ मायां वेदितुमिच्छामो भगवंतो ब्रुवंतु नः ॥१॥ हरस

तव्यं ॥५४॥ उक्तसमस्तभागवतलक्षणसारमाह विसृजतीति ॥ हरिरेवं स्वयं साक्षाद्यस्य हृदयं न विसृजति न त्यजति कथंभूतः अवशेनाप्यभिहितमात्रोपि अघौघं नाशयति यः स तत्किं न विसृजति यतः प्रणयरश नया धृतेन हृदयेन बद्धं अंघ्रिपद्मं यस्य सः भागवतप्रधानः उक्तो भवति ॥५५॥ इति भावार्थदीपिकायामेकादश शे द्वितीयः ॥२॥ मायांतत्तरणब्रह्मकर्मप्रश्नचतुष्टये ॥ तृतीये तु नरेन्द्राय माह मेने निमिः पृथक ॥ विष्णोर्मायां मिदं पश्यन्त्रिस्मकं अतो मायामेव वेच्छान्ति परस्येति हे भगवंतः ॥१॥

रा म १०

तत्कुलनन्दनो भगवतो भूत्वा हन्नार्थः स्याः किं बहुप्रश्नैरत आह नेति संसारतापैर्नितरान्तप्तोहं न तत्तापस्य भेष
जं हरिकथामृतं त्वद्युखच्युतं ज्ञपमानो नानुतृप्यामीति मायायाः स्वरूपतो निरूपणं सभवान् सृष्ट्यादिकार्यद्वा
रेण निरूपयितुमाह एभिरिति आद्यः पुरुषः यथा भूतानां मात्मा कारणभूत एभिः स्वसृष्टैर्महाभूतैरुच्चा
वचानि भूतानि ससर्ज स्वेषामाया भगवत इति चरमश्लोकपादः स्वप्रतिश्लोकमनुषङ्गः किमर्थं ससर्ज स्वमात्रा
त्मप्रसिद्धये स्वं मिमीते प्रमिमीते यउपास्ते सः स्वमाता तस्यात्मनो जीवस्य प्रकृष्टायै सिद्धये ॥ यद्वा स्वांशभूतानां

ॐ नात्रप्येज्ञपस्तुष्य ऋचो हरिकथामृतं ॥ संसारतापनिस्तप्तो मर्त्यस्तत्तापभेषजं ॥२॥ श्री
नारदः एभिर्भूतानि भूतात्मा महाभूतैर्महाभुजः ॥ ससर्जोच्चावचान्याद्यः स्वमात्रात्मप्रसिद्ध
ये ॥३॥ एवं सृष्टानि भूतानि प्रविष्टः पंचधातुभिः ॥ एकधा दशधात्मानं विभजन्जुषते गुणान् ॥४
धा धा

जीवानां मात्राप्रसिद्धये विषयभोगाय स्वात्मप्रसिद्धये मोक्षाय चेत्यर्थः। तदुक्तं वेदस्तुतौ। बुद्धीन्द्रियमनःप्राणा
न् जनानामसृजत्प्रभुः॥ मात्रार्थं च भवार्थं च आत्मने कल्पनाय चेति ॥३॥ एवं जीवोपकरणार्थं पंचधातुभिर्म
हाभूतैः सृष्टानि भूतान्यंतर्यामिरूपेण प्रविष्टः एकधा मनसा दशधा बाह्येंद्रियरूपेण स्वात्मानं विभजन्गु
णान्नतत्तद्विषयान्जुषते जोषयतीत्यर्थः। यद्वा तमात्मानं प्रति गुणान्विभजन् जुषते प्रीयत इत्यर्थः ॥४॥

गुणैर्भुंजान एव कथं सज्जते भुंजानो भोगसमाप्तौ मुच्यते इति
चेत्तत्राह कर्माणीति २ =

एवं मायामयी सृष्टिमुक्त्वा मायारचनप्रलयं दर्शयितुमा
रभते धातूपप्लव इति ३ =

सच जीवस्यात्मनं तयोर्मिथ्याप्रद्योतितैर्गुणैरिन्द्रियैर्गुणान्विषयान्भुंजान इदं सृष्टं शरीरमात्मानं मन्यमान
इह शरीरादौ सज्जते ॥५॥ कर्मभिः कर्मेन्द्रियैश्च सनिमित्तानि सकारणानि कर्माणि कुर्वन्सुखेतरं सुखं दुःखं वात्म
कं कर्मफलं ॥६॥ बहून्यभद्राणि वहन्तीति नितरां यातः सर्गप्रलयौ उत्पत्तिमरणे ॥७॥ धातूनां महाभूतानामुपप्ल

तत्तत्कर्मफलं च गृह्णन्नयं देहभृद्भ्रमतीह संसारेन मुच्यते कथं
कियन्तं कालं भ्रमति तदाह इत्थमिति २ =

गुणैर्गुणान्स भुंजान आत्मप्रद्योतितैः प्रभुः ॥ मन्यमान इदं सृष्टमात्मानमिह सज्जते ॥५
कर्माणि कर्मभिः कुर्वन्सनिमित्तानि देहभृत् ॥ तत्तत्कर्मफलं गृह्णन्भ्रमतीह सुखेतरं ॥६॥इ
त्थं कर्मगतीर्गच्छन्बह्वभद्रवहाः पुमान् ॥ आभूतसंप्लवात्सर्गप्रलयावश्नुतेऽवशः ॥७
धातूपप्लव आसन्ने व्यक्तं द्रव्यगुणात्मकं ॥ अनादिनिधनः कालो ह्यव्यक्तायापकर्षति ॥८
शतवर्षा ह्यनावृष्टिर्भविष्यत्युल्बणा भुवि ॥ तत्कालोपचितोष्णार्को लोकांस्त्रीन्प्रतपिष्यति
पातालतलमारभ्य संकर्षणमुखानलः ॥ दहन्नूर्ध्वशिखो विष्वग्वर्धते वायुनेरितः ॥१०॥
संवर्तको मेघगणो वर्षति स्म शतं समाः ॥ धाराभिर्हस्तिहस्ताभिर्लीयते सलिले विराट् ॥११

वे नाशहेतावासन्ने व्यक्तं कार्यं द्रव्यं स्थूलं गुणाः सूक्ष्मं तदात्मकं अव्यक्ताय अव्यक्तं प्रति नेतुमाकर्षति ॥८॥
नाशहेतुं नाह शतवर्षेति तस्मिन्काले उपचित उष्मा उष्मा यस्यासौ वृक्षश्च यद्वा तेन कालेनोपचितमुष्ण
त्वं यस्य सः ॥९॥ ऊर्ध्वशिख ऊर्ध्वज्वालः विष्वक् परितः ॥१०॥ संवर्तकः प्रलयकर्ता धाराभिर्जलबिंदु
भिः हस्तिहस्ताभिः तत्प्रमाणादिः ॥११॥ श्रीहल

तत उपाधिलयाद्वैराजः पुरुषोऽव्यक्तं कारणं प्रविशति । ननु ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृतात्मानः
प्रविशंति परं पदमिति स्मृतेः यावदधिकारमवस्थितिरधिकारिणामिति न्यायाच्च वैराजशब्दाभिधेयस्य च ब्रह्मणः
परमभागवतत्वान्मोक्ष एव संगच्छते नान्येषामिव कारणमात्रप्रवेशः सत्यं अश्वमेधादिना सत्यलोकं गतानाम
भक्तानामाहेति श्रवणादभक्तत्वे ब्रह्मणोपि प्रकृतौ लयः पुनरुत्पत्तिश्चेति मोक्षस्तु दीर्घलेभ्य सूचनार्थं च भक्तानामि
त्यविरोधः यद्वा केनापि प्रमाणेन न व्यक्तं ब्रह्मैव तत्प्रवेशेन च मोक्ष एवात्र इति द्रष्टव्यं ॥ १२ ॥ एवं विराजो लयमुक्त्वा

ततो विराजमुत्सृज्य वैराजः पुरुषो नृप ॥ अव्यक्तं विशते सूक्ष्मं निरिंधन इवानलः ॥
१२ ॥ वायुना हृतगंधाभूः सलिलत्वाय कल्पते ॥ सलिलं तद्धृतरसं ज्योतिष्ट्वायोपक
ल्पते ॥ १३ ॥ हृतरूपं तु तमसा वायौ ज्योतिः प्रलीयते ॥ हृतस्पर्शोवकाशेन वायुर्नभसि
लीयते ॥ १४ ॥ कालात्मना हृतगुणं नभ आत्मनि लीयते ॥ इंद्रियाणि मनो बुद्धिः स
ह वैकारिकैर्नृप ॥ प्रविशंति ह्यहंकारं स्वगुणैरहमात्मनि ॥ १५ ॥ वासुदेवा ॥

तत्कारणानां महदादिपृथिव्यंतानां प्रातिलोम्येन लयमाह वायुनेति वायोर्हि गंधपरसंहारित्वं प्रसिद्धं सेव
तेके न वायुना हृतगंधा अत एव गंधस्याव्यावर्तकस्य गतत्वात्सलिलत्वाय कल्पते सलिले लीयत इत्यर्थः तद्धृत
रसं तेन वायुना हृतो रसो यस्य तत् ॥ १३ ॥ तमसः स्वरूपतिरस्कारित्वं प्रसिद्धं सेवतेके न तमसावकाशेनाकाशे
न स्वकारणेन ॥ १४ ॥ कालात्मना शब्दस्य हि कालत एव नाशः प्रसिद्धः तद्रूपेणात्मने स्वकारणात्मनि तामसा
हंकारे इंद्रियाणि बुद्धिश्च राजसाहंकारे मनो वैकारिकैर्देवैः सह सात्विकाहंकारे एवं त्रिविधैः स्वगुणैः स्वका
र्यैः सहितः अहं अहंकारः आत्मनि महति स च प्रकृताविति द्रष्टव्यं ॥ १५ ॥

श्री॰
भा॰ टी॰
११

त्रिवर्णा त्रिगुणा मायायाश्रवणभीते राज्ञा तं तन्निवृत्त्युपायश्रवणे कं छंदयति किंभूय इति ॥१६॥ एवमनुक्तेपि तन्
तन्निवृत्त्युपायमेव पृच्छति यथैतामिति यद्यपि तन्मायया तो बुध आभजेत्तमिति भक्तिरुक्ता केनैवोक्ता तथापि
किं भक्तिरेवान्योपि वा तत्रोपायोस्तीति सा तेषु नः प्रश्नाः अकृतात्मभिरवशीकृतान्तःकरणैः स्थूलधियः स्थूले शरी
रेऽहंधीर्येषां ते भक्तिव्यतिरेकेणास्त्यन्यदुपाय इत्यभिप्रेत्य भक्तिमेव ससाधनं निरूपयति तत्र प्रथमं वैराग्यद्वारा रूप
सत्तिमाह चतुर्भिः कर्माणीति दुःखहत्यै दुःखप्रतीकाराय पाकविपर्यासं फलवैपरीत्यं मिथुनीचारिणां मिथुनी

एषा माया भगवतः सर्गस्थित्यंतकारिणी ॥ त्रिवर्णा वर्णितास्माभिः किं भूयः श्रोतुमिच्छ
सि ॥१६॥ राजोवाच ॥ यथैतामैश्वरीं मायां दुस्तरामकृतात्मभिः ॥ तरंत्यंजः स्थूलधियो
महर्ष इदमुच्यतां ॥१७॥ प्रबुद्ध उवाच ॥ कर्माण्यारभमाणानां दुःखहत्यै सुखाय च
पश्येत्पाकविपर्यासं मिथुनीचारिणां नृणां ॥१८॥ नित्यार्तिदेन वित्तेन दुर्लभेनात्
ममृत्युना ॥ गृहापत्याप्तपशुभिः का प्रीतिः साधितैश्चलैः ॥१९॥ एवं लोकं परं वि
द्यान्नश्वरं कर्मनिर्मितं ॥ सतुल्यातिशयध्वंसं यथा मंडलवर्तिनां ॥२०॥ कर्म॥

कर्मफलवैपरीत्यं ४

भूय प्रवर्तमानानां ॥१८॥ कर्मभिः साधिता अपि वित्तादयो न सुखहेतव इति च पश्येदित्याह नित्यार्तिदेनेति
आत्मनः स्वस्य मृत्युरूपेण चलैरनित्यैः पार्थिवैभिश्च ॥१९॥ एवं लोकं परमिति कर्मनिर्मितत्वान्नश्वरं तथा
च श्रुतिः तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति किंच वर्तमानसमये
पि दुःखहेतुं पश्येदित्याह सतुल्यातिशयेन ध्वंसेन च वर्तमान मतत्तुल्यस्पर्धा अतिशये असूया ध्वंसे शोकश्चेन
भयादिकं चापरिहार्यमित्यर्थः यथा मण्डलपतीनां मिथः स्पर्धादि तद्वत् ॥२०॥

राम
१२

उत्तमं श्रेयो ज्ञातुमिच्छुः शाब्दे ब्रह्मणि वेदाख्ये न्यायतो निस्नातं तत्त्वं अन्यथा संशयनिरासकायोगात् परे च ब्रह्मणि
अपरोक्षानुभवेन निस्नातं अन्यथा संबोधसंचारायोगात् परब्रह्मणि निस्नातत्वद्योतकमाह उपशमाश्रयमिति
२१॥ गुरुरेवात्मा दैवतं च यस्य सः अनुवृत्त्या सेवया यैर्धर्मैस्तुष्येत् आत्मा आत्मप्रदश्चोपासकानां यथा बलिप्रभृती
ना॥२२॥ यथोचितमिति समेषु मैत्री उत्तमेषु प्रश्रयं च शिक्षेदित्यर्थः॥२३॥ शौचं बाह्यं मृज्जलादिभिराभ्यन्तरं चाद्रं

हीनेषु च दयां।

तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमं ॥ शाब्दे परे च निस्नातं ब्रह्मण्युपशमाश्रयं ॥२१॥
तत्र भागवतान्धर्मान् शिक्षेद्गुर्वात्मदैवतः ॥ अमाययानुवृत्त्या यैस्तुष्येदात्मात्मदो हरिः ॥२
२॥ सर्वतो मनसोऽसंगमादौ संगं च साधुषु ॥ दयां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितं ॥२३॥
शौचं तपस्तितिक्षां च मौनं स्वाध्यायमार्जवं ॥ ब्रह्मचर्यमहिंसां च समत्वं द्वंद्वसंज्ञयोः ॥२४॥
सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेततां ॥ विविक्तचीरवसनं संतोषं येन केनचित् ॥२५

भाः स्नानादिभिः शिक्षेत् तपः स्वधर्माचरणं तितिक्षां क्षमां मौनं यथा वाचामनुच्चारणं स्वाध्यायमधिकारानु
रूपं वेदपाठादिकं आर्जवं स्वच्छता ब्रह्मचर्यं यस्य यादृक् उचितं गृहे तु स्वदारनियमादि अहिंसां भूतेष्वद्रोहं द्वं
द्वसंज्ञयोः शीतोष्णसुखदुःखादिद्वन्द्वयोः समत्वं हर्षविषादराहित्यं ॥२४॥ आत्मेश्वरान्वीक्षां सच्चिद्रूपेणात्मे
शानिरूपणं रूपेण स्वरान्वीक्षां च कैवल्यमेकान्तशीलत्वं अनिकेततां गृहाद्यभिमानराहित्यं विविक्तची
रवसनं विजने पतितानां वस्त्रखण्डानां कुड्यानां वा वल्कलानां परिधानं ॥२५॥ हू स ॥

भागवते भगवत्प्रतिपादके अन्यत्र शास्त्रादौ चानिंदा तां मनसां प्राणायामैः वाचो मौनेन कर्मणो नीहया दंडं स
त्यं यथार्थभाषणं शमदमौ अंतःकरणबाह्येंद्रियनियमौ ॥२६॥ हरेर्जन्मकर्मगुणानां श्रवणादि तदर्थे हर्युद्देशे
न सर्वकर्मविशेषणं तद्वि यजनादि यत्कृतं तदर्थं शिक्षेत ॥२७॥ इष्टं दत्तमित्यादयो भावे निष्ठाः वृत्तं सदाचारः य
च्चात्मनः प्रियं गंधपुष्पादि दारादीनप्यालब्ध्य परस्मै परमेश्वराय निवेदनं सेवकतया समर्पणं यत्तदपि शिक्षे
त् ॥२८॥ कृष्ण एवात्मा नाथश्च येषां कृष्णस्यात्मनो जीवस्य नाथा येषामिति वा तेषु उभयत्र स्थावरजंगमे च यथा

श्रद्धां भागवते शास्त्रे, निंदामन्यत्र चापिहि ॥ मनोवाक्कर्मदंडं च सत्यं शमदमावपि ॥२६॥
श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः ॥ जन्मकर्मगुणानां वा तदर्थेऽखिलचेष्टितं ॥२७॥
इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियं । दारान्सुतान्गृहान्प्राणान्यत्परस्मै निवेदनं ॥२८॥
एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदं ॥ परिचर्यां चोभयत्र महत्सु नृषु साधुषु ॥२९॥ प
रस्परानुकथनं पावनं भगवद्यशः ॥ मिथो रतिर्मिथस्तुष्टिर्निवृत्तिर्मिथ आत्मनः ॥३०॥
स्मरंतः स्मारयंतश्च मिथोऽघौघहरं हरिं ॥ भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुं ॥३१॥

परिचर्यां तां विशेषयति नृषु तत्रापि साधुषु स्वधर्मशीलेषु ततोऽपि महत्सु श्रीभागवतेषु तैः सह संगमश्च यत्पावनं भ
गवद्यशः तस्य परस्परानुकथनं शिक्षेत । यद्वा यशः प्रतिसंस्पर्धिपरित्यागेन मिथो या रतिः रमणं या च तुष्टिः
यच्च निवृत्तिः समस्तदुःखनिवृत्तिः ताश्च शिक्षेत ॥३०॥ एवं वर्तमानानां परमानंदप्राप्तिमाह स्मर
न्त इति द्वयेन भक्त्या साधनभूतया संजातया प्रेमलक्षणया भक्त्या यद्वा हर्षेण उत्पुलकतनुरोदनमिति विदि
तव्यं ॥३१॥

अजं हरिमनुशीलयंति तल्लीलामभिनयंति एवं परमेत्य प्राप्य निर्वृताः संतः तूष्णीं भवंति ॥३२॥ उपसंहरति इतीति
भागवतधर्मात्त्वन्नयो भक्त्या नारायणपरो मायां तरतीत्सुखेन गच्छति ॥३३॥ नारायणाभिधानस्येति निष्ठां स्वरूपम् अ-
यमोका ब्रह्मैव तावन्नारायण इति भगवानिति परमात्मेति चोच्यते तदुक्तं वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानम-
द्वयं॥ ब्रह्मेति परमात्मेति भगवानिति शब्द्यते। तथा नारायणे भगवति तदिदं विश्वमाहितं॥ गृहीतमायोरुगु-
णः सर्गादावगुणः स्वतः इत्यादिषु ॥३४॥ तत्र किमेभिः शब्दैर्निर्विशेषं तदेव वस्तूच्यते आस्ति वा कोपि विशेषो

क्वचिद्रुदंत्यच्युतचिंतया क्वचिद्धसंति नंदंति वदंत्यलौकिकाः॥ नृत्यंति गायंत्यनुशील-
यंत्यजं भवंति तूष्णीं परमेत्य निर्वृताः॥३२॥ इति भागवतान्धर्मान् शिक्षन्भक्त्या तदुत्थय-
या॥ नारायणपरो मायामंजस्तरति दुस्तरां॥३३॥ राजोवाच॥ नारायणाभिधानस्य
ब्रह्मणः परमात्मनः॥ निष्ठामर्हथ नो वक्तुं यूयं हि ब्रह्मवित्तमाः॥३४॥ श्रीपिप्प-
लायन उवाच॥ स्थित्युद्भवप्रलयहेतुरहेतुरस्य यत्स्वप्नजागरसुषुप्तिषु सद्बहिश्च
देहेंद्रियासुहृदयानि चरंति येन संजीवितानि तदवेहि परं नरेंद्र॥३५॥ श्रीहेल

श्रीरत्यत्रोत्तरं स्थित्युद्भवेति। अयमर्थः॥ अस्य विश्वस्य स्थित्युद्भवप्रलयानां हेतुः स्वयं चाहेतुर्हेतुरहितः सः
नारायण इति परमेव तत्त्वमवेहि स्वप्नजागरसुषुप्तिषु सदन्वयेन वर्तमानं यत् वद्यति च तुरीयं त्रिषु संततमि-
ति। बहिश्च समाध्यादौ यत्सर्वत्र वर्तमानं तदपि ब्रह्मेति। हृदयेन बुद्धिग्रहणमित्यर्थः तस्मात्परमेव तत्त्वम-
वेहि देहेंद्रियप्राणमनांसि येन संजीवितानि संति चरंति प्रवर्तंते तत्परमात्मानि परमेव तत्त्वमवेहि एवं
लक्षणभेदैर्नारायणादिनामभिरुच्यमानमपि परमेकमेव तत्त्वं जानीहि॥३६

अथवैहीत्यनेन विषयत्वे प्राप्ते निषेधति नैतदिति एतत्स्वयं तत्त्वं मनो न विशति न विषयीकरोति वाग्‌उ न वागपि
न चक्षुः आत्मा बुद्धिः प्राणः क्रियाशक्त्या न प्राप्नोति अन्यानि चेंद्रियाणि यथाऽनलं स्वाः स्वाशिखास्ता अ-
र्चिषो विस्फुलिंगादयः न प्रकाशयंति न दहंति च यथा जगन्मनआदिहि निषिध्यमानस्यात्मप्रका-
शस्य न तद्धि प्रकाशकस्य न तस्य काप्यविषयत्वं यथा दीपः प्राणस्य प्राणं उत चक्षुषश्चक्षुः उत श्रोत्रस्य
श्रोत्रं मनसो मनो ये मनो विदुरिति ॥ न यतो वाचो निवर्तंते अप्राप्य मनसा सह ॥ ननु तं त्वौपनिषदं
पुरुषं पृच्छामीति श्रुतेः शब्दगोचरत्वं प्रतीयते तत्राह शब्दोऽपीति शब्दोऽप्यात्ममूलमात्मनिश्रमाणं सदर्थयंतो

ॐ नैतन्मनो विशति वाङ्न चक्षुरात्मा प्राणेंद्रियाणि
च यथानलमर्चिषः स्वाः ॥ शब्दोऽपि बोधकनिषेधत धत
यात्ममूलमर्थीन माह यदिदं तेन निषेधसिद्धिः ॥२६॥

अर्थादुक्तं यथा भवति तथाह न साक्षात् उक्तः बोधकनिषेधतया स्वस्यैव बोधकस्य निषेधरूपत्वात् यतो वाचो नि-
वर्तंते अप्राप्य मनसा सह यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि यन्मनसा न मनुते न चक्षुषा
पश्यति कश्चनेनेत्यादिश्रुतेः । ननु तर्हि नेवाह श्रुतिः तत्किमिदमुच्यते अर्थतो माहेति तत्राह यदि
तदृति अथात आदेशो नेति नेति अस्थूलमनण्वित्यतो वाचो निवर्तंते यद्वाचानभ्युदितमित्यादि निषेध-
स्य यदवधिभूतं ब्रह्म तद्वेविना सिद्धिर्नास्ति सर्वस्य निषेधस्य सावधित्वात् ॥२६॥

कार्यकारणाभिन्नं न भवति वाचारं
भणमिति श्रुतेः २०

ननु तर्हि प्रमाणाविषयत्वान्नास्त्येव ब्रह्मेति प्रसज्येत नेत्याह सत्त्वमिति ॥ सत्स्थूलं कार्यं असत्सूक्ष्मं कारणं तन्मयं ब्रह्मैव भाति अतः यत्तयोः सदसतोः परं कारणं ॥ ननु कथमेकं बहुविधस्य कारणं तत्राह उरुशक्ति अनेकशक्तिमत् उरुर्महती मायालक्षणा शक्तिर्यस्य तदिति ता बहुधा भानमेव दर्शयति ॥ आदौ यदेकं ब्रह्म तदेव सत्त्वरजस्तम इति त्रिवृत्प्रधानं

^ब्रह्मैकासीत्^ ^प्रधानं^

सत्त्वरजस्तमइति त्रिवृदेकमादौ सूत्रं महानहमिति प्रवदन्ति जीवं ॥ ज्ञानक्रियार्थफलरूपतयोरुशक्ति ब्रह्मैव भाति सदसच्च तयोः परं यत् ॥ ३७ ॥

प्रवदन्ति तदेव ततः क्रियाशक्त्या सूत्रं ज्ञानशक्त्या महानिति तदेव प्रवदन्ति तदेवा
हमिति जीवं जीवोपाधिमहंकारं च तदेव प्रवदन्ति तदेव ज्ञानक्रियार्थफलरूपतया ज्ञा
नशब्देन देवताः क्रिया इन्द्रियाणि अर्था विषयाः फलं तत्प्रकाशः सुखादि वा तद्रूपतया ब्रह्मैव भाति
न हि सर्वरूपेण सतो मासमानस्य ब्रह्मणः स्वसिद्धौ प्रमाणापेक्षेति भावः ॥ ३७ ॥ वासुदेवाय नमः

ननु सर्वात्मकं चेद्ब्रह्म तर्हि सर्वस्य कार्यस्य जन्मादिविकारवत्त्वाद्ब्रह्मणोपि तत्प्रसंगः स्यादत आह ना
त्मेति आत्मा ब्रह्म न जजान न जायते जन्माभावादेव न दैनरास्तिनाल ब्रह्मणोपि विकारो नास्ति नैधते न
धते वृद्ध्यभावादेव विपरिणामोपि निरस्तः अतः हि यस्मात् अव्यभिचारिणः आगमापायिना बालयुवा
दिदेहानां भवनविन्नेत्वकालइष्टानस्यावस्थावतो इष्टानदवस्थो भवतीत्यर्थः निरवस्थः कोसावात्मा

ज्ञान मात्रं

नात्मा जजान न मरिष्यति नैधतेसौ न क्षीयते सवनविद्व्यभिचारिणां हि
सर्वत्र शाश्वदनपाय्युपलब्धिमात्रं प्राणेन यथेंद्रियबलेन विकल्पितं सत् २०

अनुवर्तमानं

सर्व

ज्ञाने

ऽत आह उपलब्धिमात्रमिति । नन्वायाते तर्हि क्षणिकत्वं तेस्यादसर्वत्रेति सर्वत्र देशे शश्वत्सर्वदा अ
नपायि अनुवर्तमानं ननु नीलज्ञानं जातं पीतज्ञानं नष्टमिति प्रतीतेर्ज्ञानस्यानपायित्वमत आह इं
द्रियबलेनेति । स एव ज्ञानं इंद्रियबलेन विविधं कल्पितं नीलाद्याकाराः तत्र य एव जायते नश्यति च न
ज्ञानमिति भावः । व्यभिचारिषु अव्यभिचारे दृष्टांतः प्राणो यथेति ॥२०॥

दृष्टांते विहराव निद्रेद्र यादि लयेन निर्विकारात्मो पलब्धिं दर्शयति पंडेखिति १ स्वेदजेषु १

पेशिषु जरायुजेषु अथ तरुषु उद्भिजेषु अपानिश्चितेषु उपधावति अनुवर्तते एवं दृष्टांते निर्विकारत्वं प्रदर्श्य दार्ष्टांतिके विदर्शय
ति कुर्यंतदेवात्मा सविकार इव प्रतीयते यद्यदा जागरे इंद्रियगणः यदा स्वप्ने तत्संस्कारवानहंकारः यदा तु सुषुप्ते तदा तस्मिन्
सुषुप्ते इंद्रियगणे सन्ने लीने अहंकारे च सन्ने कूटस्थः निर्विकार एवात्मा कुतः आश्रयभूते लिंगशरीरे उपाधिं
विना विकारहेतोरुपाधेरभावादित्यर्थः नन्वहंकारपर्यंतस्य सर्वस्य लये शून्यमेवावशिष्यते तदा कूटस्थ आत्मा सत्प्रा
मेद ह तदनुस्मृतिर्नः तस्य विशेषज्ञानशून्यस्य सुखात्मनः सुषुप्तिसाक्षिणः स्मृतिर्नोऽस्माकं भवति एतावंतं कालं सुखमहं सु
प्तः न किंचिद्वेदिषमिति स्मृतेरननुभूतस्यास्मरणात्तस्य सुखात्मनः सुषुप्तिसाक्षिणः सुषुप्तावनुभवः विषयसंवे

अंडेषु पेशिषु तरुष्व् विनिश्चितेषु प्राणो हि जीवमुपधावति तत्र तत्र सन्ने यदिंद्रियगणेऽहमि च प्रसुप्ते
कूटस्थ आशयमृते तदनुस्मृतिर्नः ३९ यर्ह्यब्जनाभचरणैषणयोरुभक्त्या चेतोमलानि विधमेद्गुणकर्म
जानि तस्मिन्विशुद्ध उपलभ्यत आत्मतत्त्वं साक्षाद्यथामलदृशोः सवितृप्रकाशः ४० श्रीराम०

द्रष्टुः

पश्यन्वै तन्न पश्यति

भवो २ई

धाभावान्नस्यादिति भावः तथा च श्रुतिः यद्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते इति ननु च यदि सुषु
प्तौ कूटस्था[illegible]मानुभवेत् कथं पुनरपि संसारः स्यात् अविद्यातत्संस्काराणां विद्यमानत्वादिति चेत्सत्
हितन्निवर्तको न भवो भवेत् अत एवाह यर्हीति विशेषणादि विहाय केवलमब्जनाभस्यैव चरणावेव उरुभक्तिस्तया
प्रमात्वे चेतसो मलानि विधमेत् तात्पर्यतस्तदा तस्मिन्विशुद्धे चेतसि सति साक्षाद्व्यवधानेनात्मतत्त्वमुपलभ्यते प्र
मलयोः दृशोः सत्योर्यथाप्रत्यक्षमेव सवितृप्रकाश इति भिन्नः कर्मयोगाधीनत्वात् इत्थं तिभिन्नः कर्मकांगत्रिति०

नाशायेत चेतएववाकर्तत्त्वग ति २ ४०
नातिमलोनितपाभक्त्या २

४२ प्रयमं=२ लौ४ ति२ निषिद्धं२

नैष्कर्म्यं कर्म्मनिवृत्त्या साध्यं ज्ञानं प्रश्नांतरमाह एवमिति एवं प्रष्टव्यमर्थं पितुरिक्ष्वाकोः ब्रह्मणः पुत्राः सनत्कार
यः सर्वज्ञा अपि नाब्रुवन् गहनत्वद्योतनार्थं द्वितीयप्रश्नस्योत्तरं प्रकटयन्नाह कर्मेति कर्म विहितमकर्म तद्विपरीतं विकर्मेति वि
गतं कर्मेत्येतत्त्रयं वेदवादो वेदैकगम्यं न लौकिकः वेदस्येश्वरात्मत्वादीश्वरादुद्भूतत्वात् अपौरुषेयत्वादित्यर्थः पुंवाक्ये
हि वक्तुरभिप्रायतोऽर्थज्ञानेन शक्यमपौरुषेये तु केवलं वाक्यपौर्वापर्य्या एवं तस्यार्थावधारणं तच्च दुष्करमिति त
त्रैव मादृशो विद्वांसो मुह्यंति किंतु तान्येव प्रतस्त्वतः बालत्वाच्चैवाब्रुवन्निति दुर्ज्ञेयं वेदतात्पर्यमाह परोक्ष

४३

राजोवाच कर्म्मयोगं वदत नः पुरुषो येन संस्कृतः विधूयेहाशु कर्म्माणि नैष्कर्म्यं विंदते परं ४१
एवं प्रश्नमृषीन्पूर्वमपृच्छं पितुरंतिके नाब्रुवन्ब्रह्मणः पुत्रास्तत्र कारणमुच्यतां ४२ कर्म्माक
र्म्मविकर्म्मेति वेदवादो न लौकिकः वेदस्य चेश्वरात्मत्वात्तत्र मुह्यंति सूरयः ४३ परोक्षवादो वे
दोऽयं बालानामनुशासनं कर्म्ममोक्षाय कर्म्माणि विधत्ते ह्यगदं यथा ४४ श्रीरामचंद्राय नमः

त

वाद इति अतोऽन्यथा स्थितोऽर्थः संगोप्य तु अन्यथा कृत्वोच्यते स परोक्षवादः तथा च श्रुतिः तं वा एतं चतुर्होतारं संतं चतुर्होतेत्याचक्षते
परोक्षेण परोक्षप्रिया इव हि देवा इति परोक्षवादत्वमेवाह कर्म्ममोक्षायेति न तु स्वर्गाद्यर्थं कर्म्माणि विधत्ते न कर्म्ममोक्षार्थं तत्राह बाला
नामनुशासनं यथा भवति तथा अत्र दृष्टांतः अगदं औषधिं यथा पिता बालमगदं पाययन् खंडलड्डुकादिभिः प्रलोभ
यन् पाययति ददाति च तेन नैतावता गदपानस्य तल्लाभः प्रयोजनमपि त्वारोग्यं तथा वेदोऽप्यवांतरफलैः प्रलोभयन् कर्म्म
मोक्षायैव कर्म्माणि विधत्ते ४४ श्री श्री श्री श्री श्री श्री

कर्मादि

हि देवा इ

१६
राम०

फलस्तुमुक्तत्वात् १

ननु कर्ममोक्षश्चेत्पुरुषार्थस्तर्हि प्रथममेव कर्म त्यज्यतामत आह नाचरेदिति॥ अजितेंद्रियत्वादज्ञः स्वयं यदि नाचरेत्तर्हि विकर्मणा कर्मा
नाचरणलक्षणेनाधर्मेण मृत्योरनंतरं मृत्युमेवाप्नोति॥ तथा च श्रुतिः मृत्वा पुनर्मृत्युमापद्यते अद्यमानः स्वकर्मभिरिति॥४५॥ तस्मा
द्वेदोक्तमेव कुर्वाणो न तु निषिद्धं॥ ननु कर्मणि क्रियमाणे तस्मिन्नासक्तिस्तत्फलं च स्यान्न तु नैष्कर्म्यरूपा सिद्धिरत आह॥ निःसंगो नाभिनिवे
शवान् ईश्वरेर्पितं न तु फलेच्छया न नु फलस्य श्रूयमाणत्वात्कर्मणि कृते फलं भवेदेव न रोचनार्थेति॥ कर्मणि रुच्युत्पादनार्थं अगदखंडलडु
कादिवत्॥ न तत्कर्मभिरुच्या वेदार्थं सम्यग्विचारयति तथा च यो वा एतदक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रैति स कृपण इत्यनात्मज्ञस्य

नाचरेद्यस्तु वेदोक्तं स्वयमज्ञोजितेंद्रियः॥ विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति सः॥४५॥ वेदोक्तमेव कुर्वाणो निःसंगोर्पि
तमीश्वरे॥ नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः॥४६॥ य आशु हृदयग्रंथिं निर्जिहीर्षुः परात्मनः॥ विधिनोपचरेद्दे
वं तंत्रोक्तेन च केशवं॥४७॥ लब्ध्वानुग्रह आचार्यात्तेन संदर्शितागमः॥ महापुरुषमभ्यर्चेन्मूर्त्याभिमतयात्मनः॥४८॥

कृपणतां॥ तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन चेति यज्ञादीनां ज्ञानशेषतां चावधार्य नि
ष्कामेषु कर्मसु प्रवर्तते न तु स्वर्गकामो यजेतेत्यादिभिः॥ कामिनस्त्वेवं स्वर्गादेः फलत्वेनागमादकामिनस्तु स्वर्गो न भवतीति नैष्कर्म्यसिद्धि
रेव भवतीति भावः॥४६॥ वैदिकं कर्मयोगमुक्त्वा तांत्रिकमाह य आश्विति॥ य आत्मनः परस्यैव सतः आत्मनो जीवस्य हृदयग्रंथिमहंकाररूपं बंधं निर्हर्
तुमिच्छुः स तु तंत्रोक्तेन च विधिना प्रकारेण भजेत् तंत्रमागमः चकारादुदितेन सह समुच्चयमाह॥४७॥ तमेव विधिमाह लब्ध्वानुग्रहमित्यादिना तेना
चार्येण संदर्शित आगमोऽर्चनप्रकारो यस्य सः॥४८॥

१७ श्री भाटी ९

मूर्तेः संमुखमासीन आदिशब्देन भूतशुद्ध्यापि पिंडदेहं विशोध्य सकलन्यासैः कृतात्मरक्षायेन सः ॥४९॥ आदावेव द्रव्याणि पुष्पादीनि जलादि शोध
नेन क्षितिसंमार्जनादिना आत्मानमच्युततया लिंगं मूर्तिमनुलेप्य क्षालनादिना निष्पाद्य योग्यानि कृत्वा ॥५०॥ पाद्यादिपात्राण्युपकल्प्य सन्नि
धाप्य हृदि संपूजितं श्रीमूर्तौ ध्यात्वा हृदादिभिः हृदयशिरःशिखाकवचनेत्रास्त्रमंत्रैः तथा मंत्रेण देवे कृतन्यासो मूलमंत्रेणार्चयेत् ॥५१॥ अंगा
नि हृदयादीनि उपांगानि सुदर्शनादीनि तत्त्वं त्रिविलिंसपार्षदान् सपरिवारान् तैरुपचारैरर्चयेत् तत्र दारुपाद्येति आदिशब्देन मधुपर्कमाचमनं च ॥५२

शुचिः संमुखमासीनः प्राणसंयमनादिभिः ॥ पिंडं विशोध्य संन्यासकृतरक्षोर्चयेद्धरिं ॥४९॥ अर्चादौ हृदये चापि यथाल
ब्धोपचारकैः ॥ द्रव्यक्षित्यात्मलिंगानि निष्पाद्य प्रोक्ष्य चासनं ॥५०॥ पाद्यादीनुपकल्प्याथ सन्निधाप्य समाहितः ॥ हृदा
दिभिः कृतन्यासो मूलमंत्रेण चार्चयेत् ॥५१॥ सांगोपांगां सपार्षदां तां तां मूर्तिं स्वमंत्रतः ॥ पाद्यार्घ्याचमनीयाद्यैः स्नानवासो
विभूषणैः ॥५२॥ गंधमाल्याक्षतस्रग्भिर्दीपधूपोपहारकैः ॥ सांगं संपूज्य विधिवत्स्तवैः स्तुत्वा नमेद्धरिं ॥५३॥ आत्मानं तन्म
यं ध्यायन्मूर्तिं संपूजयेद्धरेः ॥ शेषामादाय शिरसा स्वधाम्न्युद्वास्य सत्कृतं ५४ एवमग्न्यर्कतोयादावतिथौ हृदये च यः ॥
यजतीश्वरमात्मानमचिरान्मुच्यते हि सः ॥५५॥ इ श्री ग ते हा रा ए द स्क त्व यो यः २

अक्षतास्तिलकालंकारेन तु पूजायां नाक्षतैरर्चयेद्विष्णुं न केतक्या महेश्वरमिति निषेधात् उपहारो नैवेद्यं ॥५३॥ शेषां निर्माल्यं स्वधाम्नि स्व
स्थाने देवं हृदि मूर्तिकरंडके उद्वास्य स्थापयित्वा पूजाविधिं समापयेदिति शेषः ॥५४॥ तांत्रिकं कर्मयोगमुपसंहरति ॥ स्वमिति ॥५५॥
इ श्री ग ते का श धे ती ध्या ॥३॥ राम ॥ राम राम

राम १४

मनु=४

चतुर्थेवतारे हरुक्मस्योद्धरमुक्तवान् जयंतीनंदनो नाम्ना द्रुमिलो नवसप्तमः॥२॥ मत्यभिमतयात्मन इत्यनेनात्मनः प्रियमवतारज्ञान मपदिष्टंतत्तथा सर्वैः स्तुत्वान मे हरिमित्युक्तेर्गुणावकर्मज्ञानं च योपदिष्टं॥ अत: २४ तियानियानीतिकर्त्ताकरिष्यतित्वयादृष्टानित्कालत्रयसंबंधिसकलावतारगुणकर्माणि कथयितुमशक्यासंदेह पतस्तुकानि चिल्कथयिष्यामीत्याह योवाइत्यादिना अनुक्रमिष्यन्नगणयितुमिच्छतियः बालानामिव बुद्धिर्यस्य समंदमतिः कालेन महताको पिमहामतिः रजांसि गणयेदपि अखिलशक्तिधाम्नः सर्वशक्त्याश्रयस्य भगवतो गुणांस्तु नैव गणयेत् तथा च श्रुतिः विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसीत्यादि २ तत्रा दौ पुरुषावतारमाह॥ भूतैरिति यदा स्वसृष्टैः भूतैर्विराजं ब्रह्मांडं पुरं निर्मायत स्मिन्स्वांशेन जीवेनयदा प्रविष्टः ननु भोक्तृत्वेन शमह

राजोवाच यानियानीह कर्माणि यैर्यैः स्वच्छंदजन्मभिः चक्रे करोति कर्त्ता वा हरिस्तानि ब्रुवंतु नः १ द्रुमिल उवाच यो वा अनंतस्य गुणाननंताननुक्रमिष्यन्स तु बालबुद्धिः रजांसि भूमेर्गणयेत्कथंचित्कालेन नैवाखिलशक्तिधाम्नः २ भूतैर्यदा पंचभिरात्मसृष्टैः पुरं विराजं विरचय्य तस्मिन् स्वांशेन विष्टः पुरुषाभिधानमवाप नारायण आदिदेवः ३ यत्काय एष भुवनत्रयसन्निवेशो यस्येंद्रियैस्तनुभृतामुभयेंद्रियाणि ज्ञानं स्वतः श्वसनतो बलमोज ईहा सत्वादिभिः स्थितिलयोद्भव आदिकर्त्ता ४ आदावभूच्छतधृती रजसास्य सर्गे विष्णुः स्थितौ क्रतुपतिर्द्विजधर्मसेतुः रुद्रोप्ययाय तमसा पुरुषः स आद्य इत्युद्भवस्थितिलयाः सततं प्रजासु ५ श्रीरस्तु शुभमस्तु॥

तद्गुणयस्य जीवस्य तत्र भोक्तृत्वात् ३ अस्यगुणकर्माण्याह यत्काय इति यस्याधिष्ठेयः कायएषः काय इति सप्तमी वा तनुभृतां सम्बंधीनि जीवानां तान्युभयेंद्रियाणि यस्य स्वतः स्वरूपभूतात्सत्वात्तनुभृतां ज्ञानं यस्य स्वतः सिद्धात्तानि इति वा यस्य श्वसनतः प्राणात्बलं देहपाटवं ओजः इंद्रियपाटवं ईहा क्रियाय स्य सत्वादिभिः स्थितिलयोद्भवे आदिकर्त्ता आदिकर्त्तेत्यनेन तत्सूर्व केकर्तृत्वमपि सूचितं ४ तदेवं गुणावतारद्वारा च चराचरस्य सृष्ट्यादि कर्तृत्वमाह आदाविति यस्य तिभ्रगुणाः यस्य रजसा अस्य जगतः सर्गे कार्ये शतधृतिर्ब्रह्मा अभूत स्थितौ च विष्णुः य स्य सत्वेनेति शेषः क्रतुपतिः त स्य फलदाता द्विजातीनां तद्धर्माणां च सेतुः पालकश्चेत्यर्थः यस्य तमसा अस्याप्ययाय

मि=४

धर्मस्य भार्यायां दक्षदुहितरि मूर्त्तिसंज्ञायां नारायणो नर इति मूर्त्तिद्वयेनाजनिष्ट जातः तच्चरितमाह। नैष्कर्म्यमात्मस्वरूपं लक्ष्यते
येन तत्कर्म्म च कर्म्माणि हित्वा रूपं वा उवाच नारदादिभ्यः स्वयं च चार च योद्यापि चास्ते ऋषिवर्य्यैर्निषेविताङ्घ्रीयस्य सः ६ भग
वदवतारत्वद्योतकं परमोपशमं दर्शयितुमितिहासमाह इन्द्र इति शंभिः धाम स्थानं तपसा ग्रहीतुमिच्छतीति विशंक्य तपोनाशाय का
मं सपरिवारं प्रेषयामास स च कामः बदरीभिरुपाख्यायते यः ततः स्वाश्रमं अप्सरोगणादिभिः सह गत्वा स्त्रीणां प्रेक्षणान्येवइषव
एवबाणास्तैः न तस्य महिमानं जानाति। अतन्महिज्ञः अक्रमं अपराधं प्रहस्य हे धीर इति विस्मयो गर्वः तद्रहितः एजमानान् त्रास
भियाकम्पमानान् भो विभो मदन मरुत हे देववध्वः मा भैष्ट बलिं आतिथ्यं तान्प्रार्थयते इमं मम स्थानं मा अशून्यं आतिथ्यभावेन शून्यप्रायः

धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर ऋषिप्रवरः प्रशांतः नैष्कर्म्यलक्षणमुवाच चचार कर्म योद्या
पि चास्त ऋषिवर्य्यनिषेविताङ्घ्रिः ६ इंद्रो विशंक्य मम धाम जिघृक्षतीति कामं न्ययुंक्त सगणं स बदर्युपा
ख्यं गत्वाप्सरोगणवसंतसुमंदवातैः स्त्रीप्रेक्षणेषुभिरविध्यदतन्महिज्ञः ७ विज्ञाय शक्रकृतमक्रममादिदेवः
प्राह प्रहस्य गतविस्मय एजमानान् मा भैष्ट भो मदन मारुत देववध्वो गृह्णीत नो बलिमशून्यमिमं कुरुध्वं ८
इत्थं ब्रुवत्यभयदे नरदेव देवाः सव्रीडनम्रशिरसः सघृणं तमूचुः नैतद्विभो त्वयि परे विकृते विचित्रं स्वाराम
धीरनिकरानतपादपद्मे ९

स्यादित्यर्थः ८ हे नरदेव अभयदे श्रीनारायणे इत्थं ब्रुवति सति देवाः कामादयः सव्रीडा अतिनम्राणि शिरांसि येषां ते लज्जा
भरेणैवावनतशिरस्का इत्यर्थः सघृणं यथा भवति कृपां जनयंत इत्यर्थः कृपायुक्तमिति वा मायातः परे अतो विकृते स्वारा
माश्च ते धीराश्च तेषां निकरैः आनतं पादपद्मं यस्य तस्मिन् ९ त्वयि एतत् अस्मत्क्षोभाननुकंपादि न चित्रं अस्माकं चापराधाचर
णं स्वभावत्वान्न चित्रमित्यहुः त्वामिति॥ श्री श्री श्री श्री श्री श्री श्री श्री॥

सेव=१

त्वां सेवतां स्वमानानां जनानां सुरैरिंद्रादिभिः कृता अंतराया विघ्ना भवंति कस्मादित्यत आहुः स्वौक इति स्वस्थानं स्वर्गमतिक्रम्य परमं त
व स्थानं व्रजतां नान्यस्य त्वामसेवमानस्य कुतः बर्हिषि यज्ञे स्वभागान् पुरोडाशादीन् बलीन् करान् स्वयिकं च राजेंद्रादिभ्यो ददतः प्र
यच्छतः तर्हि किं मद्भक्तो विघ्नैर्भ्रश्यति नेत्याहुः धत्ते इति यदीति निश्चये यतस्त्वं सर्वसुराधीश्वरोऽवितारक्षकः अतो सौ विघ्नानां
मूर्ध्नि पदं मे घ्रिं धत्ते कुतः पुनः त्वयि विघ्नशंकेति भावः १० तु रमक्तानां तु केवलं तपश्चरतां दुर्गतिः अस्माकं वा वशं याति
क्रोधस्य वा तत्रास्मद्वशाः कामोपभोगमपि तावद्दत्तु भवंति क्रोधस्य वशाः पुनरतिमंदा इत्याहुः क्षुत्तृडिति क्षुत् तृट् च त्रिका

त्वां सेवतां सुरकृता बहवोंतरायाः स्वौको विलंघ्य परमं व्रजतां पदं ते नान्यस्य बर्हिषि बलीन् ददतः स्वभागान्
धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि १० क्षुत्तृट्त्रिकालगुणमारुतजैह्वशैश्नानस्मानपारजलधीनति
तितीर्य केचित् क्रोधस्य याति विफलस्य वशं पदे गोर्मज्जंति दुश्चरतपश्च वृथोत्सृजंति ११ इति प्रगृणतां
तेषां स्त्रियोत्यद्भुतदर्शनाः दर्शयामास शुश्रूषां स्वर्चिताः कुर्वतीर्विभुः १२ श्रीरस्तु ॐमस्तु श्री०

ल गुणाश्च शीतोष्णवर्षाणि मारुतश्च प्राणो वा स्त्रीवाजैहूः जिंह्वा भोगाश्च शैश्नाः उपस्थोपभोगाश्च एतानस्मानपारजल
धिरूपानतितीर्य विलंघ्य गोष्पदे मज्जंति कुतः यतः क्रोधस्य विफलस्य वशं यांति गच्छंति किंच जले मज्जंतो यथा विवशाः
संतो मस्तकारोपितं भारमुत्सृजंति तथा बहु ध्यानमोहाय न च भोगाय शापादिना दुश्चरं तप अस्सृजंति हे भगवन् सर्व
साधनातपाद्यप्यविवेकसाहीनाः [illegible] संसारं न तरंतीति भावः ११ स्त्रियः योगनिर्मिताः स्त्रीः शुश्रूषणं कुर्वतीः स्व
र्चिताः सुष्ठु बालंकृताः तेषां स्वलावण्यपादि दर्पोपशमाय दर्शयामास १२ श्रीरस्तु श्रीरामचंद्राय नमः १

भा० ए० टी०
१९

रूपिणीः हृत्रिमती श्रीरिव ताः स्त्रीर्दृष्ट्वा तासां तु रूपस्यौदार्येण महत्त्वेन हृता श्रीः कांतिर्येषां ते १३ वृध्वं वृणीध्वं एकवर्यं वराकाः क
थं भासा इति चेत्तत्राह सवर्णां समानरूपां नैकाप्यस्मदनुरूपेति चेत् मा भवतु तथापि स्वर्गस्य भूषणरूपां १४ सुरवंदिनः देवभृत्याः
१५ इंद्रायेंद्रं प्रति नारायणबलमूचुः शक्रः तत्रास त्रासं प्राप्तः विस्मितश्चाभूत्तत्र विस्मितश्चासेति वा १६ अन्यानपि वतारांस्त
च्चरितानि चाह ॥

ते देवानुचरा दृष्ट्वा स्त्रियः श्रीरिव रूपिणीः । गंधेन मुमुहुस्तासां रूपौदार्यहतश्रियः १३ तानाह दे
वदेवेशः प्रणतान्प्रहसन्निव । आसामेकतमां वृध्वं सवर्णां स्वर्गभूषिणां १४ ॐमित्यादेशमादाय
नत्वा तं सुरवंदिनः उर्वशीमप्सरः श्रेष्ठां पुरस्कृत्य दिवं ययुः १५ इंद्रायानम्य सदसि शृण्वतां त्रि
दिवौकसां ऊचुर्नारायणबलं शक्रस्तत्रास विस्मितः १६ हंसस्वरूप्यवदद्च्युत आत्मयोगं दत्तः
कुमार ऋषभो भगवान्पिता नः विष्णुः शिवाय जगतां कलयावतीर्णस्तेनाहृता मधुभिदा
श्रुतयो हयास्ये १७ श्रीरामायनमः ॥

हंसस्वरूपीति दत्तः दत्तात्रेयः कुमारः सनकादिः पिता ऋषभ [illegible] भगवान्विष्णुरेव कलयावतीर्णः सन्नात्मयोगमवद
त् तेन विष्णुना हयास्ये हयग्रीवावतारे मधुभिदा सता ततः पातालतः सनातनाः श्रुतयः आहृताः १७ श्रीरामायनमः

१८ संस्तुन्वतः = २

नारसिंहे ४ समुद्रे २

इला पृथिवी ओषधयश्च गुप्ताः क्रौडे वराहावतारे ग्राहात् ऽरुंभेषं प्रमुंचत् मोचयामास एवमादौ यत्रावतारस्तन्नामा स्थितत्र विष्णुः शिवा यज
गतो कूलयावती तीइत्यनुवर्त्तनीयं संस्तुवतः स्तुतिं कुर्वाणान् वृत्र वधनिमित्तात् पापात् तमसि प्रविष्टं पापाभिभूतं इति अर्थः। स्त्रियो जीवपतिधाने
वहस्थिताः तुल्यापदो मोचयत् तमसि प्रविष्टं मोचयामास असुरगृहे पिहिता निरुद्धा या देवस्त्रियस्ताश्च मोचयदेवावतारैः दे
वादीनामभयाय सतामर्थं इति शेषः २९ अंतरे षु मन्वंतरेषु कलाभिर्मूर्तिभिर्भुवनानि अदधात् अपालयत् इमां क्ष्मां ममदात् दद्दौ
हैहयानां कुलस्याप्यये भार्गवरूपोऽग्निः स रामो दाशरथिः सन् सलंकं लंकायां स्थितं सचजयति वर्तमानकाली नो जकारइस्यर्थः २१

गुप्तोऽप्यये मनुरिलौषधयश्च मात्स्ये क्रौडे हतो दितिज उद्धरतांभसः क्ष्मां कौर्मे धृतोऽद्रिरमृतोन्मथने स्वपृष्ठे
ग्राहात्प्रपन्नमिभराजममुंचदार्तं १८ संस्तुन्वतोऽब्धिपतितान् श्रमणानृषींश्च शक्रं च वृत्रवधतस्तमसि प्रवि
ष्टं देवस्त्रियोऽसुरगृहे पिहिता अनाथा जघ्नेऽसुरेंद्रमभयाय सतां नृसिंहे १९ देवासुरे युधि च दैत्यपतीन्सुरा
र्थे हत्वांतरेषु भुवनान्यदधात्कलाभिः भूत्वाथ वामन इमामहरद्बलेः क्ष्मां याच्ञाछलेन समदाददितेः
सुतेभ्यः २० निःक्षत्रियामकृत गां च त्रिसप्तकृत्वो रामस्तु हैहयकुलाप्ययभार्गवाग्निः सोऽब्धिं बबंध
दशवक्त्रमहन्सलंकं सीतापतिर्जयति लोकमलघ्नकीर्तिः २१ भूमेर्भरावतरणाय यदुष्वजन्मा जातः
करिष्यति सुरैरपि दुष्कराणि वादैर्विमोहयति यज्ञकृतोऽतदर्हान् शूद्रान्कलौ क्षितिभुजो न्यहनिष्यदंते २२
एवंविधानि कर्माणि जन्मानि च जगत्पतेः भूरीणि भूरियशसो वर्णितानि महाभुजः २३ इति श्रीभा
गवते एकादशस्कंधे चतुर्थोऽध्यायः ॥ ४ ॥

भाविनं रामकृष्णावतारमाह ॥ भूमेरिति बुद्धावतारमाह वादैरिति अतदर्हान् यज्ञानर्हान् विमोहयति इति बुद्धावतारे कल्क्यव
तारमाह शूद्रानिति न्यहनिष्यति २२ इति भावार्थदीपिकायां चतुर्थोऽध्यायः ॥ ४ ॥ श्रीनारायणाय नमः ॥ कृष्णाय वासुदेवाय नमः ॥

२० टी॰

एवमेभक्तिहीनानांकानिष्ठाकेषुगेषुगे पूजाविधिरितिप्रश्नद्वयस्योत्तरमुच्यते १ त्वांसेवतांसुरकृताबहवोंतरायाइत्य
नेनश्रीहरिभक्ताविघ्नमूर्ध्निपदंदत्वा परांगतिंयांतिअभक्तानांतु विघ्नाभवंतीयुक्तंतर्हितेषांकागतिर्भवतीतिपृच्छ
तिपृच्छतिभगवंतमितिहेआत्मवित्तमाः अविजितात्मनामत एवाशांतकामानांकानिष्ठा किंप्राप्यमित्यर्थः स्वज
नकस्यगुरोर्भगवतोऽनादरात्कुरुद्रोहणादुर्गतिंयांतीतिवक्तुंभगवतःसकाशाद्वर्णाश्रमोत्पत्तिमाहमुखेति
गुणैःसत्वेनविप्रःसत्वरजोभ्यांक्षत्रियःरजस्तमोभ्यांवैश्यःतमसाशूद्रइतिएषांमध्येयेऽशांतास्तेभजंतिएवंज्ञात्वाप्य
वजानंतिआत्मनःप्रभवोजन्मयस्मात्ततद्भजनेकृतघ्नतामप्याहईश्वरमितिस्थानाद्वर्णाश्रमाद्भ्रष्टाः ३ तत्रयेऽज्ञास्तेभ

राजोवाच ॥ भगवंतंहरिंप्रायोनभजंत्यात्मवित्तमाः तेषामशांतकामानांकानिष्ठाविजितात्मनां १ चमसउवा
च ॥ मुखबाहूरुपादेभ्यःपुरुषस्याश्रमैःसह चत्वारोजज्ञिरेवर्णागुणैर्विप्रादयःपृथक् २ यएषांपुरुषंसा
क्षादात्मप्रभवमीश्वरं नभजंत्यवजानंतिस्थानाद्भ्रष्टाःपतंत्यधः ३ दूरेहरिकथाःकेचिद्दूरेचाच्युतकीर्तनाः
स्त्रियःशूद्रादयश्चैवतेनुकंप्याभवादृशां ४ विप्राराजन्यवैश्यौचहरेःप्राप्ताःपदांतिकं श्रौतेनजन्म
नाथापिमुह्यंत्याम्नायवादिनः ५ श्रीरामायनमः कृष्णायनमः विष्णवेनमः ॥ ॥

वाद्यभिधानात्तत्कथाप्राप्त्यभावात्याह दूरइतिदूरेहरिकथाश्रवणंयेषांतेअतएवदूरेचअच्युतकीर्तनंयेषांतेदूरेच्युतकीर्तना
श्चेतिवाततेनबलदुर्विदग्धास्त्वविविक्तस्वात्उपेक्ष्याइत्याशयेनाह विप्रइतिश्रौतेनउपनयनेनजन्मनाउपल
क्षणमेतत् अध्ययनादिना हरेःपदांतिकंतत्सन्निधिसंप्राप्ताअपिमुह्यंतिकर्मफलेषुसज्जंतेकु
तः आम्नायेषुयेवादाअर्थवादाःतेमोहकतयाविद्यंतेयेषांतेतदुक्तं गीतासु ॥ यामिमांपुष्पितांवाचंप्रवदंति
विपश्चितः वेदवादरताःपार्थनान्यदस्तीतिवादिनाभक्तिमार्गेदाढ्यायतेषामोहंप्रकचयन्निंदतिकर्माणी
त्यादिना ५ श्रीरामायनमः १ ॥ ॥ ५ श्रीकृष्णायतुभ्यंनमः ॥ श्रीरस्तु ॥

२० राम

भक्तिमार्गदौर्लभ्याय तेषां मोहप्रपंचयन्निंदंति कर्मण्येत्यादिना अकोविदाः यथा बंधकं न भवति तथा कर्तुमज्ञाः स्वाभिज्ञान् एवं मन्यंते यतः स्तब्धा अनम्राः स्तब्धत्वे हेतुः मूर्खा अपि पंडिता वयमिति मानवंतः अतः स्तुतिः ॥ अपाम सोमममृता अभूम अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति ॥ यत्र नोष्णं च न शीतं स्यात् न ग्लानिर् नाप्यरातय इत्यादिकया ययामाध्व्यागिरोत्सुकाः संतो मूढास्तदा चाटुकान् अप्रसारोभिर्विचरिष्याम इत्यादिप्रियाणि आशास्यान्वदंति ॥ ६ ॥ किंच तेषां कर्माभिनिवेशात्कामक्रोधदंभादयो वर्धंत इत्याह त्रयेण रजसेति ॥ घोराः अभिचारादिसंकल्पा

कर्मण्यकोविदाः स्तब्धा मूर्खाः पंडितमानिनः ॥ वदंति चाटुकान्मूढा यया माध्व्या गिरोत्सुकाः ॥ ६ ॥ रजसा घोरसंकल्पाः कामुका अहिमन्यवः ॥ दांभिका मानिनः पापा विहसंत्यच्युतप्रियान् ॥ ७ ॥ वदंति तेन्योन्यमुपासितस्त्रियो गृहेषु मैथुन्यपरेषु चाशिषः ॥ यजंत्यसृष्टान्नविधानदक्षिणं वृत्त्यै परं घ्नंति पशूनतद्विदः ॥ ८ ॥ श्रिया विभूत्याभिजनेन विद्यया त्यागेन रूपेण बलेन कर्मणा ॥ जातस्मयेनांधधियः सहेश्वरान्सतोवमन्यंति हरिप्रियान्खलाः ॥ ९ ॥ राम ॥

येषां ते अहिवन्मन्युर्येषां ते ॥ ७ ॥ कामुकत्वं प्रपंचयन्निदंतीति ॥ उपासिताः स्त्रियो यैः नतु हरिर् गुरुः ते मैथुन्यं मिथुनस्तत्त्वमेव परं न त्वातिथ्यादि ये षु गृहेषु तेषु आशिषो वदंति ॥ इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथं ॥ इदमस्तीदमपि मे भविष्यति पुनर्धनमित्याशिषः ॥ दांभिकत्वं प्रपंचयति यजंतीति ॥ असृष्टान्नविधानदक्षिणं न सृष्टान्न संपादिताः अन्नविधानदक्षिणा यत्र तथा यजंति तथा चरद्यै जीविकार्थं परं केवलं पशून्घ्नंति अत द्विदः हिंसादोषानभिज्ञाः ॥ ८ ॥ मानित्वं प्रपंचयति श्रियेति ॥ श्रिया धनादिसंपदा विभूत्या ऐश्वर्येण अस्यादिना जातो यः स्मयो गर्वः तेन अंधा धीर्येषां ते

श्रीभागवतटीकायांस्कं ११ ॥ ३८ ॥

न मांसभक्षणे दोषो न मद्ये न च मैथुने। प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला।

श्री भा॰ टी॰ ए॰ २१

स्कु

किंच एवं वर्तमानास्ते वेदनत्वार्थं स्फुटमपि न जानंतीत्याह सर्वेष्विति ॥ केन रूपेणावस्थितं तदाह आत्मानमीश्वरं आत्मतयाईश्वरतया चावस्थितं एवमप्यसंगतमाह यथावत्पुरुषार्थतामाह अभीष्टं स्फुटत्वमाह वेदोपगीतं चेति न कुतः यतो मनोरथानां व्यवायामिषमद्यसेवादिविषयाणां वार्तया प्रवदंति ॥१०॥ ननु व्यवायादीनामपि श्रुतौ भार्यामुपेयात् ऋतुशेषं भक्षयेदित्यादिना विहितत्वात्किमेवं निंद्यते अत आह लोक इति व्यवायः स्त्रीसंभोगः नित्याः रागत एव नित्यप्राप्ताः जंतोः प्राणिमात्रस्य अतस्तत्र तासु चोदना विधिर्नास्ति ॥ ननु ऋतावुपेयादित्यादिविधिर्दर्शितः सत्यं न त्वयमपूर्वो विधिः रागतः प्राप्तत्वात् किंतु नियमविधिरूपेण मार्गेण मध्यानुज्ञामात्रं क्रियते तदाह व्यवस्थितिरिति ॥ ननु व्यवायादिषु केः विवाहयज्ञसुराग्रहैः विवाहविषय एव व्यवायः कार्यः यज्ञ एवामिषसेवा सौत्रामण्यां सुराग्रहान्गृह्णातीति श्रुतेः सत्रैव मद्यसेवेति नियमः क्रियते ॥ ननु च नियमपक्षेप्यावश्यकत्वात्तन्निंदायुक्ता अत आह आसु निवृत्तिरिष्टेति अयं भावः नायं नियमविधिर

सर्वेषु शश्वत्तनुभृत्स्ववस्थितं यथा खमात्मानमभीष्टमीश्वरं । वेदोपगीतं च न शृण्वतेऽबुधा मनोरथानां प्रवदंति वार्तया ॥ १० ॥
लोके व्यवायामिषमद्यसेवा नित्यास्तु जंतोर्न हि तत्र चोदना । व्यवस्थितिस्तेषु विवाहयज्ञसुराग्रहैरासु निवृत्तिरिष्टा ॥ ११ ॥

पि नित्यप्राप्तत्वात् अतो निवृत्तिः परिसंख्यैव आसु व्यवायामिषमद्यसेवासु विधिरिष्टः कथं तर्हि व्यवस्थितिरित्युक्तं उच्यते न तावत्परिसंख्याविधिना श्रुत्या निवृत्तिरुच्यते तथा सति स्वार्थत्यागः परार्थकल्पना प्राप्तबाधश्चेति दोषत्रयं स्यात् अतः क्वचित्प्राप्यतेप्यर्थस्य प्रापणेन मनर्थकमित्यपूर्वविधिद्वारान्यनिवृत्तिः फलतो भवति यथा इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते इत्यत्र रशनालिंगेन गर्दभाभिधायिनीरशनाग्रहणं प्राप्तमेव मंत्रस्यापूर्वविधिद्वारा परिसंख्योच्यते ॥ यथोक्तं तंत्रवार्तिके अप्राप्तविधिरेवायमतो मंत्रस्य निश्चितः ॥ परिसंख्या फले नोक्ता न विशेषः पुनः श्रुतेरिति क्वचित्तु रागतो नित्यप्राप्तस्याप्राप्तांशपूरणलक्षणस्य नियमफलस्याप्यभावान्नियमविधिद्वारा फलतः परिसंख्या भवति यथा पंच पंचनखा भक्ष्या इति ॥ तथा रागतो नित्यवत्प्राप्तस्य व्यवायादेर्विवाहादिनियमेनान्यत्र ज्ञाद्वारा परिसंख्येति ॥ ननु यद्यप्यत्र ज्ञाद्वारेण तद्भवेत्तर्हि ॥ ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति ॥ घोरायां भ्रूणहत्यायां पच्यते नात्र संशय इत्यादिदोषश्रवणं न स्यात् नैष दोषः मनसि कामे सत्यपि तस्यामरुच्या द्वेषादिना वा नाम उपगच्छतो दोषश्रवणोपपत्तेरिति सर्वमनवद्यं दोषश्रुतिस्त्वेवं ज्ञातव्यमित्यर्थः ॥११॥

२१

भूरा

तदेवं व्यवायादिमनोरथ्याकुलितत्वादभीष्टमात्मानं न स्मरंतीत्युक्तं इदानीं धनस्यापि धर्मद्वारा परमात्मप्रापकस्य इष्टोपभोगार्थं विनियो
गान्नात्मनो ज्ञानं गंधपीत्याह धनं चेति ॥ धर्म एव एकः फलं यस्य तत् कुतः यतो धर्मात् सविज्ञानम् अपरोक्षज्ञानसहितं दृष्टं परोक्षज्ञानं भव
ति कथंभूतं अनुप्रशांति अनु अनंतरमेव परम् शांतिर्निर्वाणलक्षणा यस्य तत् ॥ एवंभूतं धनं गृहेषु देहार्थं युंजंति ॥ १२ ॥ किंच यद्यस्य
यापि व्यवायाद्याभ्यनुज्ञानं यथेष्टाप्रवृत्त्यर्थे वेत्याह य दिति ॥ यद्यस्मात् सुरायाः घ्राणभक्षः अवघ्राणं स एव विहितः न पानं तथा
पशोरप्यालभनमेव विहितं न तु हिंसा अयमर्थः ॥ देवतोद्देशेन यत्परुद्धनं तदालभनं वायव्यं श्वेतमजमालभेतेत्यादिश्रुतेः न तु हिंसा

धनं च धर्मैकफलं यतो वै ज्ञानं सविज्ञानमनुप्रशांति। गृहेषु युंजंति कलेवरस्य मृत्युं न पश्यंति दुरंतवीर्यं ॥ १२ ॥ यद्घ्रा
णभक्षो विहितः सुरायास्तथा पशोरालभनं न हिंसा। एवं व्यवायः प्रजया न रत्या इमं विशुद्धं न विदुः स्वधर्मं ॥ १३ ॥
ये त्वनेवंविदोऽसंतः स्तब्धाः सदभिमानिनः ॥ पशून्द्रुह्यंति विस्रब्धाः प्रेत्य खादंति ते च तान् ॥ १४ ॥ राम ॥

मनोरथ्या दिनः

या वेदविहिता हिंसा सा न हिंसेति कीर्त्यते इति वचनात् भक्षणोद्देशेन तु क्रियमाणा लौकिकहननवद्धिंसैव ॥ अत्र त्वालभनमेव विहितं न तु
हिंसा अतो न यथेष्टभक्षणाभ्यनुज्ञेत्यर्थः व्यवायोऽपि प्रजयानिमित्तभूतया न तु रत्यै अतो मनोरथ्यादिनः इमं विशुद्धं स्वधर्मं न विदुरिति ॥ १३ ॥
एवं भगवत्पराङ्मुखानां बहुदोषतां प्रपंच्य तन्निष्ठं प्रपंचयति पंचभिर्ये इति ॥ अनेवंविदः न एवं विदंति धर्मं विदंति ये ते विस्रब्धाः निःशंकाः
अनेन मनोरथोऽभविष्यतीति विश्वस्तास्तावत्तदानींतनपोषणेन दातैः पशुभिर्विश्वस्ताः ते च पशवः प्रेत्य अमुत्र तान्खादंति ॥ मांसभक्षयिताऽमुत्र
यस्य मांसमिहाद्म्यहं ॥ एतन्मांसस्य मांसत्वं प्रवदंति मनीषिण इति वचनात् ॥ १४

अभिचारादिनाद्विषंतः मृतके देहे सानुबंधे पुत्रादिसहिते ॥ १५ ॥ अज्ञास्तत्त्वज्ञैरनुकंपितास्तरंतितत्त्वज्ञास्तु स्वतः ये तु नात्यंतमज्ञाः न च
तत्त्वज्ञाः ते तु तरालवर्तिनः पतंतीत्याह य इति ॥ केवल्यं तत्त्वज्ञानमसंप्राप्ताः तत्र हेतुः त्रिवर्गप्रधानाः अत एव णिकाः उपशांतिविनाशरहिताः देहा
दिस्थैर्यबुद्धयो वा स्वयमेवात्मानं घातयंति ॥ १६ ॥ तदाह एत इति आत्मघ्नः आत्मापह्नवकर्तारः अज्ञाने कर्मणि ॥ तथा च श्रुतिः ॥ असूर्या नाम

द्विषंतः परकायेषु स्वात्मानं हरिमीश्वरं ॥ मृतके सानुबंधेस्मिन्बद्धस्नेहाः पतंत्यधः ॥ १५ ॥ ये कैवल्यमसंप्राप्ता ये चा
तीताश्च मूढतां ॥ त्रैवर्गिका ह्यक्षणिका आत्मानं घातयंति ते ॥ १६ ॥ एत आत्महनोऽशांता अज्ञाने ज्ञानमानिनः ॥ सी
दंत्यकृतकृत्या वै कालध्वस्तमनोरथाः ॥ १७ ॥ हित्वात्यायासरचिता गृहापत्यसुहृच्छ्रियः ॥ तमो विशंत्यनिच्छंतो वासुदे
वपराङ्मुखाः ॥ १८ ॥ रा वा कस्मिन्काले स भगवान्किंवर्णः कीदृशो नृभिः ॥ नाम्ना वा केन विधिना पूज्यते तदिहोच्य
तां १९ क भा न वा कृतं त्रेता द्वापरं च कलिरित्येषु केशवः ॥ नानावर्णाभिधाकारो नानैव विधिनेज्यते ॥ २०॥
कृते शुक्लश्चतुर्बाहुर्जटिलो वल्कलांबरः ॥ कृष्णाजिनोपवीताक्षान्बिभ्रद्दंडकमंडलू २१ राम

तेलोकास्तेऽधेन तमसावृताः ॥ तांस्ते प्रेत्याभिगच्छंति ये के चात्महनो जना इति ॥ १७ ॥ यावद्गृहापत्यसुहृच्छ्रियस्ता हित्वा ॥ १८ ॥ न देवं भगवद्भक्तिरेव
कर्तव्येति ॥ स्थिते तत्र विशेषं पृच्छति कस्मिन्काल इति किंवर्णः कीदृग्वर्णवान् कीदृशः कीदृशाकारः केन च नाम्ना केन वा विधिना ॥ १९ ॥ एव
कृतादिकालेषु नानाप्रकारा वर्णाभिधाकारा यस्य सः नानैव विधिना विविधेनैव मार्गेण ॥ २० ॥ तदेव वर्णादिचतुष्टयमाह कृत इत्यादिना कृष्णाजि

तपसाध्यानेन ॥ २२ ॥ त्रिगुणादीशांगभूतामेदेलायस्यसः यज्ञमूर्तिः हिरण्यकेशः पिशंगकेशः ॥ २४ ॥ त्रय्याविद्ययावेदत्रयोक्तकर्मभिः
२५ ॥ पृश्निगर्भः तस्याः पुत्रः वृषाकपिः स्मृतः सन्वर्षतिकामान् आकंपयतिक्लेशानिति ॥ तथाजयत्येवसर्वदेतिजयंतः ॥ २६ ॥ श्यामः अ
तसीपुष्पसंकाशः निजानिचक्रादीन्यायुधानियस्यसः श्रीवत्सोनामवक्षसोदक्षिणभागेरोम्णांप्रदक्षिणावर्तः सआदिर्येषांकरच

मनुष्यास्तुतदाशांतानिर्वैराःसुहृदःसमाः ॥ यजंतितपसादेवंशमेनचदमेनच ॥ २२ ॥ हंसःसुपर्णोवैकुंठोधर्मोयोगे
श्वरोमलः ॥ ईश्वरःपुरुषोव्यक्तःपरमात्मेतिगीयते ॥ २३ ॥ त्रेतायांरक्तवर्णोसौचतुर्बाहुस्त्रिमेखलः ॥ हिरण्यके
शस्त्रय्यात्मास्रुक्स्रुवाद्युपलक्षणः ॥ २४ ॥ तंतदामनुजादेवंसर्वदेवमयंहरिं ॥ यजंतिविद्ययात्रय्याधर्मिष्ठाब्रह्मवा
दिनः ॥ २५ ॥ विष्णुर्यज्ञःपृश्निगर्भःसर्वदेवउरुक्रमः ॥ वृषाकपिर्जयंतश्चउरुगायइतीर्यते ॥ २६ ॥ द्वापरेभगवान्श्या
मःपीतवासानिजायुधः ॥ श्रीवत्सादिभिरंकैश्चलक्षणैरुपलक्षितः ॥ २७ ॥ तंतदापुरुषंमर्त्यामहाराजोपल
क्षणं ॥ यजंतिवेदतंत्राभ्यांपरंजिज्ञासवोनृप ॥ २८ ॥ नमस्तेवासुदेवायनमःसंकर्षणायच ॥ प्रद्युम्नायानिरु
द्धायतुभ्यंभगवतेनमः ॥ २९ ॥ नारायणायऋषयेपुरुषायमहात्मने ॥ विश्वेश्वरायविश्वायसर्वभूतात्मनेनमः ॥ ३० ॥
इतिद्वापरउर्वीशस्तुवंतिजगदीश्वरं ॥ नानातंत्रविधानेनकलावपियथाशृणु ॥ ३१ ॥ सम ॥

वृणाद्दिगतपद्मादीनांतैरंकैः अंकितैः चिह्नैर्लक्षणैर्बाह्यैः कौस्तुभादिभिः ॥ २७ ॥ महाराजोपलक्षणंछत्रचामरादियुक्तंवेदतंत्राभ्यांवै
दिकेनागमिकेनचमार्गेणयजंतिपरंईश्वरंज्ञातुमिच्छवः ॥ २८ ॥ नामान्याहनमस्तइति ॥ २९ ॥ नानातंत्रविधानेनेतिकलौतंत्रमार्गस्यप्राधा
न्यंदर्शयति ॥ ३१

श्री
भा॰
ए॰
२३

कृष्णं तां व्यावर्णयति त्विषाकांत्या अकृष्णं इंद्रनीलमणिवदुज्वलं यद्वा त्विषाकृष्णं श्रीकृष्णावतारं अनेन कलौ कृष्णावतारस्य प्राधान्यं दर्शयति
अंगानि हृदयादीनि उपांगानि कौस्तुभादीनि अस्त्राणि सुदर्शनादीनि पार्षदाः सुनंदादयः तत्सहितं यज्ञैरर्चनैः संकीर्तनं नामोच्चारणं स्तुतिः
श्च तत्प्रधानैः सुमेधसो विवेकिनः ॥ ३२ ॥ स्तुतिमाह ध्येयमिति ॥ हे प्रणतपाल हे महापुरुष ते चरणारविंदं वंदे कथंभूतं ध्येयं ध्यानयोग्यं
सदेति सर्वत्र संबध्यते ॥ ध्येयत्वे हेतवः इंद्रियकुटुंबादिभिः यः परिभवस्तिरस्कारः तं हंतीति तथा तत् किंच अभीष्टदोहं मनोरथपू
रकं ॥ किंच तीर्थास्पदं गंगाया आश्रयत्वेन परमपावनं शिवविरिंचाभ्यां नुतं स्तुतं महत्तमं ननु तौ हता(र्था)वेव किमर्थं ताभ्यां नुतं तत्राह श

कृष्णवर्णं त्विषाकृष्णं सांगोपांगास्त्रपार्षदं ॥ यज्ञैः संकीर्तनप्रायैर्यजंति हि सुमेधसः ॥ ३२ ॥ ध्येयं सदा परिभवघ्नमभीष्टदो
हं तीर्थास्पदं शिवविरिंचनुतं शरण्यं ॥ भृत्यार्तिहं प्रणतपाल भवाब्धिपोतं वंदे महापुरुष ते चरणारविंदं ॥ ३३ ॥ त्यक्त्वा
सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्मिष्ठ आर्यवचसा यदगादरण्यं ॥ मायामृगं दयितयेप्सितमन्वधावद्वंदे महापुरु
ष ते चरणारविंदं ॥ ३४ ॥ एवं युगानुरूपाभ्यां भगवान्युगवर्तिभिः ॥ मनुजैरिज्यते राजन् श्रेयसामीश्वरो हरिः ॥ ३५ ॥

रण्यं आश्रययोग्यं स्वरूपात्मकमित्यर्थः तद्भिन्नस्यादिस्तु तत्प्राकृतस्य कथं गोचरः स्यात् भृत्यार्तिहं भृत्यस्य अपि भृत्यमात्रस्यार्तिं हंतीति न केव
लं मार्गं उत्क्रांतिमात्रेतं नयति किंतु भवाब्धिपोतं संसारार्णवतारकं च ॥ ३३ ॥ इदानीं स्वयमेवाप्तकामत्वान्निरपेक्षस्य भक्तार्थं च सर्वपि स्वतां दर्शयन् श्रीराम
चंद्रं स्तौति त्यक्त्वेति ॥ अन्यैः सुदुस्त्यजा या सुरैरीप्सिता राज्यलक्ष्मीस्तां त्यक्त्वा यदगादिति यदुत्यर्थः यो अरण्यमगात् किं राज्यवैकल्यदर्शनेन धर्मिष्ठः
अतः आर्यस्य गुरोर्दशरथस्य वचसा किंच वैराज्यं त्यक्त्वापि भक्तवात्सल्येन दयितया सीतयाईप्सितं मायामृगं स्वर्णाकारं योन्वधावत् तस्य भ
गवतश्चरणारविंदं वंदे यद्वा हे धर्मिष्ठेति संबोधनं तथा अतिवत्सलत्वादार्यपदेन संधिर्न भवति तथा यदगादिति चरणारविंदमेवोच्यते यत् मायाः

गु ग्र

राम
२३

एतेषु चतुर्ष्वपि युगेषु कलिरेव श्रेष्ठ इत्याह कलिमिति ॥ गुणज्ञाः कलेर्गुणं जानंतीति ये ते ननु दोषाणां बहुत्वात्कथं सभाजयंतीति तत्राह सारभागिनः गुणग्राहिणः कोसौ गुणः तमाह यत्रेति ॥ तदुक्तं ॥ ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ॥ यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवमिति ॥ ३६ ॥ तस्मात्कलौ अतोस्मात्संकीर्तनात्परमोन्यो लाभो नास्तीति यतः संकीर्तनात् ॥ ३७ ॥ किंच कृतादिष्विति ॥ ४० ॥ अमलाशयाः संतः प्रायः प्रायशो भगवति रक्ता भवंति ॥ ४३ ॥ भक्तस्य विधिनिषेधनिवृत्तेः कुत इत्यत आह देवर्षीति ॥ आप्ताः पोष्याः कुटुंबि

कलिं सभाजयंत्यार्या गुणज्ञाः सारभागिनः ॥ यत्र संकीर्तनेनैव सर्वः स्वार्थोऽभिलभ्यते ॥ ३६ ॥ न ह्यतः परमो लाभो देहिनां भ्राम्यतामिह ॥ यतो विंदेत परमां शांतिं नश्यति संसृतिः ॥ ३७ ॥ घोरे कलियुगे प्राप्ते सर्वधर्मविवर्जिते ॥ वासुदेवपरा मर्त्यास्ते कृतार्था न संशयः ॥ ३८ ॥ ते सभाग्या मनुष्येषु भवंति नृप निश्चितं ॥ स्मरंति स्मारयंति ये हरेर्नाम कलौ युगे ॥ ३९ ॥ कृतादिषु प्रजा राजन्कलाविच्छंति संभवं ॥ कलौ खलु भविष्यंति नारायणपरायणाः ॥ ४० ॥ क्वचित्क्वचिन्महाराज द्रविडेषु च भूरिशः ॥ ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी ॥ ४१ ॥ कावेरी च महापुण्या प्रतीची च महानदी ॥ ये पिबंति जलं तासां मनुजा मनुजेश्वर ॥ ४२ ॥ प्रायो भक्ता भगवति वासुदेवेऽमलाशयाः ॥ ४३ ॥ देवर्षिभूताप्तनृणां पितॄणां न किंकरो नायमृणी च राजन् ॥ सर्वात्मना यः शरणं शरण्यं गतो मुकुंदं परिहृत्य कर्तं ॥ ४४ ॥ राम ॥ राम ॥

नः इतरे देवादयः पंचयज्ञदेवताः एतेषां अभक्तः ऋणी भवति नैवमेषां किंकरः तदर्थं नित्यपंचयज्ञादिकर्ता ॥ तथा च स्मृतिः ॥ हीनजातिं परिक्षीणमृणार्थं कर्म कारयेदिति ॥ अयं तु न तथा कोसौ योसौ सर्वभावेन श्रीमुकुंदं शरणं गतः कृत्यं कृत्यं परिहृत्य ॥ यद्वा कर्तं भेदं परिहृत्य ज्ञानी छेदने इत्यस्मात् ॥ वासुदेवः सर्वमिति बुद्ध्येत्यर्थः ॥ ४४ ॥ ॥ राम ॥ ॥ राम ॥

कृतार्थो

श्री
भा टी
ए
२५

विहितेन कर्मणा निवृत्तिमुक्त्वा निषेधनिमित्तप्रायश्चित्तनिवृत्तिमाह स्वपादमूलमिति ॥ त्यक्तः अन्यस्मिन्देहादौ देवतान्तरे वा भावो येन अतएव
तस्य विकर्मणि प्रवृत्तिर्न संभवति ॥ यच्च कथंचित्प्रमादादिना उत्पतितं भवेत्तदपि हरिर्धुनोति ॥ ननु यमेनैवमन्येन तत्राह परेशः ॥ ननु च
श्रुतिस्मृती ममैवाज्ञे इति भगवद्वचनात् आज्ञाभंगकं कथं सहेत तत्राह ॥ प्रियस्य ननु नायं पापक्षयार्थं भजते तत्राह हृदि सन्निविष्टः ॥

स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः ॥ विकर्म यच्चोत्पतितं कथंचिद्धुनोति सर्वं हृदि सन्निविष्टः ॥ ४५ ॥
ना द वा ॥ धर्मान्भागवतानित्थं श्रुत्वाथ मिथिलेश्वरः ॥ जायंतेयान्मुनीन्प्रीतः सोपाध्यायो ह्यपूजयत् ॥ ४६ ॥ ततो
ऽन्तर्दधिरे सिद्धाः सर्वलोकस्य पश्यतः ॥ राजा धर्मानुपातिष्ठन्नवाप परमां गतिं ॥ ४७ ॥ त्वमप्येतान्महाभाग धर्मान्भागवतान्
श्रुतान् ॥ आस्थितः श्रद्धया युक्तो निःसंगो यास्यसे परं ॥ ४८ ॥ युवयोः खलु दंपत्योर्यशसा पूरितं जगत् ॥ पुत्रतामगम
द्यद्वां भगवानीश्वरो हरिः ॥ ४९ ॥ दर्शनालिंगनालापैः शयनासनभोजनैः ॥ आत्मा वां पावितः कृष्णे पुत्रस्नेहं प्रकुर्वतोः ॥ ५० ॥

नहि सत्त्वशाक्तिसर्थितामपेक्षते इत्यर्थः ॥ ४५ ॥ जायंतेयान् जयंत्याः पुत्रान् ॥ ४६ ॥ उपातिष्ठन् आतिष्ठन् ॥ ४७ ॥ निःसंगो भूत्वा ॥ ४८ ॥ शास्त्रप्र
क्रियैव यत्तन्नायुवां तु संगत एव कृतार्थौ इत्याह युवयोरिति द्वाभ्यां युवयोः ॥ ४९ ॥ न च सर्वकर्मापेक्षा किं भागवतधर्मैरन्यैश्चापि तु युवयोः सत्त्व
शुद्धिः पादनीया पुत्रोपलालनेनैव भागवतधर्मसर्वस्वनिष्पन्ने इत्याह दर्शनेति कृष्णे पुत्रे इति स्नेहं प्रकुर्वतोर्वां तस्य दर्शनादिभिरात्मा पावि
तः शोधितः ॥ ५० ॥

राम
२५

एतदेव कैमुत्यन्यायेन स्फुटयति वैरेणेति यं शयनासनादौ वैरेणापि ध्यायन्तस्तत्र गतिविलासाद्यैः आकृतधियः तत्तदाकाराधीर्येषां ते तत्साम्यमापुः किं पुनर्व्यक्तं समनुरक्तधियां तत्साम्यं भवतीति ॥५१॥ ननु पुत्रस्नेहस्य मन्मोक्षहेतुत्वं कस्मादिति तत्राह मापत्यबुद्धिमिति ॥ अपत्य इति बुद्धिं माकृथाः अडागमः छान्दसः ॥५२॥ ननु कथमीश्वरो मानुषः स्यात् कथं वा तस्य विश्वस्तस्यादिकृत्यैः पूतनाशोषणादि कर्मी श्वर्यमिव निरूप्यते तत्राह ॥ भूभारासुरराजन्यहन्तवे गुप्तये सतां हन्तव निर्वृत्यै मोक्षाय ॥५३॥ इत्यस्मिन्ने वदे

वैरेण यं नृपतयः शिशुपालपौंड्रसाल्वादयो गतिविलासविलोकनाद्यैः ॥ ध्यायन्त आकृतधियः शयनासनादौ तत्साम्यमापुरनुरक्तधियां पुनः किं ॥५१॥ मापत्यबुद्धिमकृथाः कृष्णे सर्वात्मनीश्वरे ॥ मायामनुष्यभावेन गूढैश्वर्ये परेऽव्यये ॥५२॥ भूभारासुरराजन्यहन्तवे गुप्तये सतां ॥ अवतीर्णस्य निर्वृत्यै यशो लोके वितन्यते ॥५३॥ श्री शु वा एतच्छ्रुत्वा महाभागो वसुदेवोऽतिविस्मितः ॥ देवकी च महाभागा जहतुर्मोहमात्मनः ॥५४॥ इतिहासमिमं पुण्यं धारयेद्यः समाहितः ॥ स विधूयेह शमलं ब्रह्मभूयाय कल्पते ॥५५॥ इ श्री भा ते का श पे जायन्तेयोपाख्याने प अ ध्या ॥५॥ श्री शु वा अथ ब्रह्मात्मजैर्देवैः प्रजेशैरावृतोऽभ्यगात् भवश्च भूतभव्येशो ययौ भूतगणैर्वृतः ॥१॥ राम॥

देशमलं मोहं विधूय ब्रह्मत्वाय कल्पते ॥५५॥ इ श्री भ ते का श पे च ध्यायः ॥ ५ ॥ षष्ठे ब्रह्मादिभिः स्तुत्वा गंतुं विज्ञापितं हरिं ॥ उद्धवः प्रार्थयामास स्वधाम नय मामिति ॥ अतः परमतिविस्तरेणात्मविद्यां निरूपयितुं तत्प्रस्तावमाह अथेति ॥ आत्मजैः सनकादिभिरभ्यगात् द्वारकामिति चतुर्थेनान्वयः ॥१॥

॥राम॥ राम राम

श्री भा० टी० ११ २५

ननु तेषामुपेंद्रादिरूपं भगवंतं नित्यं पश्यतां कोयमतिदिदृक्षाग्रह अत आह वपुषेति ॥ येन वपुषा नरलोकमनोरमः सन् सर्वलोके सुयशो वि-
तेने तदतिसुंदरं वपुर्दिदृक्षवः ॥४॥ व्यचक्षतापश्यन् ॥५॥ स्वर्गोद्यानस्थैर्माल्यैः चित्राणि शृंखलाबंधप्रायाणि पदानि अर्थाश्च तासु या-
भिर्गीर्भिः ॥६॥ बुद्धींद्रियादिभिर्दर्शनादिना प्राणेन च बलेनोत्थानादेर्दंडवत्प्रणिपातेन च न तावद्वयं नमस्कृतवंतः स्मेति विस्मये ॥ यथाहुः

इंद्रो मरुद्भिर्भगवानादित्या वसवोऽश्विनौ ॥ ऋभवोंऽगिरसो रुद्रा विश्वे साध्याश्च देवताः ॥२॥ गंधर्वाप्सरसो नागाः सिद्धचा-
रणगुह्यकाः ॥ ऋषयः पितरश्चैव सविद्याधरकिन्नराः ॥ २ ॥ द्वारकामुपसंजग्मुः सर्वे कृष्णदिदृक्षवः ॥ ३ ॥ वपुषा येन
भगवान्नरलोकमनोरमः ॥ यशो वितेने लोकेषु सर्वलोकमलापहं ॥४॥ तस्यां विभ्राजमानायां समृद्धायां महर्द्धिभिः
व्यचक्षतावितृप्ताक्षाः कृष्णमद्भुतदर्शनं ॥५॥ स्वर्गोद्यानोपगैर्माल्यैः छादयंतो यदूत्तमं ॥ गीर्भिश्चित्रपदार्थाभिस्तु-
ष्टुवुर्जगदीश्वरं ॥६॥ दे ॐ नताः स्म ते नाथ पदारविंदं बुद्धींद्रियप्राणमनोवचोभिः ॥ यच्चिंत्यतेंतर्हृदि भाव-
युक्तैर्मुमुक्षुभिः कर्ममयोरुपाशात् ॥७॥ राम राम राम ॥

दोर्भ्यां पद्भ्यां च जानुभ्यामुरसा शिरसा दृशा ॥ मनसा वचसा चेति प्रणामोऽष्टांग ईरित इति ॥ स्मशब्दोक्तविस्मयाय विशेषणं कर्ममया-
दुरुपाशात् मुमुक्षुभिर्भावयुक्तैरपि यत्केवलमंतर्हृदि चिंत्यते न तु दृश्यते तद्वयं नताः अहो भाग्यमित्यर्थः ॥७॥ राम

नन्नुममापिदृष्टादृष्टकर्मकरणात्कथंत्वत्पदारविंदचिंतनंकर्मपाशान्मुमुक्षुभिःक्रियतेतत्राहुःत्वमिति॥ हेअजितआत्मानमिदानीत
नमिदमल्पंकर्मत्वंव्यक्तंमहदादिप्रपंचंसृजसिपालयसिसंहरसिचतदप्यात्मन्येवनपृथक्दुर्विभाव्यंमनसाप्यन्यैरचिंतितव्यं॥ तद्गुण
स्थःतस्यामायायागुणेषुनियंतृत्वेनस्थितः॥ अथचएतैःकर्मभिर्भवान्नाज्यतेनलिप्यतेअतःयोभवाननवद्यःरागादिरहितःयतःस्वे
आत्मस्वरूपेसुखेअव्यवहितेअनावृतेअभिरतःअनतस्त्वंकर्मकेवत्र्यप्यात्मारामःपरमेश्वरइतिमुमुक्षुभिश्चिंत्यतेइतिभावः॥८॥
नन्वात्मारामस्यकिंकर्मकरणेनअतआहुःशुद्धिरिति॥ हेईड्यऋषभदुराशयानांरागिणांविद्याउपासनाविद्यादिभिस्तथाशुद्धिर्नभ

त्वंमाययात्रिगुणयात्मनिदुर्विभाव्यंव्यक्तंसृजस्यवसिलुंपसितद्गुणस्थः॥ नैतैर्भवानजितकर्मभिरज्यतेवैयःस्वेसु
खेऽव्यवहितेभिरतोनवद्यः॥८॥ शुद्धिर्नृणांनतुतथेड्यदुराशयानांविद्याश्रुताध्ययनदानतपःक्रियाभिः॥ सत्वा
त्मनामृषभतेयशसिप्रवृद्धसच्छ्रद्धयाश्रवणसंभृतयायथास्यात्॥९॥ स्यान्नस्तवांघ्रिरशुभाशयधूमकेतुः
क्षेमाययोमुनिभिरार्द्रहृदोह्यमानः॥ यःसात्वतैःसमविभूतयआत्मवद्भिर्व्यूहेर्चितःसवनशःस्वरतिक्रमाय॥१०॥

वति॥ सत्वात्मनांसतांतेयशसिश्रवणेनसंभृतयापरिपुष्टयाअभिरूढयासच्छ्रद्धयायथास्यात्परमयादानस्यपयशसोवितानायतवे
कर्माचरणमितिभावः॥९॥ हेदेवयशःशुद्धेर्हेतुःअस्माभिस्तुतवांघ्रिरीड्यःअतस्तवांघ्रिर्नोस्माकंअशुभाशयानांविविध
विषयवासनानांधूमकेतुःतद्दाहकःस्यात्कथंभूतःयःक्षेमायमोक्षायमुनिभिःमुमुक्षुभिःप्रेमार्द्रहृदाउह्यमानश्चिंत्यमानः॥ यश्चसा
त्वतैर्भक्तैःसमविभूतयेसमानैश्वर्यायवासुदेवादिव्यूहेर्चितः॥ तेषुकेचिदात्मविद्भिर्धीरैःस्वरतिक्रमायस्वर्गमतिक्रम्यवैकुंठप्राप्तयेस

श्री
भा० टी०
ए०
२६

त्वच्चरणस्य भक्त्या पापानः प्रसिद्ध एव कृतिस्तुवंतः प्रार्थयंते केतुरिति ॥ बलिबंधने त्रिभिर्विक्रमैर्युतः तत्र द्वितीय विक्रमे सत्यलोकांतं तत्तद्व्याप
दंकेतुः अन्युत्थितो विजयध्वज इव तत्संपादयतीति त्रिपतत्पताकः त्रिधापततीति त्रिषु लोकेषु वापततीगंगा पताका यस्य सः तथा सुरदेवचम्वोः
तत्सेनयो र्यो भयाभयकरः साधुषु सुरेषु स्वर्गाय खलेषु असुरेषु इतराय अधोगतये ॥ एवं केतुरूपस्ते पादः भजतां नः अघं पुना
तु शोधयतु अघ्नादिति पाठे भजतां नः इति कर्मणि षष्ठी अघाद्भजतोऽस्मान्पुनात्विति ॥ तथा च श्रुतिः ॥ चरणं पवित्रं विततं पुराणं येन पू

नु

केतुस्त्रिविक्रमयुतस्त्रिपतत्पताको यस्ते भयाभयकरोऽसुरदेवचम्वोः ॥ स्वर्गाय साधुषु खलेष्वितराय भूमन्पादः
पुनातु भगवन्भजतामघं नः ॥११॥ यस्मिंस्त्यते प्रयतपाणिभिरध्वराग्नौ त्रय्या निरुक्तविधिनेश हविर्गृहीत्वा ॥ अ
ध्यात्मयोग उत योगिभिरात्ममायां जिज्ञासुभिः परमभागवतैः परीष्टः ॥१२॥

राम

तस्तरन्ति दुष्कृतानि ॥ तेन पवित्रेण शुद्धेन पूता अतिपाप्मानमरातिं तरेम ॥ लोकस्य द्वारमर्चिमत्पवित्रं ज्योतिष्मद्भ्राजमानं महस्वत ॥ अमृ
तस्य धारा बहुधा दोहमानां चरणं नो लोकेषु सुगंधिनां दधात्विति ॥११॥ किंच प्रयतपाणिभिः संयतहस्तैर्हविर्गृहीत्वा अध्वराग्नौ आहवनीया
दौ याज्ञिकैर्यस्मिंस्त्यते न तु यस्यै देवतायै हविर्गृहीतं तस्या त्वं ध्यायेद्वषट्करिष्यन्निति वचनात्तत्तद्देवतासु त्यज्यते अत आह ॥ त्रय्या निरुक्तेन विधिना
इन्द्रादिरूपेणैव यज्ञ पुरुष अस्मिंस्त्यते इत्यर्थः ॥ उत किंच अध्यात्मयोगे आत्माधिकारे योगे योगिभिरपि आत्मनस्तव मायां अणिमादिसंज्ञां जि
ज्ञासुभिस्तत्कामैर्यस्मिंस्त्यते परमभागवतैस्तु नैष्कर्म्येः परीष्टः सर्वतः पूजितः स तवांघ्रिर्नोऽस्माकमशुभाशयधूमकेतुः स्यादिति परेणैवान्वयः
॥१२॥

राम
२६

एतेषां च मुनिसात्वतादीनां यत्समांसेवकानां मध्ये परमभागवतेषु लक्ष्म्यार्पितवपुःप्रीतिरधिकेति सूचयंति पर्युष्टयेति ॥ इउआदः कंठदेसः
अर्हणं यत्र दत्तमासीत् तत्रैव वक्षसि पर्युषितापीयं वसतीति प्रतिपत्निवत् लक्ष्मीः संस्पर्धमाना भवति न चापि तां स्पर्धमानां प्रियमनादृत्य
यो भवान्पर्युषितयापि अमुया वनमालया मत्कैर्मर्पितयमिति प्रीत्या सुष्ठु प्रणीतं सुष्ठु संपादितं यथा भवति तथार्हणं पूजामादृत्य स्वीकृ-
तवान् सुप्रणीतमित्यर्हणविशेषणं वा तस्य तवांघ्रिर्नो अशुभाशयधूमकेतुर्भूयात् ॥ यद्वा योंघ्रिरमुया सुप्रणीतमित्यर्हणमाददत् स नो
अशुभाशयधूमकेतुर्भूयादित्यन्वयः ॥ अमुयैवं संबंधः एतेभ्यो ध्यानार्चनादिनिष्ठेभ्योपि तव यशसि प्रवृत्तेषु संसक्तेषु एव वक्तव्यमायोः ॥ ममय

वनमालया पा

पर्युष्टया नव विमोकनमानयेयं संस्पर्धिनी भगवती प्रतिपत्निवच्छ्रीः ॥ यः सुप्रणीतममुयार्हणमाददन्नो भूयात्सदां-
घ्रिरशुभाशयधूमकेतुः ॥ १३ ॥ नस्योतगाव इव यस्य वशे भवंति ब्रह्मादयस्तनुभृतो मिथुरर्द्यमानाः ॥ कालस्य ते प्र-
कृतिपुरुषयोः परस्य शं नस्तनोतु चरणः पुरुषोत्तमस्य ॥ १४ ॥ राम ॥ राम ॥

नेत्यष्टः प्रियत्वादित्याहुः ॥ पर्युष्टया वक्षाक्रांतावित्यस्मात् परितः सर्वांगेषु उष्टया क्रांतया शोभितया वनमालया वक्षसि एकदेशे वर्तमा-
नाश्रीः संस्पर्धमाना भवति ॥ तथाप्यनया मधुव्रतैर्वरूथावर्णितया कीर्तिमत्या वैजयंत्या वनमालया यो भवान् सुप्रणीतमर्हणमाद-
दित्यादि पूर्ववत् ॥ १३ ॥ ननु ब्रह्मादयो देवास्तावद्यः परस्परं जयंति जीयंते च किमिदं तत्वेत्यत आह नसीति ॥ मिथुः मिथः अर्द्यमानाः युद्धादिभिः
पीड्यमानाः ब्रह्मादयोपि यस्य तव वशे भवंति न तु जये पराजये वा स्वतंत्राः ॥ के इव नसि नासिकायां ओताः नासिकायां विद्धाः बलीवर्दा
वर्दीः इव उक्तं ततः कलयितुः प्रवर्तकस्य तव देवकृतः प्रकृतिपुरुषयोरपि परस्य तस्य ते पुरुषोत्तमस्य पादो नः शं तनोतु ॥ १४ ॥ राम

श्री
भा टी
३
२५

प्रकृतिपुरुषाभ्यां परत्वमुपपादयंतः कालत्वेन पुरुषोत्तमत्वमाहुः अस्येति॥ अस्य जगतः उदयादीनां हेतुरसि कुतः अव्यक्तं प्रकृतिः जीवः
पुरुषः महान्महत्तत्त्वं तेषां कालं नियंतारं त्वामाहुः॥ अक्षरात्परतः परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः॥ पुरुषान्न परं किंचित्सा
काष्ठा सा परा गतिरित्याद्याः श्रुतयः किंच॥ अयं संवत्सरात्मको यः कालः त्रिणाभिः त्रीणि चातुर्मास्यानि नाभयो यस्य सोऽपि त्वमेव अतः
त्वमुत्तमः पुरुष इति॥ तथा च गीतासु॥ यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः॥ अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम इति॥ १५॥

अस्यासि हेतुरुदयस्थितिसंयमानामव्यक्तजीवमहतामपि कालमाहुः॥ सोऽयं त्रिणाभिरखिलापचये प्रवृत्तः
कालो गभीररय उत्तमपूरुषस्त्वं॥ १५॥ त्वत्तः पुमान्समधिगम्य यया स्ववीर्यं धत्ते महांतमिव गर्भममोघवीर्यः॥
सोऽयं तयानुगत आत्मन अंडकोशं हैमं ससर्ज बहिरावरणैरुपेतं॥ १६॥

राम

त्वमेव प्रकृत्यादिद्वारा जगत्सृष्ट्यादिहेतुरित्युक्तं तत्केन प्रकारेण तदाहुः त्वत्त इति॥ त्वत्तः पुमान्पुरुषो वीर्यं शक्तिं समधिगम्य प्रा
प्य यया मायया सह महांतं धत्ते किमिव अस्य विश्वस्य गर्भमिव सोऽयं महान् तयैव मायया अनुगतः सन् आत्मनः सकाशाद् अंडकोशं सस
र्ज त्वयानुगत इति पाठेऽपि तया मायया त्वयाधिष्ठितः सन्निति॥ १६॥ राम राम॥ राम

महत्तत्त्वं

राम
२५

नन्वेवंभूतमीश्वरं त्वं मम कुतोऽवगतं न दारुकः तदिति ॥ तत्तस्मात्तस्थुषः स्थावरस्य च जंगमस्य च जगतो भवानधीशः यद्यस्मान्मायया उ
त्थाउत्थैर्भिन्ना गुणविक्रियाइंद्रियवृत्तिः तयोपनीतानर्थान्विषयान्जुषन्जुषमाणोऽपि हे हृषीकपते न लिप्तस्त्वं ये त्वन्ये जीवा योगिनो वा
स्वतः परिहृतादपि अविद्यमानान्यन्तःकाडाविषयजोषणाद्बिभ्यति वा स्वनामात्रेण बध्यंत इत्यर्थः ॥२७॥ अलिप्तत्वमाह स्मायेति । स्माया
वलोकः मंदस्मितेन विलसितोऽवलोकः तस्य लवः कटाक्षः तेन दर्शितो यो भावोऽभिप्रायः तेन मनोहारि यद्भ्रूमंडलं तेन प्रहिता ये सौरतमंत्राः

तत्तस्थुषश्च जगतश्च भवानधीशो यन्माययोत्थगुणविक्रिययोपनीतान् ॥ अर्थाञ्जुषन्नपि हृषीकपते न लिप्तो येऽन्ये स्व
तः परिहृतादपि बिभ्यति स्म ॥२७॥ स्मायावलोकलवदर्शितभावहारिभ्रूमंडलप्रहितसौरतमंत्रशौंडैः ॥ पत्न्यस्तु षो
डशसहस्रमनंगबाणैर्यस्येंद्रियं विमथितुं करणैर्न विभ्व्यः ॥२८॥ विभ्व्यस्तवामृतकथोदवहास्त्रिलोक्याः पादावनेजस
रितः शमलानि हंतुं ॥ आनुश्रवं श्रुतिभिरंघ्रिजमंगसंगैस्तीर्थद्वयं शुचिषदस्त उपस्पृशंति [illegible] ॥२९॥ ॥रम॥

तैः शौंडैः प्रगल्भैरनंगबाणैः कामस्य बाणैः संमोहनैः करणैः कामकलाभिः षोडशसहस्रं पत्न्यः यस्येंद्रियं मनः विमथितुं विमोहयितुं न वि
भ्व्यः न समर्थाः स भवानलिप्त इति पूर्वेणैवान्वयः ॥२८॥ तस्मात्तवामृतरूपाया कथाया तदेव उदमुदकं वहंतीति तथा कीर्तिनद्यः तथा पादा
वनेजसरितो गंगाख्यास्तु त्रिलोक्याः शमलानि हंतुं विभ्व्यः केन प्रकारेण आनुश्रवं गुरोरुच्चारणमनुश्रूयत इति अनुश्रवो वेदस्तत्र भवं कीर्तिरू
पं तीर्थं श्रुतिभिः श्रवणेंद्रियैः अंघ्रिजं गंगाख्यं वा अंगसंगैः एवं तु विषदः स्वाश्रमधर्मस्थितास्तव तीर्थद्वयमुपस्पृशंति सेवंत इति ॥२९॥

श्री
भाटी
ए
७५
२८

विबुधैः सह ॥२१॥ विक्षिप्ता विस्तारिता ॥२२॥ उद्दामानि उद्वृत्तानि विक्रमायेभ्यस्तानि कर्माणि ॥२३॥ वीर्यशौर्ययुक्तया श्रिया २९

श्री शु वा इत्यभिष्टूय विबुधैः सेशः शतधृतिर्हरिं ॥ अभ्यभाषत गोविंदं प्रणम्यांबरमाश्रितः २० श्री ब्रो
च भूमेर्भारावताराय पुरा विज्ञापितः प्रभो ॥ त्वमस्माभिरशेषात्मंस्तत्तथैवोपपादितं ॥ २१ ॥ धर्मश्च स्थापितः सत्सु
सत्यसंधेषु वै त्वया ॥ कीर्तिश्च दिक्षु विक्षिप्ता सर्वलोकमलापहा ॥ २२ ॥ अवतीर्य यदोर्वंशे बिभ्रद्रूपमनुत्तमं ॥
कर्माण्युद्दामवृत्तानि हिताय जगतोऽकृथाः ॥ २३ ॥ यानि ते चरितानीश मनुष्याः साधवः कलौ ॥ शृण्वंतः कीर्तयंतश्च
तरिष्यंत्यंजसा तमः ॥ २४ ॥ यदुवंशेऽवतीर्णस्य भवतः पुरुषोत्तम ॥ शरच्छतं व्यतीयाय पंचविंशाधिकं प्रभो ॥ २५ ॥
नाधुना तेऽखिलाधार देवकार्यावशेषितं ॥ कुलं च विप्रशापेन नष्टप्रायमभूदिदं ॥ २६ ॥ ततः स्वधाम परमं विशस्व
यदि मन्यसे ॥ सलोकांल्लोकपालान्नः पाहि वैकुंठकिंकरान् ॥ २७ ॥ श्री भ ग उ वा च अवधारितमेतन्मे यदा
त्थ विबुधेश्वर ॥ कृतं वः कार्यमखिलं भूमेर्भारोऽवतारितः ॥ २८ ॥ तदिदं यादवकुलं वीर्यशौर्यश्रियोद्धतं ॥ लोकं जि
घृक्षद्रुद्धं मे वेलयेव महार्णवः ॥ २९ ॥ यद्यसंहृत्य दृप्तानां यदूनां विपुलं कुलं ॥ गंतास्म्यनेन लोकोऽयमुद्वेलेन विनंक्ष्य
ति ॥ ३० ॥ इदानीं नाश आरब्धः कुलस्य द्विजशापजः ॥ यास्यामि भवनं ब्रह्मन्नेतदंते तवानघ ॥ ३१ ॥ राम

लंघितमर्यादेन ३

उद्वेलेन लंघितमर्यादेन ॥३०॥ वैकुंठं यास्यन् तव भवनं यास्यामि ॥ ३१ ॥ राम राम राम

प्रभासं यास्यामइति वदतोयमभिप्रायः॥ एते देवांशाः स्वाधिकारानेवार्हंतिनतुसद्योमोक्षं द्वारवत्यां तुमृता मुच्येरन्नतस्मादस्मुद
यफलं प्रभासं नेष्यामीति॥३५॥ दक्षशापाद्यक्ष्मणागृहीतश्चंद्रोयत्रस्नानमात्रेणत्वा किल्बिषात्तस्माद्रोगदुःखात्सद्योविमुक्तः स

श्री कृ वा ॥ इत्युक्तोलोकनाथेनस्वयंभूः प्रणिपत्यतं॥ सहदेवगणैर्देवः स्वधामसमपद्यत॥ ३२॥ अथ
तस्यांमहोत्पातान्द्वारवत्यामुपस्थितान्॥ विलोक्यभगवानाहयदुवृद्धान्समागतान्॥ ३३॥ श्री ग नु च॥
एतेवैसुमहोत्पाताव्युत्तिष्ठंतीहसर्वतः॥ शापश्चनः कुलस्यासीद्ब्राह्मणेभ्योदुरत्ययः॥ ३४॥ नवस्तव्यमिहास्माभिर्जि
जीविषुभिरार्यकाः॥ प्रभासंसुमहत्पुण्यंयास्यामोद्यैवमाचिरं॥ ३५॥ यत्रस्नात्वादक्षशापाद्गृहीतोयक्ष्मणोडुराट्॥
विमुक्तः किल्बिषात्सद्योभेजेभूयः कलोदयं॥ ३६॥ वयंचतस्मिन्नाप्लुत्यतर्पयित्वापितॄन्सुरान्॥ भोजयित्वोशिजोविप्रा
न्नानागुणवतांधसा॥ ३७॥ तेषुदानानिपात्रेषुश्रद्धयोप्त्वामहांतिवै॥ वृजिनानितरिष्यामोदानैर्नौभिरिवार्णवं॥ ३८॥
श्री कृ वा एवं भगवतादिष्टायादवाः कुरुनंदन॥ गंतुंकृतधियस्तीर्थंस्यंदनान्समयूयुजन्॥ ३९॥ तन्निरीक्ष्योद्ध
वोराजन्श्रुत्वाभगवतोदितं॥ दृष्ट्वारिष्टानिघोराणिनित्यंकृष्णमनुव्रतः॥ ४०॥ विविक्तउपसंगम्यजगतामीश्वरेश्वरं॥
प्रणम्यशिरसापादौप्रांजलिस्तमभाषत॥ ४१॥ उ व वा॥ देवदेवेशयोगेशपुण्यश्रवणकीर्तन॥ संहृत्यैतत्कु
लंनूनंलोकंसंत्यक्ष्यतेभवान्॥ ४२॥ विप्रशापंसमर्थोपिप्रत्यहन्नयदीश्वरः॥ ४३=॥ ॥राम॥ राम॥

वकलाहर्षिभेजे॥ ३६॥ उशिजःकमनीयान्श्रेष्ठसाधनेन॥ ३७॥ वृजिनेतियथासुदेशेबीजमुप्तंबहुफलंभवतितथादानंसत्पात्रइतियोतयति
॥ ४२॥ लोकंमर्त्यलोकंनप्रत्यहन्ननप्रतिहृतवान्॥ ४३=॥ राम॥

श्री
भा टी
ए
२६
२५

शय्यादिषु त्वां भक्ताः नित्यं सेवितवंतो वयं कथं त्यजेम ॥ ४५ ॥ त्यक्तुमशक्ता वरप्रार्थयेन मायाभयादित्याह त्वयेति ॥ चर्चिताः स्वलं
कृताः दिनि श्रितं जयेम ॥ ४६ ॥ संन्यासिनो ब्रह्मचर्यादिक्लेशैः कथं चित्तरंति वयं त्वनायासेनैव तरिष्याम इत्याह वातरशना इति ॥ ऊ

नाहं तवांघ्रिकमलं क्षणार्धमपि केशव ॥ त्यक्तुं समुत्सहे नाथ स्वधाम नय मामपि ॥ ४३ ॥ तव विक्रीडितं कृष्ण नृणां प
रममंगलं ॥ कर्णपीयूषमास्वाद्य त्यजत्यन्यस्पृहां जनः ॥ ४४ शय्यासनाटनास्थानस्नानक्रीडाशनादिषु ॥ कथं त्वां
प्रियमात्मानं वयं भक्तास्त्यजेमहि ॥ ४५ ॥ त्वयोपभुक्तस्रग्गंधवासोलंकारचर्चिताः ॥ उच्छिष्टभोजिनो दासास्तव मा
यां जयेमहि ॥ ४६ ॥ वातरशना य ऋषयः श्रमणा ऊर्ध्वमंथिनः ब्रह्माख्यं धाम ते यांति शांताः संन्यासिनोमलाः ४७
वयं त्विह महायोगिन्भ्रमंतः कर्मवर्त्मसु ॥ त्वद्वार्तया तरिष्यामस्तावकैर्दुस्तरं तमः ॥ ४८ ॥ स्मरंतः कीर्तयंतस्ते कृतानि ग
दितानि च ॥ गत्युत्स्मितेक्षणक्ष्वेलि यन्नृलोकविडंबनं ४९ श्री क वा ॥ एवं विज्ञापितो राजन्भगवान्देवकीसु
तः ॥ एकांतिनं प्रियं भृत्यमुद्धवं समभाषत ॥ ५० ॥ इ श्री ग ते रु रा ए द स्कं षष्ठ ध्या ॥ ६ ॥
श्री ग नु च यदात्थ मां महाभाग तच्चिकीर्षितमेव मे ब्रह्मा भवो लोकपालाः स्वर्वासं मेभिकांक्षिणः १
मया निष्पादितं ह्यत्र देवकार्यमशेषतः ॥ यदर्थमवतीर्णोहमंशेन ब्रह्मणार्थितः २ राम

ऊर्ध्वमंथिनः ऊर्ध्वरेतसः ॥ ४७ ॥ तावकैर्भक्तैः सह त्वद्वार्तया ॥ ४८ ॥ क्ष्वेली परिहासः इंद्रैकार्ते ॥ ४९ ॥ एकांतिनमित्यादि स्वाभिप्रायवचने हेतुः ॥ ५० ॥
इ श्री का श धे हो यः ६ सप्तमे तूद्धवस्यात्मज्ञानसिद्धौ हरिः स्वयं ॥ अवधूतेतिहासोक्त्या गुरूंश्चाष्टादशावर्णयत् ॥ यदात्थ संह

राम
२६
२५

तदैवायं नष्टमंगलो भविष्यति ॥४॥

त्वं च सर्वत्यागेनात्मनिष्ठो भवेति यत्तु मादुक्तात्तमिति त्रयेण ॥ ३ ॥ न वस्तव्यमेव त्वया ॥५॥ ननु गुणदोषाभ्यां विषमे लोके कुतः समदृ-
ष्टिः स्यात् अत आह यदिदमिति ॥ मनआदिभिर्गृह्यमाणं मनोमयं त्वान्मायेति विद्धि न तदपि न स्थिरं नश्वरं च विद्धि ॥७॥ मनोमयत्वे हेतुः
पुंस इति ॥ अयुक्तस्य विक्षिप्तमनसः नानार्थो भेद विषये भ्रमः स भ्रम एव गुणदोषभाक् ॥ ननु वेदेनैव विधिनिषेधाभ्यां भेदस्य सत्य-

ऊलं वै शापनिर्दग्धं नंक्ष्यत्यन्योन्यविग्रहात् ॥ समुद्रः सप्तमे ह्येतां पुरीं च प्लावयिष्यति ॥३॥ यर्ह्येवायं मयात्यक्तो
लोकोयं नष्टमंगलः ॥ भविष्यत्यचिरात्साधो कलिनापि निराकृतः ॥४॥ न वस्तव्यं त्वयैवेह मया त्यक्ते महीतले ॥ ज-
नोधर्मरुचिर्भद्र भविष्यति कलौ युगे ॥५॥ त्वं तु सर्वं परित्यज्य स्नेहं स्वजनबंधुषु ॥ मय्यावेश्य मनः सम्यक् सम-
दृग्विचरस्व गां ॥६॥ यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः ॥ नश्वरं गृह्यमाणं च विद्धि मायामनोमयं ॥७॥ पुंसो-
युक्तस्य नानार्थो भ्रमः स गुणदोषभाक् ॥ कर्माकर्मविकर्मेति गुणदोषधियो भिदा ॥८॥ तस्माद्युक्तेंद्रियग्रामो युक्त-
चित्त इदं जगत् ॥ आत्मनीक्षस्व विततमात्मानं मय्यधीश्वरे ॥९॥ ॥ राम ॥ ॥ राम ॥

तोक्तानर्थमविज्ञं मित गुणदोषबुद्धेः पुंसः कर्म विहितं अकर्म तल्लोपः विकर्म निषिद्धमिति भेदः अविद्यावद्विषय एव वेद इत्यर्थः ॥८॥
कथमात्मनिपदे ह्यिते विततं जगदीक्षणीयं तत्राह ॥ आत्मानमिति मयि ब्रह्मणि तद्रूपेणेक्षस्व ॥९॥ ॥ राम ॥ राम

श्री भा० टी० ए० ३०

नन्वेवंयुक्तस्यचित्तत्वेनकर्माकरणेदेवादयोविघ्नान्करिष्यंतितत्राहज्ञानेति॥ ज्ञानंवेदतात्पर्यनिश्चयःविज्ञानंतदर्थानुभवःताभ्यांसम्यग्युक्ताः
ततश्चआत्मानुभवेनैवतुष्टचित्तः अतःशरीरिणांदेवादीनामात्मभूतः अंतरायैर्नप्रतिहन्यते अयंभावःयावदनुभवंयथाश्रमंकर्माणिकुर्या
देवतदनंतरंसर्वेषामात्मभूतत्वान्नकोपिविघ्नानाचरतीति॥ तथाचश्रुतिः तस्यहनदेवाश्चनाभूत्याईशतआत्माह्येषांसंभवतीति॥९॥ नचा
त्मज्ञानस्यापियथेष्टाचरणप्रसंगइत्याह॥ दोषबुद्ध्येति॥ गुणदोषबुद्ध्यतीतोपिप्राक्तनसंस्कारान्निषेधान्निवर्तते किंतुनदोषबुद्ध्यावि
हितंचप्रायशःकरोतिनतुगुणबुद्ध्याथार्भकःसंकल्पविकल्परहितःकिंचित्करोतिकुतश्चिन्निवर्ततेतद्वत्॥११॥ एवंभूतस्यनपुनःसं

ज्ञानविज्ञानसंयुक्तआत्मभूतःशरीरिणां॥ आत्मानुभवतुष्टात्मानांतरायैर्विहन्यते॥९॥ दोषबुद्ध्योभयातीतोनिषे
धान्ननिवर्तते॥ गुणबुद्ध्याचविहितंनकरोतियथार्भकः॥११॥ सर्वभूतसुहृच्छांतोज्ञानविज्ञाननिश्चयः॥ पश्यन्म
दात्मकंविश्वंनविपद्येतवैपुनः॥१२॥ श्री शु वा इत्यादिष्टोभगवतामहाभागवतोनृप॥ उद्धवःप्रणिपत्याह
तत्त्वजिज्ञासुरच्युतं॥१३॥ उ व वा योगेशयोगविन्यासयोगात्मन्योगसंभव॥ निःश्रेयसायमेप्रोक्तस्त्यागःसं

श्रीकृष्णायनमः

सारइत्याहसर्वभूतेति॥ नविपद्येतनपुनःसंसरेत्॥१२॥ त्वंतुसर्वंपरित्यज्येत्याद्युपदेशमात्मन्योयोगंमन्वानःपरिपृच्छतियोगेशेति॥ यो
गफलदायिन्योगविद्न्यासोनामातिगोप्यानितेषांविशेषः॥ यद्वायोगोविन्यस्यतेक्रियतेयस्मिन्योगात्मन्योगेआत्माप्रकरोभवति
यस्ययोगस्वरूपेतिवायोगस्यसंभवोयस्मात्चतुर्भिरेतैःसंबोधनैःस्वमहिमाकेवलंत्वयोपदिष्टंनतुमदधिकारंपर्यालोच्येतिसूचयतितं
तदाहनिःश्रेयसायेतिनचारोग्याद्यर्थंसर्वस्वदानादिवदयंत्यागःकिंतुसंन्यासलक्षणःअप्रत्यापत्तिरूपः॥१४॥

राम ३०

राम

यं प्रतित्यागाद्युपदिष्टं सोऽहं मूढमतिः कुतः ममेति अहमिति च सानुबंधे पुत्रादिसहिते त्वन्मायया विरचिते आत्मनि देहे विगाढो निमग्नः अ
तस्तत्त्वं भवता निगदितं यथाऽहमंजसा संसाधयामि तथा भृत्यं मामनुशाधि शनैः शिक्षय ॥१६॥ मया संक्षेपत उक्तं विस्तारतस्त्वन्यान्पृ
च्छेति चेदत आह सत्यस्येति ॥ स्वदृशः स्वप्रकाशस्य सत्यस्यात्मनः आत्मने मां प्रति वक्तारं त्वत्तः अन्यं नानुचक्षे नानुपश्यामि स्वदृशः
स्वतः सिद्धज्ञानात् त्वत्तोऽप्यन्यमिति वा कुत इत्यत आह सर्व इति ॥ बहिरर्थभावा विषयेष्वर्थबुद्धयः ॥१७॥ केचिद्दुःशीला भवंति केचि

त्यागोऽयं दुष्करो भूमन्कामानां विषयात्मभिः ॥ सुतरां त्वयि सर्वात्मन्नभक्तैरिति मे मतिः ॥१५॥ सोऽहं ममाहमिति मूढमतिर्विगा
ढस्त्वन्मायया विरचितात्मनि सानुबंधे ॥ तत्त्वंजसा निगदितं भवता यथाहं संसाधयामि भगवन्ननुशाधि भृत्यं ॥१६॥
सत्यस्य ते स्वदृश आत्मन आत्मनोऽन्यं वक्तारमीश विबुधेष्वपि नानुचक्षे ॥ सर्वे विमोहितधियस्तव माययेमे ब्रह्मा
दयस्तनुभृतो बहिरर्थभावाः ॥१७॥ तस्माद्भवंतमनवद्यमनंतपारं सर्वज्ञमीश्वरमकुंठविकुंठधिष्ण्यं ॥ निर्विण्ण
धीरहमु हे वृजिनाभितप्तो नारायणं नरसखं शरणं प्रपद्ये ॥१८॥ राम ॥ ॥राम॥

त्संविताः फलकाले विनश्यंति केचिदज्ञाः केचिद्दाने समर्थाः केचित्तु स्थानभ्रष्टाः ॥ तस्माद्भवंतमनवद्यमित्यादीनि पंच विशेष
णानि न त्वंतः कालतः पारं देशतश्च यस्य तं कालादिभिरकुंठो विकुंठलोको धिष्ण्यं स्थानं यस्य तं ॥ अहो भगवन् हे स्फुटं निर्वेदहेतुः वृजिनैः
दुःखैरभितप्तः हकारो गौरवाय हकारयुक्त एव पठनीयः ॥ नन्वनवद्यत्वादीनि कुतो मम न दाह नारायणमिति ॥ अनुकंपितामाह नरो जी
वस्तस्य सखायं भवंतं शरणं प्रपद्ये ॥१८॥ ॥राम॥ राम ॥राम॥ राम॥

तदेवं संभावनाविपरीतभावनाभ्यामुपदिष्टं तत्त्वमनवगाहमानं प्रति तन्निवृत्तये गुरूपदेशं विनापि सान्वयव्यतिरेकाभ्यामेव तत्त्वप्रतिप
त्तिर्भवतीति दर्शयितुमाह प्रायेणेति ॥ लोकतत्त्वस्य विचक्षणाः परीक्षकाः अशुभाशयात् विषयवासनातः ॥१९॥ तदुपपादयति ॥ आत्मनः
पश्वादिशरीरेष्वात्मैव हिताहितज्ञाने गुरुः ॥२०॥ तत्र प्रत्यक्षं दर्शयति पुरुषत्वे चेति ॥ तथा च श्रुतिः पुरुषत्वे त्वाविस्तरामात्मा स हि प्रज्ञाने
न संपन्नतमो विज्ञातं वदति विज्ञातं पश्यति वेद श्वस्तनं वेद लोकालोकौ मर्त्येनामृतमीप्सत्येवं संपन्नोऽथेतरेषां पशूनामशनापिपासे एवा
भिविज्ञानमिति ॥२१॥ अतः पुरुषत्वं श्लोतिश्चकेति ॥२२॥ अनुमानतश्चाह अत्रेति ॥ अत्र पौरुष्यामुपदिष्टा अप्रमत्ताः अग्राह्यं

श्री ग० उ० च ॥ प्रायेण मनुजा लोके लोकतत्त्वविचक्षणाः ॥ समुद्धरन्ति ह्यात्मानमात्मनैवाशुभाशयात् ॥१९॥
आत्मनो गुरुरात्मैव पुरुषस्य विशेषतः ॥ यत्प्रत्यक्षानुमानाभ्यां श्रेयोऽसावनुविन्दते ॥२०॥ पुरुषत्वे च मां धीराः सांख्ययो
गविशारदाः ॥ आविस्तरां प्रपश्यन्ति सर्वशक्त्युपबृंहितं ॥२१॥ एकद्वित्रिचतुष्पादो बहुपादस्तथापदः ॥ बह्व्यः सन्ति पु
रः सृष्टास्तासां मे पौरुषी प्रिया ॥२२॥ अत्र मां मार्गयन्त्यद्धा युक्ता हेतुभिरीश्वरं ॥ गृह्यमाणैर्गुणैर्लिंगैरग्राह्यमनुमानतः ॥२३॥

ग्राह्येभ्योऽहंकारादिभ्यो व्यतिरिक्तं मां अद्धा साक्षात् मृगयन्ति मार्गणे प्रकारद्वयमाह ॥ गृह्यमाणैर्बुद्ध्यादिभिर्लिंगैर्हेतुभिर्जडानां प्रकाशं स्व
प्रकाशमेकं विना न घटते इति ॥ अनुपपत्तिमुखेन लक्षणैस्तथा तैरेव लिंगैर्व्याप्तिमुखेनानुमानतश्च ईश्वरं प्रवर्तकं मृगयन्ते बुद्ध्यादिकरणा
नि कर्तृप्रयोज्यानि करणत्वाद्वास्यादिवदिति ॥ तदुक्तं ॥ भगवान्सर्वभूतेषु लक्षितः स्वात्मना हरिः ॥ दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमाप
कैरिति ॥ न चैतावता अनुमानिक आत्मेति मन्तव्यं देहादिव्यतिरिक्तत्वं पदार्थबुद्धिमात्रस्यैवानुमानेन विवक्षितत्वात् ॥२३॥ राम

भूयोन्वयव्यतिरेकाभ्याम् संभावनादिनिवृत्त्या विविक्तात्मानं समाहरन् व्याप्नोति ॥२४॥ सुविशारदा अतिनिपुणा ॥२५॥ सर्वलोकवैलक्षण्यप्रमा
दप्रायइति ॥ धर्मादिषु विचिकित्सायामात्मविचारे च मानवाः समीहंते प्रवर्तंते तत्रापि आयुरादेर्हेतोर्नोकामनयैव ॥२७॥ त्वं तु न कस्यचि
त्कर्मणः कर्ता भवसि न च किंचिदीहसे इहसे न त्वशक्तया वा अज्ञानेन वा अनैपुण्येन वा विरूपत्वेन वा अवाग्मितयावोदासीन्यं चरते

अत्राप्युदाहरंतीममितिहासं पुरातनं ॥ अवधूतस्य संवादं यदोरमिततेजसः ॥२४॥ अवधूतं द्विजं कंचिच्चरंतमकुतो
भयं ॥ कविं निरीक्ष्य तरुणं यदुः पप्रच्छ धर्मवित् ॥२५॥ य कु च कुतो बुद्धिरियं ब्रह्मन्नकर्तुः सुविशारदा ॥ या
मासाद्य भवाल्लोके विद्वांश्चरति बालवत् ॥२६॥ प्रायोधर्मार्थकामेषु विविचित्सायां च मानवाः ॥ हेतुनैव समीहंते आ
युषो यशसः श्रियः ॥२७॥ त्वं तु कल्पः कविर्दक्षः सुभगोऽमृतभाषणः ॥ न कर्ता नेहसे किंचिज्जडोन्मत्तपिशाचवत् ॥२८॥
जनेषु दह्यमानेषु कामलोभदवाग्निना ॥ न तप्यसेऽग्निना मुक्तो गंगांभःस्थ इव द्विपः ॥२९॥ त्वं हि नः पृच्छतां ब्रह्मन्नात्मन्या
नंदकारणं ॥ ब्रूहि स्पर्शविहीनस्य भवतः केवलात्मनः ॥३०॥ श्री गु उ च यदुनैवं महाभागो ब्रह्मण्येन सुमेधसा
पृष्टः सभाजितः प्राह प्रश्रयावनतं द्विजः ॥३१॥ ब्रा ण उ संति मे गुरवो राजन्बहवो बुद्ध्युपाश्रिताः ॥ यतो बुद्धिमुपा
दाय मुक्तोऽटामीह तान्शृणु ॥३२॥ पृथिवी वायुराकाशमापोग्निश्चंद्रमा रविः ॥ कपोतोऽजगरः सिंधुः पतंगो मधुकृद्गजः ॥३३॥

एवं नेत्याह कल्प इत्यादिना त्वं तु कल्पः समर्थः कविः करणज्ञानसंपन्नः दक्षः दस्तलाघववारियुक्तः सुभगः सर्वानुकूलदर्शनः अमृतदर्शनः
अमृतभाषणः अमृतं मधुरं वदसि ॥२८॥ महानानंदः सुत एव कुतः इति पृच्छतां जने स्थितिं ॥२९॥ स्पर्शविहीनस्य विषयभोगरहितस्य अत्र हेतुः
केवलात्मनः कलत्रादि शून्यस्य ॥३०॥ बुद्ध्यैव उपाश्रिताः स्वीकृताः न तु पदेशेन अटामि पर्यटामि ॥३२॥३३॥ ॥राम॥

श्री
भा टी
ए
३६

शोभनं रूपं कीटस्य करोतीति सुपेशकृत् ॥३४॥ मे मयाश्रिताः तदाह एतेषां वृत्तिभिरात्मनः शिक्षाः शिक्षणीयानर्थान् हेयोपादेयादी
न् अन्वशिक्षमनुशिक्षितवानस्मि ॥३५॥ नाहुषो ययातिः ॥३६॥ क्षितेः क्षमां शिक्षितवानित्याह भूतैरिति आक्रम्यमाणः पीड्यमानः त
द्विद्वान् भूतानां दैववशवर्तित्वं विद्वान् स्वव्रतनियमं ॥३७॥ पर्वतरूपा वृक्षरूपा च या पृथिवी तस्याः शिक्षितमाह शश्वदिति । सर्वेहाः परार्थाः
परोपकारार्थाः सर्वा ईहा यस्य सः परार्थ एवैकान्ततः संभवो यस्य सः ॥ भूभृतः पर्वतात् तस्य हि दृषत्तृणादिनिर्झरप्रसवक्रियाः परा

मधुहा हरिणो मीनः पिंगला कुररोर्भकः ॥ कुमारी शरकृत्सर्प ऊर्णनाभिः सुपेशकृत् ॥३४॥ एते मे गुरवो राजं चतुर्विंशतिरा
श्रिताः ॥ शिक्षा वृत्तिभिरेतेषामन्वशिक्षमिहात्मनः ॥३५॥ यतो यदनुशिक्षामि यथा वा नाहुषात्मज ॥ तत्तथा पुरुषव्याघ्र
निबोध कथयामि ते ॥३६॥ भूतैराक्रम्यमाणोपि धीरो दैववशानुगैः ॥ तद्विद्वान्न चलेन्मार्गादन्वशिक्षं क्षितेर्व्रतं ॥३७॥ शश्वत्परार्थ
सर्वेहः परार्थैकान्तसंभवः ॥ साधुः शिक्षेत भूभृत्तो नगशिष्यः परात्मतां ॥३८॥ प्राणवृत्त्यैव संतुष्येन्मुनिर्नैवेंद्रियप्रियैः ॥ ज्ञानं
यथा न नश्येत नावकीर्येत वाङ्मनः ॥३९॥ विषयेष्वाविशन्योगी नानाधर्मेषु सर्वतः ॥ गुणदोषव्यपेतात्मा न विषज्जेत वायुवत् ॥४०॥

र्थाश्च यथा तद्वत् नगशिष्यः वृक्षशिष्यः सन् परात्मतां पराधीनात्मतां वृक्षो यथा परैरवच्छिद्यते पात्यते वा न यन्नमप्यनुमन्यते तद्वत् ॥३८॥
वायुरपि द्विविधः प्राणो बाह्यश्च तत्र प्राणस्य गुरुत्वमाह प्राणवृत्त्येति ॥ प्राणो यथाहारमात्रेण प्रवर्तते न तु रूपरसादीनपीन्द्रियविषयांस्तु नापे
क्षते तथा मुनिरपि भवेदित्यर्थः ॥ प्राणवृत्तेरकरणे मनोवैकल्येन ज्ञाननाशः स्यात् अतो देहनिर्वाहकमेवेच्छेत् गुणातिप्रसक्त्यां तु वाक् मनश्च विक्षि
प्येत अतो नाधिकं लिप्सेदित्याह ज्ञानमिति नावकीर्येत न विक्षिप्येत ॥३९॥ विषयान्सेवमानोपि तेषु नासक्तिं बाह्यवायोः शिक्षेदित्याह
विषयेष्विति ॥ नानाधर्मेषु शीतोष्णादिधर्मकेषु न हि वायुर्वने वस्त्रे अत्र न विषज्जते तद्वत् ॥४०॥

राम
३६

यथा वायुर्गंधादिधर्मयोगेन प्रतीयमानोऽपि वस्तुतो न तद्योगी एवं देहादिधर्मयोगेनाहंप्रत्यये प्रतीयमानोप्यात्मा न तद्धर्मेत्यनितिसंभावितमि
ति वायोरेव शिक्षितमित्याह पार्थिवेष्विति ॥४१॥ आकाशाच्छिक्षितं संभावनाद्वयमाह अंतर्हितश्चेति द्वयेन ॥ अंतर्हितश्च देहांतर्गतो मुनिरा
त्मनो देहाद्यसंगमत एवाव्यवच्छेदं च भावयेत् कुतः स्थिरजंगमेषु समन्वयेन या व्याप्तिस्तया किमिति सर्वस्यैव व्याप्तिः न विततस्य सर्वग
तस्य तत्त्वतः ब्रह्मात्मभावेन ब्रह्मस्वरूपभावनया तत्त्वमसीति श्रुतेः ॥ नन्वेतत्सर्वं कथं संभवति तत्राह नभस्त्वं तत्तुल्यत्वं संभावयेत् यथा
नभसः सर्वगतस्य न घटादिभिः संगः परिच्छेदो वा एवमात्मनोऽपि संभवतीति ॥४२॥ किंच कूटस्थस्यात्मनो नागमापायि देहादिसंबंधं इ
त्याह तेजोबन्नमयैः तेजश्च आपश्च अन्नं च पृथिवी च तन्मयैः कालसृष्टैर्गुणैर्देहादिभिः पुमान्न स्पृश्यते इति न भोक्तृत्वं संभवतीति ॥४३॥

पार्थिवेष्विह देहेषु प्रविष्टस्तद्गुणाश्रयः ॥ गुणैर्न युज्यते योगी गंधैर्वायुरिवात्मदृक् ॥४१॥ अंतर्हितश्च स्थिरजंगमेषु ब्रह्मात्म
भावेन समन्वयेन ॥ व्याप्त्याव्यवच्छेदमसंगमात्मनो मुनिर्नभस्त्वं विततस्य भावयेत् ॥४२॥ तेजोबन्नमयैर्भावैर्मेघाद्यैर्वायुनेरितैः
न स्पृश्यते नभस्तद्वत्कालसृष्टैर्गुणैः पुमान् ॥४३॥ स्वच्छः प्रकृतितः स्निग्धो माधुर्यस्तीर्थभूर्नृणां ॥ मुनिः पुनात्यपां मित्रमी
क्षोपस्पर्शकीर्तनैः ॥४४॥ तेजस्वी तपसा दीप्तो दुर्धर्षोदरभाजनः ॥ सर्वभक्ष्योपि युक्तात्मा नादत्ते मलमग्निवत् ॥४५॥ क्वचिच्छन्नः
क्वचित्स्पष्ट उपास्यः श्रेय इच्छतां ॥ भुंक्ते सर्वत्र दातॄणां दहन्प्रागुत्तराशुभं ॥४६॥ स्वमायया सृष्टमिदं सदसल्लक्षणं विभुः ॥ प्रविष्ट

स्वच्छत्वादिभिर्गुणैरुदकं जगत्पुनातीति तद्गुणमया शिक्षिता इत्याह ॥ स्वच्छः निर्मलः प्रकृतितः स्वभावतः स्निग्धः जनेष्वनुरागवान् माधुर्यो
मधुरालापी तीर्थभूः तीर्थस्थाने अपांमित्र उदकतुल्यः अपांमित्रमिति पाठे सखायं पापात्पुनाति स्वच्छत्वादिगुणैरर्थादुदकसादृश्यं ज्ञातव्यं ॥४४॥
अग्नेः शिक्षितमाह तेजस्वीति ॥ तेजस्वीति ज्ञानातिशयात् विशेषतः तपसा दीप्तः दुर्धर्षः अक्षोभ्यः सर्वभक्ष्योपि उदरभाजनस्य अपरिग्रहः यु
क्तात्मा मुनिः पवित्रस्वरूपः ॥४५॥ अग्नेरेव शिक्षितमाह क्वचिदिति ॥ यथाग्निः परेकुष्यै वहिर्दृष्टाति तथा मुनिरित्याह दातॄणामिति प्रागु
त्तराशुभं भूतं भविष्यच्च पापं ॥४६॥ आत्मनो देहोपाधिकमेवोच्चनीचत्वादि न स्वाभाविकमित्याह स्वमाययेति ॥ स्वमायया विद्यया सृष्टं सदस

श्री
भा० टी०
ए०
३२

आत्मनो जन्मादिषड्विकाराभावमुक्तं दृष्टांतेन संभावितुमाह विसर्गाद्या इति ॥ विसर्गो जन्म श्मशानं नाशः अत्रेयं ज्योतिःशास्त्रप्रक्रि
या आप्यं मंडलं चंद्रः तेजोमयं मंडलमादित्यः तयोरेकनक्षत्रावस्थाने चंद्रो न दृश्यते च स एष आदित्यमंडलेन समदेशस्थितेन व्यव
धानात् सा अमावास्या अथ प्रथमद्वितीयादिकाभिश्चंद्रो नक्षत्रांतरं गच्छति आदित्यस्तु त्रयोदशभिरहोरात्रैः अतः प्रतिपदमारभ्य विषमस्थि
तस्यादित्यमंडलस्य पंचदशो भागः आप्यमंडले प्रतिबिंबितो दृश्यते सा कलेत्युच्यते ॥ एवं पंचदशेऽह्नि त्रयोदशभिर्नक्षत्रैरंतरमि
ति राशिचक्रस्य सप्तविंशतिनक्षत्रात्मकस्य मध्ये संमुखे चंद्रादित्यौ तिष्ठतः तदा पूर्णप्रतिबिंबं भूच्छायालोकितं दृश्यते सा पूर्णिमा

विसर्गाद्याः श्मशानांता भावा देहस्य नात्मनः ॥ कलानामिव चंद्रस्य कालेनाव्यक्तवर्त्मना ॥४८॥
कालेन ह्योघवेगेन भूतानां प्रभवाप्ययौ ॥ नित्यावपि न दृश्येते आत्मनोऽग्नेर्यथार्चिषां ॥४९॥
गुणैर्गुणानुपादत्ते यथाकालं विमुंचति ॥ न तेषु युज्यते योगी गोभिर्गा इव गोपतिः ॥५०॥

तस्याममावास्याप्रतिबिंबेन सह षोडशकलश्चंद्र उपचर्यते ॥ ततः पुनः प्रतिपदमारभ्य मंडलयोर्विषमीभावात्कलाह्रासः ॥ तत्र य
कलानामेवोत्पत्त्यादयो नाप्यमंडलस्य तथात्मनोऽपीत्याह कलानामिवेति ॥४८॥ सिद्धांतलोकेनाग्निदृष्टांतेनैव देहानां क्षणभंगुरतया
वैराग्यशिक्षितमित्याह कालेनेति ॥ ओघवद्वेगो यस्य तेन आत्मनः संबंधिनां भूतानां देहानामित्यर्थः अर्चिषां ज्वालानां ॥४९॥ आदित्याच्छि
क्षितमाह इंद्रियैर्गुणैरिति ॥ गुणैरिंद्रियैर्गुणान्विषयानुपादत्ते यथाकालं अर्थिन्यागते सति विमुंचति च न तेषु युज्यते अहंममाभि
निवेशं न करोति गोभिः रश्मिभिः गा जलानि गोपतिः सूर्य इ
व ॥

पा
राम
३२

स्वतोभेदस्फुरणस्याप्यात्मनो भेदप्रतीतिरुपाधिवशादित्याह दृष्टांतेनैव संभावितमित्याह बुध्यत इति ॥ स्वे स्वरूपे अवस्थित आत्मा भे
देन न बुध्यते अभिव्यनक्तीति व्यक्तिरुपाधिः व्यक्तिस्थ उपाधौ प्रतिबिंबितस्तत्कृत इव उपाधिप्रविष्ट इव भेदेन स्थूलमतिभिर्लक्ष्यते
अर्कवदित्यन्वयः ॥ ५१ ॥ कपोतात्किं शिक्षितमाह नातिस्नेह इति ॥ स्नेहः प्रीतिः प्रसंग उपलालनाद्यासक्तिः ॥ ५२ ॥ दृष्टांतं प्रपंचयति

बुध्यते स्वेन भेदेन व्यक्तिस्थ इव तद्गतः ॥ लक्ष्यते स्थूलमतिभिरात्मा चावस्थितोऽर्कवत् ॥ ५१ ॥ नातिस्नेहः प्रसंगो वा क
र्तव्यः क्वापि केनचित् ॥ कुर्वन्विंदेत संतापं कपोत इव दीनधीः ॥ ५२ ॥ कपोतः कश्चनारण्ये कृतनीडो वनस्पतौ ॥ कपोत्या
भार्यया सार्धमुवास कतिचित्समाः ॥ ५३ ॥ कपोतौ स्नेहगुणितहृदयौ गृहधर्मिणौ ॥ दृष्टिं दृष्ट्यांगमंगेन बुद्धिं बुद्ध्या बबंधतुः ॥ ५४ ॥
शय्यासनाटनस्थानवार्ताक्रीडाशनादिकं ॥ मिथुनीभूय विश्रब्धौ चेरतुर्वनराजिषु ॥ ५५ ॥ यं यं वांछति सा राजंस्तर्पयंत्य
नुकंपिता ॥ तं तं समनयत्कामं कृच्छ्रेणाप्यजितेंद्रियः ॥ ५६ ॥ कपोती प्रथमं गर्भं गृह्णती काल आगते ॥ अंडानि सुषु
वे नीडे स्वपत्युः सन्निधौ सती ॥ ५७ ॥ तेषु काले व्यजायंत रचितावयवा हरेः ॥ शक्तिभिर्दुर्विभाव्याभिः कोमलांगतनूरुहाः ॥ ५८ ॥

कपोतः कश्चनेति ॥ ५३ ॥ तयोर्मिथः स्नेहप्रसंगौ दर्शयति कपोताविति त्रयेण स्नेहेन गुणितं निबद्धं हृदयं ययोस्तौ ॥ ५४ ॥ विश्रब्धौ निःशं
कौ ॥ ५५ ॥ सा कपोती तर्पयंती सहासवीक्षितालापादिभिः प्रीणयंती तेनानुकंपिता सती यं यं वांछति तं तं कामं समनयत् संपादयामास
राजन्निति त्वं यथेति संचितं ॥ ५६ ॥ तेषु तत्र भरितेष्वंडेषु हरेः स्वभावकर्मादिशक्तिभिः रचितावयवाः पक्षिणः कोमलान्यंगानि तनूरुहा
श्च येषां ते ॥ ५८ ॥

श्री
भा॰टी॰
३५

पतत्रैः पक्षैः अदीनानां हृष्टानां ॥ ६० ॥ शिशून्बालान्प्रजाः पुत्रान् ॥ ६१ ॥ स्वालयांतिके चरतः क्रीडतः तान् कपोतपुत्रान् आतत्य प्रसार्य ॥ ६३ ॥

प्रजाः पुपुषतुः प्रीतौ दंपती पुत्रवत्सलौ । शृण्वंतौ कूजितं तासां निर्वृतौ कलभाषितैः ॥ ५९ ॥ तासां पतत्रैः सुस्पर्शैः कूजितैर्मुग्धचेष्टितैः ॥ प्रत्युद्गमैरदीनानां पितरौ मुदमापतुः ॥ ६० ॥ स्नेहानुबद्धहृदयावन्योन्यं विष्णुमायया ॥ विमोहितौ दीनधियौ शिशून्पुपुषतुः प्रजाः ॥ ६१ ॥ एकदा जग्मतुस्तासामन्नार्थं तौ कुटुंबिनौ ॥ परितः कानने तस्मिन्नर्थिनौ चेरतुश्चिरं ॥ ६२ ॥ दृष्ट्वा तांल्लुब्धकः कश्चिद्यदृच्छातो वनेचरः ॥ जगृहे जालमातत्य चरतः स्वालयांतिके ॥ ६३ ॥ कपोतश्च कपोती च प्रजापोषे सदोत्सुकौ ॥ गतौ पोषणमादाय स्वनीडमुपजग्मतुः ॥ ६४ ॥ कपोती स्वात्मजान्वीक्ष्य बालकाञ्जालसंवृतान् ॥ तानभ्यधावत्क्रोशंती क्रोशतो भृशदुःखिता ॥ ६५ ॥ सासकृत्स्नेहगुणिता दीनचित्ताजमायया ॥ स्वयं चाबध्यत शिचा बद्धान्पश्यंत्यपस्मृतिः ॥ ६६ ॥ कपोतश्चात्मजान्बद्धानात्मनोप्यधिकान्प्रियान् ॥ भार्यां चात्मसमां दीनो विललापातिदुःखितः ॥ ६७ ॥ अहो मे पश्यतापायमल्पपुण्यस्य दुर्मतेः ॥ अतृप्तस्याकृतार्थस्य गृहस्त्रैवर्गिको हतः ॥ ६८ ॥ अनुरूपानुकूला च यस्य मे पतिदेवता ॥ शून्ये गृहे मां संत्यज्य पुत्रैः स्वर्याति साधुभिः ॥ ६९ ॥ सोहं शून्ये गृहे दीनो मृतदारो मृतप्रजः ॥ जिजीविषे किमर्थं वा विधुरो दुःखजीवितः ॥ ७० ॥

राम राम

उत्सुकत्वादेव चुनन्त्पोषणार्थं गतौ संतौ पोषणं भक्ष्यं ॥ ६४ ॥ शिचा जालेन ॥ ६६ ॥ आत्मानं स्वसंभार्यां च विललाप शुशोच विलापमाह अहो इति ॥ अतृप्तस्य हृष्टस्त्रैवर्ग्यस्य अकृतार्थस्य अदृष्टमसंपादयतः ॥ ६८ ॥

राम राम

राम
३५

तानाहृतान्यश्पश्यन्नपि शिशुजालेषु ॥७१॥ उत्तरदार्ह्योतिके योजयति ॥७४॥ एवं गृहासक्तिस्तिरश्चामप्यनर्थहेतुः मनुष्यस्य त्वतिनिंदिते
त्याह ॥७३॥ इ श्री का श धे स ध्या ॥१॥ अष्टमे जगरादिभ्यो नववभ्यः शिक्षितं हरिः ॥ अवधूत गिरा प्राह विवेकायोद्धवं प्र
ति ॥ प्रारब्धक्रमे योगस्यावश्यं भावित्वात्तद्भ्यो यमैनीयुर्वयोद्यपाकर्तव्यमिति अजगराच्छिक्षितमित्याह सुखमित्यादिना ॥ यदैंद्रियकं
च कपोतात्

तांस्तथैवावृतान्शिग्भिर्मृत्युग्रस्तान्विचेष्टतः ॥ स्वयं च कृपणः शिशून्पश्यन्नप्यबुधोऽपतत् ॥७२॥ तं लब्ध्वा लुब्धकः क्रूरः
कपोतं गृहमेधिनं ॥ कपोतीमिः कपोतींश्च सिद्धार्थः प्रययौ गृहं ॥७३॥ एवं कुटुंब्यशांतात्मा द्वंद्वारामः पतत्रिवत् ॥ पुष्णन्कु
टुंबं कृपणः सानुबंधोऽवसीदति ॥७४॥ यः प्राप्य मानुषं लोकं मुक्तिद्वारमपावृतं ॥ गृहेषु खगवत्सक्तस्तमारूढच्युतं वि
दुः ॥७५॥ इ श्री ग ते स्ता ए द स्कं भगवदुद्धवसंवादे स ध्या ॥७॥ श्री ग वा
सुखमैंद्रियकं राजन्स्वर्गे नरक एव च ॥ देहिनां तद्यथा दुःखं तस्मान्नेछेत तद्बुधः ॥१॥ ग्रासं सुमृष्टं विरसं महांतं
स्तोकमेव च ॥ यदृच्छयैवापतितं ग्रसेदाजगरोऽक्रियः ॥२॥ शयीताहानि भूरीणि निराहारोऽनुपक्रमः ॥ यदि नो
पनमेद्ग्रासो महाहिरिव दिष्टभुक् ॥३॥ राम राम राम

सुखं तत्स्वर्गे नरके च भवत्येव यथा दुःखं तस्मात्तन्नेछेत बुधः ॥१॥ शरीरनिर्वाहमात्रं तु यथालब्धेन कर्तव्यमित्याह ग्रासमिति ॥ आजगरः अ
जगरवृत्तिः अक्रियः उदासीनः ॥२॥ यदन्नापतति तदा किं कर्तव्यं तत्राह शयीतेति ॥ अनुपक्रमः निरुद्यमः दिष्टभुक् दैवमेव प्रापकमिति
धैर्यवान् ॥३॥

श्री
भा टी
८
३५

ननु समर्थोपि शयीतैव किं कर्तुमित्याह ओज इति ॥ ओज इन्द्रियबलं सहो मनोबलं बलं शरीरमेव तद्युक्तमपि देहमकर्मकमेव बिभृयात् शयान एवमेव तु वीतनिद्रः स्वार्थे दत्तदृष्टिश्च भवेत् न तु पुनरीहेत इन्द्रियवानपीति दर्शनादिव्यापारमपि निवारयति ॥४॥ समुद्राच्छिक्षितमाह मुनिरिति द्वाभ्यां प्रसन्नश्चासौ गम्भीरश्च दुर्विगाह्यः एवंभूत इति परिकलयितुमशक्यः अलब्ध्याभिप्रायत्वात् दुरत्ययः अनतिक्रमणीयः तेजस्वित्वात् ॥ अनन्तपारः कालतो देशतश्चापरिच्छेद्यः स्वरूपाविर्भावात् अक्षोभ्यः अविकार्यः रागाद्यभावात् स्तिमितोदः

ओजःसहोबलयुतं बिभ्रद्देहमकर्मकं ॥ शयानो वीतनिद्रश्च नेहेतेन्द्रियवानपि ॥४॥ मुनिः प्रसन्नगंभीरो दुर्विगाह्यो दुरत्ययः ॥ अनंतपारो ह्यक्षोभ्यः स्तिमितोद इवार्णवः ॥५॥ समृद्धकामो हीनो वा नारायणपरो मुनिः ॥ नोत्सर्पेत न शुष्येत सरिद्भिरिव सागरः ॥६॥ दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेन्द्रियः ॥ प्रलोभितः पतत्यंधे तमस्यग्नौ पतंगवत् ॥७॥ योषिद्धिरण्याभरणांबरादिद्रव्येषु मायारचितेषु मूढः ॥ प्रलोभितात्मा ह्युपभोगबुद्ध्या पतंगवन्नश्यति नष्टदृष्टिः ॥८॥

निश्चलोदकपूर्णो वा यथा नद्युदकैर्गुल्मैर्भवेदित्यर्थः ॥५॥ किंच वर्षासु सरिद्भिः सम्पूर्णोपि सागरो यथा नोत्सर्पेत् ग्रीष्मे न हि हीनोपि न शुष्येत् तथा समृद्धकामस्तद्धीनो वा न हृष्येन्न शोचेदित्यर्थः ॥ अत्र हेतुः नारायणपरो न तु विषयपर इति ॥६॥ रूपगंधशब्दरसस्पर्शैः पंचभिर्विषयैर्मोहिताः पतंगमधुकरगजमीनहरिणादयः अतस्तेषां नाम क्रौं पंचैते गुरवः तदुक्तं ॥ पतंगमातंगकुरंगभृंगमीनादयः पंचभिरेव पंच ॥ एकः प्रमादी स कथं न हन्याद्यः सेव्यते पंचभिरेव पंच चेति ॥ तत्र रूपविलासमोहितो नश्यतीति पतंगाच्छिक्षितमाह तस्याभावैः प्रलोभि

तै ह्वावाः

राम
३५

मधुकराक्लिङ्गितमाह स्तोकमिति ॥ गृहादनुगृहस्यानहिंसनपीडयन् अयंभावः यथामधुकरो विशिष्टगंधलोभेनैकस्मिन्नेवपद्मएव सन्नेकसमयेमुकुलितेतस्मिन्बध्यतेएवंमुनिरपिगुणलोभेनैकमेवगृहमाश्रितस्तन्मोहेनबध्यतइति ॥ ९ ॥ किंच अणुभ्यश्चेति ॥ द्विविधोमधुहृत मधुकृन्तति पुष्पादाकृष्यगृह्णातीति मधुहृत्भ्रमरः मधुकरोतिआर्द्रीभवनेनस्वरूपेणेवेति मधुमक्षिकाच ॥ १० ॥ तत्रप्रथमाक्लिङ्गितमुक्तं द्वितीयाक्लिङ्गितमाह ॥ सायमिदंभोक्ष्यामि इदं श्वः भोक्ष्यामि इति भिक्षितमन्नादिनसंगृह्णीत किंतु पाणिपात्रस्तन्मात्रग्राहीयद्वाउदरमेवपात्रंयस्यसः एकभिक्षायांतदुदरमात्रग्राहीभवेत् संग्राहीतुमक्षिकेवनभवतिनजीवतीत्यर्थः ॥ ११

स्तोकंस्तोकंग्रसेद्ग्रासंदेहोवर्तेतयावता ॥ गृहानहिंसन्नातिष्ठेद्वृत्तिंमाधुकरींमुनिः ॥ ९ ॥ अणुभ्यश्चमहद्भ्यश्चशास्त्रेभ्यः कुशलोनरः ॥ सर्वतःसारमादद्यात्पुष्पेभ्यइवषट्पदः ॥ १० ॥ सायंतनंश्वस्तनंवानसंगृह्णीतभिक्षितं ॥ पाणिपात्रोदरामत्रोमक्षिकेवनसंग्रही ॥ ११ ॥ सायंतनंश्वस्तनंवानसंगृह्णीतभिक्षितं ॥ मक्षिकाइवसंगृह्णन्सहतेनविनश्यति ॥ १२ ॥ पदापियुवतींभिक्षुर्नस्पृशेद्दारवीमपि ॥ स्पृशन्करीवबध्येतकरिण्याअंगसंगतः ॥ १३ ॥ नाधिगच्छेत्स्त्रियंप्राज्ञः कर्हिचिन्मृत्युमात्मनः ॥ बलाधिकैः सहन्येतगजैरन्यैर्गजोयथा ॥ १४ ॥ नदेयंनोपभोग्यंचलुब्धैर्यद्दुःखसंचितं ॥ भुंक्ते

एतद्विवृणोति पुनः सायंतनमिति ॥ १२ ॥ स्पर्शासक्तिर्नाशहेतुरिति गजाक्लिङ्गितमाह पदापीति ॥ पादेनापिदारवींदारुमयीमपिगजो हि करिणींप्रदर्श्य तृणपिहितगर्तेनिपात्यबाध्यते ॥ १३ ॥ किंच नाधिगच्छेदिति नोपगच्छेत् ॥ १४ ॥ त्यागभोगविहीनोधनसंचयः परगामी भवतीत्यत्र मधुहाक्लिङ्गितमित्याह ॥ तदन्योबलवान्भुंक्ते तदप्यन्यस्तच्चान्यः मधुहामक्षिकाभिः संचितं मधुयथाभुंक्ते तद्वत्नजस्तुण्णं धनं कृपणन्येनासंपतिहरिष्यंति चेति तत्राह अर्थवित्तलिंगैरर्थं तदुपायंचवेत्तीत्यर्थवित् यथामधुहा तरुकोटरांतरगतं मधुवेत्ति हरति च ॥ १५ ॥

स्वोद्यमं विनापि भोगः संभवतीत्यत्रापि सरघं वर्णयति सुदुःखेति॥ आशासानानामिति वक्तव्ये वर्णलोपश्चार्षः॥ यतिर्ब्रह्मचारी च पक्वान्नस्वामिनावुभौ॥ तयोरन्नमदत्त्वा तद्भुक्त्वा चांद्रायणं चरेदिति॥ गृहिणामावश्यकत्वेन दानविधानात्॥ २६॥ हरिणाच्छिक्षितमाह ग्राम्येति॥ भगवद्गीतं शृणुयादेव मृगयोर्लुब्धकस्य॥ २७॥ हरिणीशब्दे वृद्धहरिणीसुतः ऋष्यशृंगोपि गुरुजातत्वादित्याह नृत्येति वश्यो वश्यः क्रीडनक इति शेषः॥ २८॥ रसासक्तिर्नाशहेतुरिति मीनाच्छिक्षितमाह जिह्वयेति॥ अतिप्रमाथिन्या अतिक्षोभकया दुर्जयया असद्बुद्धिः मृत्युं प्राप्नोति बडिशैरामिषलिप्तैर्लोहकंटकैः॥ २९॥ दुर्जयत्वमुपपादयति द्वाभ्यां॥ अयं भावः यथाहारस्त्यज्यते न तर्ह्यन्येंद्रियजयः केवलं भवति रसनेंद्रियं तु वर्धते॥ यदि तु भुज्यते तर्हि पुनः रसासक्त्या सर्वेंद्रियक्षोभः स्यात् अतो रसासक्तिं परित्यज्य औषधवद्भुंजीत निष्प्राणवृत्त्यैव संतुष्येदित्यत्रोक्तमपि रसनस्यातिदुर्जयत्वज्ञापनायोच्यत इति विशेषः॥ ३१॥ राम राम

सुदुःखोपार्जितैर्वित्तैराशासानां गृहाशिषः॥ मधुहेवाग्रतो भुंक्ते यतिर्वै गृहमेधिनां॥ २६॥ ग्राम्यगीतं न शृणुयाद्यतिर्वनचरः क्वचित्॥ शिक्षेत हरिणाद्बद्धान्मृगयोर्गीतमोहितात्॥ २७॥ नृत्यवादित्रगीतानि जुषन्ग्राम्याणि योषितां॥ आसां क्रीडनको वश्य ऋष्यशृंगो मृगीसुतः॥ २८॥ जिह्वयातिप्रमाथिन्या जनो रसविमोहितः॥ मृत्युमृच्छत्यसद्बुद्धिर्मीनस्तु बडिशैर्यथा॥ २९॥ इंद्रियाणि जयंत्याशु निराहारा मनीषिणः॥ वर्जयित्वा तु रसनं तन्निरन्नस्य वर्धते॥ राम ३०॥ तावज्जितेंद्रियो न स्याद्विजितान्येंद्रियः पुमान्॥ न जयेद्रसनं यावज्जितं सर्वं जिते रसे॥ ३१॥

पिंगलाया नैराश्यं शिक्षितमिति वक्तुं तदाख्यानमाह पिंगलेत्यादिना ॥ मे मया शिक्षितं ॥ २२ ॥ स्वैरिणी कामचारिणी संकेते रतिस्थाने ॥ २३ ॥
तान्विन्नवतः सधनान्नतएव शुल्कदान् मूल्यदान् कांतान् उत्तरतामोव ॥ २४ ॥ अपि संभावनायां अन्योपि मामुपेष्यतीत्युत्तरेणान्वयः ॥ २५ ॥

पिंगला नाम वेश्यासीद्विदेहनगरी पुरा ॥ तस्या मे शिक्षितं किंचिन्निबोध नृपनंदन ॥ २२ ॥ सा स्वैरिण्येकदा कांतं सं
केत उपनेष्यती ॥ अभूत्काले बहिर्द्वारि बिभ्रती रूपमुत्तमं ॥ २३ ॥ मार्ग आगच्छतो वीक्ष्य पुरुषान्पुरुषर्षभ ॥ तान् शुल्क
दान्वित्तवतः ॥ कांतान्मेनेर्थकामुका ॥ २४ ॥ आगतेष्वपयातेषु सा संकेतोपजीविनी ॥ अप्यन्यो वित्तवान्कोपि मामुपैष्य
तिभूरिदः ॥ २५ ॥ एवं दुराशया ध्वस्तनिद्रा द्वार्यवलंबिनी ॥ निर्गच्छंती प्रविशती निशीथं समपद्यत ॥ २६ ॥ तस्या वित्ता
शया शुष्यद्वक्त्राया दीनचेतसः ॥ निर्वेदः परमो जज्ञे चिंताहेतुः सुखावहः ॥ २७ ॥ तस्या निर्विण्णचित्ताया गीतं शृ
णु यथा मम ॥ निर्वेद आशापाशानां पुरुषस्य यथा ह्यसिः ॥ २८ ॥ न ह्यंगाजातनिर्वेदो देहबंधं जिहासति ॥
यथा विज्ञानरहितो मनुजो ममतां नृप ॥ २९ ॥ राम राम राम

द्वार्यवलंबमाना पुनः प्रविशति पुनर्निर्गच्छति एवं कुर्वती निशीथं अर्धरात्रं प्राप ॥ २६ ॥ निर्वेदः अलंबुद्धिर्वित्तचिंतैव हेतुर्यस्य सः ॥ २७ ॥
यथा यथावत् मम मत्तः शृणु ॥ ननु किं निर्विण्णाया गीतश्रवणेन तत्राह ॥ हि यस्मात्पुरुषस्य आशापाशानां निर्वेदोसिः यथा तथा छे

भागवतटी० स्कं० ११ ॥ [illegible] ॥ ७८ ॥

अविजितात्मत्वे हेतुः याहं बालिशा विदेहमन्या तस्याः अतः येन कारणेन असतस्तुच्छकामान्नरान्कामं कामये ॥ ३० ॥ बालिशत्वं प्रपंचयति
संततमिति चतुर्भिः ॥ समीपे संततमनपगामित्वात् इमं अपरोक्षमीश्वरं ॥ ३१ ॥ अतिविगर्ह्यांति निंद्या या वार्ता जीविका तया अतः संके
तेन याच्ञितस्तया वृत्त्या स्त्रीजिनस्त्वविशेषणं तापरितापं प्रपंचयति स्त्रैणादिति ॥ स्त्रैणं परात्मा अर्थं चार्थतृषः लुब्धात् अतएव शोच्या
त् नरा याहं वित्तं रतिं चेच्छन्ती तया मे हृष्ट्या आत्मा प्रदितापितः केन वित्तमिच्छन्ती तेन नरेण क्रीतेन विक्रीतेन आत्मना देहेन ॥ ३२ ॥ अहो धिक्

पिं लो च अहो मे मोहविततिं पश्यताविजितात्मनः ॥ या कांतादसतः कामं कामये येन बालिशा ॥ ३० ॥ संतं स
मीपे रमणं रतिप्रदं वित्तप्रदं नित्यमिमं विहाय ॥ अकामदं दुःखभयाधिशोकमोहप्रदं तुच्छमहं भजेऽज्ञा ॥ ३१ ॥ अहो
मयात्मा परितापितो वृथा सांकेत्यवृत्त्यातिविगर्ह्यवार्तया ॥ स्त्रैणान्नराद्यार्थतृषोऽनुशोच्यात्क्रीतेन वित्तं रतिमात्मनेच्छती ॥ ३२ ॥ यदस्थिभिर्निर्मितवंशवंश्यस्थूणं त्वचा रोमनखैः पिनद्धं ॥ क्षरन्नवद्वारमगारमेतद्विण्मूत्रपूर्णं मदुपैति
कान्या ॥ ३३ ॥ विदेहानां पुरे ह्यस्मिन्नहमेकैव मूढधीः ॥ यान्यमिच्छत्यसत्यस्मादात्मदात्काममच्युतात् ॥ ३४ ॥

मां याहमतिबीभत्सितं भजामीत्याह यदिति ॥ वंशो नाम स्थूणास्तंभनिहितस्तिर्यग्दंडः वंश्यास्तस्मिन्नुभयतो निहिता वेणवः अस्थि
भिरेव निर्मिता वंशवंश्ययो यस्मिन्तत् तत्र पृष्ठे दीर्घमस्थि यत्स वंशः ॥ पार्श्वास्थीनि वंश्यानि स्थूणा हस्तपादास्थीनि तया रोमभि
र्नखैश्च पिनद्धं छादितं नवधा पिच्छवंति नवद्वाराणि यस्मिंस्तत् ॥ एवंभूतागाररूपं नरशरीरमेतत् मत्तमन्या का वा कांतबुद्ध्या उ
पैति सेवते ॥ ३३ ॥ सर्वस्य गतौ सत्यामप्यहो मम मोहमित्याह विदेहानामिति ॥ याहमसती अच्युतादन्यं काममोगमिच्छतीसा ॥ ३४ ॥

एवं निर्विण्णा सती अतःपरमेवं करिष्यामीत्याह सुहृदिति ॥ अयमीश्वर आत्मनैव आत्मानमेव निवेद्य तं विक्रीय विशेषेण क्रीत्वा अनेनैव सह रमेय यथा रमा लक्ष्मीः ॥३५॥ अन्यस्यासेव्यत्वं दर्शयति कियदिति ॥ आद्यन्तवन्तो ये कामा विषयाः कामदा नरा वा देवा वा कालकलिताः भार्यायाः कियत्प्रियं कृतवन्तः न किंचित् अतो नेदममुत्र च तद्व्यतिरिक्तः कोपि सेव्योस्तीत्यर्थः ॥३६॥ एवं निश्चित्य

सुहृत्प्रेष्ठतमो नाथ आत्मा चायं शरीरिणां ॥ तं विक्रीयात्मनैवाहं रमेऽनेन यथा रमा ॥३५॥ कियत्प्रियं ते व्यभजन् कामा ये कामदा नराः ॥ आद्यन्तवन्तो भार्याया देवा वा कालविद्रुताः ॥३६॥ नूनं मे भगवान्प्रीतो विष्णुः केनापि कर्मणा ॥ निर्वेदोऽयं दुराशाया यन्मे जातः सुखावहः ॥३७॥ मैवं स्युर्मन्दभाग्यायाः क्लेशा निर्वेदहेतवः ॥ येनानुबन्धं निर्हृत्य पुरुषः शममृच्छति ॥३८॥ तेनोपकृतमादाय शिरसा ग्राम्यसंगताः ॥ त्यक्त्वा दुराशाः शरणं व्रजामि तमधीश्वरं ॥३९॥ संतुष्टा श्रद्दधत्येतद्यथालाभेन जीवती ॥ विहराम्यमुनैवाहमात्मना रमणेन वै ॥४०॥ संसारकूपे पतितं विषयैर्मुषितेक्षणं ॥ ग्रस्तं कालाहिनात्मानं कोऽन्यस्त्रातुमधीश्वरः ॥४१॥ राम

स्वभाग्यमभिनंदति नूनमिति ॥ दुष्टा आशा यस्याः तस्या मे ॥३७॥ ननु धनाद्यप्राप्त्या क्लिष्टासि कथं विष्णुः प्रीतस्तत्राह मैवमिति ॥ मंदभाग्याया चेदृक्संतापस्तर्हि एवं निर्वेदहेतवः क्लेशा न स्युरित्यर्थः येन निर्वेदेन अनुबंधं गृहादिकं निर्हृत्य परित्यज्य ॥३८॥ अतस्तेन श्रीविष्णुनोपकृतमुपकारं निर्वेदलक्षणं ग्राम्येषु नरेषु विषयेषु वा संगता ॥३९॥ कथं व्रजसि तत्राह संतुष्टेति ॥४०॥ ननु ब्रह्मादीन्हित्वा अमुनैवेति कोयं नियमः

नारदसंसारोक्ति ॥ कुपितेनत्वागमपहृतविवेकं ॥४५॥

श्री भा टी ए ३८

तर्हिकिमात्मत्राणोपाधिनाभजिष्यसितत्रसर्वतोनिर्विद्यभगवद्भजनेनसहात्रस्यात्मनएवसमर्थत्वादित्याह आत्मैवेति॥ यदायंसर्वंज
गत्पश्येत्तदाप्रमत्तःसन्निखिलादिहामुत्रभोगात्निर्विद्येततदाहि आत्मैवात्मनोगोप्तेत्यन्वयः अतःकेवलंप्रेम्णैवभजामीतिभा
वः॥४२॥ कांतस्यतर्षोभिलाषः ततोजातां॥४३॥ फलितमाह आशाहीति॥४४॥ इ श्री का श धे मो यः ८॥ नवमेऽर

आत्मैवह्यात्मनोगोप्तानिर्विद्येतयदाखिलात्॥ अप्रमत्तइदंपश्येत्सुप्तंकालाहिनाजगत्॥४२॥ ब्रा ए वा
एवंव्यवसितमतिर्दुराशांकांततर्षजां॥ छित्वोपशममास्थायशय्यामुपविवेशसा ४३ आशाहिपरमंदुःखं
नैराश्यंपरमंसुखं॥ यथासंछिद्यकांताशांसुखंसुष्वापपिंगला ४४ इ श्री भा ते का श धेपिंगला
गीतं मा मो॥ यः ८ ब्रा ए वा॥ परिग्रहोहिदुःखाययद्यत्प्रियतमंनृणां॥ अनंतंसुखमाप्नोति
तद्विद्वान्यस्त्वकिंचनः॥१॥ सामिषंकुररंजघ्नुर्बलिनोयेनिरामिषः॥ तदामिषंपरित्यज्यससुखंसमविंदत॥२॥
नमेमानावमानौस्तोनचिंतागेहपुत्रिणां॥ आत्मक्रीडआत्मरतिर्विचरामीहबालवत्॥३॥ द्वावेवमुक्तया
मुक्तौपरमानंदआप्लुतौ॥ यौविमुग्धोजडोबालोयोगुणेभ्यःपरंगतः॥४॥ राम राम

घु स्तो चिंतया

णादिभ्योदेहत्राणोपशिक्षितं॥ अत्वायदुःखतार्थोसौदितिकुररेनदर्शितं॥ कुररात्किंशिक्षितमाह॥ यद्यत्प्रियतमंतस्यतस्यपरिग्रहःतद्धि
द्वावपरिग्रहोदुःखमितिविद्वान्सन्यस्त्वकिंचनस्त्यक्तपरिग्रहःनतुदरिद्रः॥१॥ तदाहसामिषेति॥२॥ अर्भकात्किंशिक्षितमाह गेहपुत्रिणांत
द्वतांयाभवतिसाचिंताचमेनास्ति आत्मनैवक्रीडायस्यआत्मनिरतिःप्रीतिर्यस्यसः॥३॥ नन्वज्ञसर्वज्ञयोःकिंसादृश्यंयेनेत्थंत्वयापरमंसुख
मित्याह द्वाविति॥ विमुग्धःअज्ञःजडःअनुद्यमःएवंभूतोयोबालोयश्चगुणेभ्यःप्रकृतेःपरःपरमीश्वरंप्राप्तःतौद्वौ॥४॥ राम

राम ३८

कुमार्याः शिक्षितं वक्तुमाख्यायिकामाह क्वचिदिति ॥ शूर्पणान्नृवरणायागतान् बंधुषु पित्रादिषु ॥ ६ ॥ शंखाः शांखवलयाः महद्यथा भवति तथा स्वनं चक्रुः ॥ ७ ॥ सा महती बुद्धिमती तत्स्वयं शाल्यवहननं जुगुप्सितं दरिद्रताद्योतकं एकैकशः क्रमेणैकैकं बभंज करादयः सावितवती ॥ ८ ॥ निरभिदत्पृथक्कृतवती ॥ ९ ॥ मन्तुः कुमार्यास्तवकथं संगतिस्तत्राह ल्लोकानिति ॥ १० ॥ वासइति प्रथमांतपाठे कलहः कलहहेतुः

क्वचित्कुमारी त्वात्मानं वृणानान्गृहमागतान् ॥ स्वयं तानर्हयामास क्वापि याते षु बंधुषु ॥ ५ ॥ तेषामभ्यवहारार्थं शालीन्रहसि पार्थिव ॥ अवघ्नंत्याः प्रकोष्ठस्थाश्चक्रुः शंखाः स्वनं महत् ॥ ६ ॥ सा तज्जुगुप्सितं मत्वा महती व्रीडिता ततः ॥ बभंजैकैकशः शंखान्द्वौ द्वौ पाण्योरशेषयत् ॥ ७ ॥ उभयोरप्यभूद्घोषो ह्यवघ्नंत्याः स्म शंखयोः तत्राप्येकं निरभिददेकस्मान्नाभवद्ध्वनिः ॥ ८ ॥ अन्वशिक्षमिदं तस्मादुपदेशमरिंदम लोकाननुचरन्नेताँल्लोकतत्त्वविवित्सया ॥ ९ ॥ वासे बहूनां कलहो भवेद्वार्ता द्वयोरपि ॥ एक एव चरेत्तस्मात्कुमार्या इव कंकणः ॥ १० ॥ मन एकत्र संयुंज्याज्जितश्वासो जितासनः ॥ वैराग्याभ्यासयोगेन ध्रियमाणमतंद्रितः ॥ ११ ॥ राम ॥ राम ॥ राम ॥

वार्ता गोष्ठी द्वयोर्भवेदित्यर्थः चित्तैकाग्रता हेतास्मृतिलक्षणसमाधिहेतुरिति ॥ एकाग्रमनाः स्वार्थं लभते नेनान्य इतीयं बुद्धिः ॥ १० ॥ शरकाराच्छिक्षितमाह मन इति ॥ तत्रोपायमाह जितेति आसनजये श्वासजयः तस्य च जये श्वासाधीनं मनो निश्चलं भवति ॥ न तु तावता निश्चलं सदस्मिन्मनो विषयवासनया यदि विक्षिप्येत तस्तु अपन्नापि वदसर्वथा लीयेत वा तदा किं तत्राह वैराग्येति वैराग्येणाधिक्षिप्यमानं अभ्यासयोगे

॥ ७२ ॥

श्री भा॰ टी॰ ११ ३६

एकत्वेनेति । अत्र तदा रूढ इति ॥ यत्त्रय विक्षेपात्मकं मनः एतत्त्रयस्मिन्परमानंदरूपे भगवति लब्धास्पदं सत्कर्मरेणून्कर्मवासना मुंचति तत
तत्र स्थितं च ॥ न तु कर्मवासनात्यागेपि स्वतः स्थितिर्लयो दुर्वारः ॥ सत्त्वेनेति वृद्धेनोपशमात्मकेन रजस्तमसोरभावे विक्षेपलययोरभावान्निर्वाणं ब्र
ह्मनिर्वृतिं ध्येयाकारेणावस्थानमुपैति कुतः अनिंधनं इंधनं गुणाः तत्कार्यं च तद्रहितं ॥ तदुक्तं योगशास्त्रे मनसोऽत्यंतनिर्मूलस्य ब्रह्माकारत
या स्थितिः ॥ या संप्रज्ञातनामासौ समाधिरभिधीयते इति ॥ १२ ॥ ततश्च न द्वैतस्फूर्तिरित्याह ॥ बहिरिति देशेनादिना अंतरं स्मृत्यादि सुखे गतात्मा
तस्येषुकरणे दत्तचित्तः भेरीघोषैरंतिके व्रजंतं नृपतिमपि न वेद तद्वत् ॥ १३ ॥ सर्पाच्छिक्षितमाह एकचारीति ॥ योगिसंमर्दस्याप्यत्यागे

यस्मिन्मनो लब्धपदं यदेतच्छनैः शनैर्मुंचति कर्मरेणून् ॥ सत्त्वेन वृद्धेन रजस्तमश्च विधूय निर्वाणमुपैत्यनिंधनं ॥ १२ ॥
तदैवमात्मन्यवरुद्धचित्तो न वेद किंचिद्बहिरंतरं वा ॥ यथेषुकारो नृपतिं व्रजंतमिषौ गतात्मा न ददर्श पार्श्वे ॥ १३ ॥
एकचार्यनिकेतः स्यादप्रमत्तो गुहाशयः ॥ अलक्ष्यमाण आचारैर्मुनिरेकोऽल्पभाषणः ॥ १४ ॥ गृहारंभोऽतिदुः
खाय विफलश्चाध्रुवात्मनः ॥ सर्पः परकृतं वेश्म प्रविश्य सुखमेधते ॥ १५ ॥ एको नारायणो देवः पूर्वसृष्टं स्वमा
यया ॥ संहृत्य कालकलया कल्पांत इदमीश्वरः ॥ १६ ॥ ॥ राम ॥ ॥ राम ॥ राम

कुमारीगुरुः जनसंगत्यागे सर्पः स यथा जनाक्रंदमान एकाकी विचरति नियतनिकेतरहितश्च सदाप्रमत्तश्च एकांतवासी च आचारैर्गति
भिः सविषो निर्विषो वेति न लक्ष्यते च असहायश्च मितभाषी च तद्वन्मुनिर्वर्तेतेत्यन्वयः ॥ १४ ॥ किंच गृहारंभ इति अध्रुवात्मनः नश्वरदेहस्य
दुःखं यथा भवति तथा वर्धते ॥ १५ ॥ कारकसामग्रीनिरपेक्षात्केवलादीश्वरादुत्पन्नस्य संहारा ऊर्णनाभिदृष्टांतेन मया संभाविता इति च तदुप
पादयन् संहारप्रकारमाह एक इति सार्धत्रयेण ॥ एककारकनिरपेक्षः पूर्वसृष्टमिदं जगत्कालकलया कालशक्त्या संहृत्य ॥ १६ ॥ राम

राम ३६

एक एवाद्वितीयः सजातीयविजातीयभेदशून्योऽभूत् ॥१७॥ कारणभूतासु सत्त्वादिषु शक्तिष्वपि साम्यं नीतासु सतीषु गुणसाम्यं प्रधानं तदु
पाधिः पुरुषः तयोरीश्वरः परावराणां परे ब्रह्मादयः अवरे अन्ये च मुक्ता जीवास्तेषां परमः प्राप्य आस्ते अतः कैवल्यसंज्ञितः मोक्षशब्दाभिधे
यः तत्र हेतुः ॥१८॥ केवलनिर्विषयः स्वप्रकाशः आनंदानां संदोहः समूहः परमानंद इत्यर्थः ॥१९॥ अतो निरुपाधिकः अतः केवलादेव
सृष्टिं दर्शयति ॥ केवलेनात्मानुभावेन कालेन सत्त्वे क्रियाशक्तिप्रधानं महत्तत्त्वं सृजति जीवसंस्कारहेतुभूतेस्तत्र त्रैस्वरूपेऽपि तं मायैव त्रिसंबो

एक एवाद्वितीयोऽभूदात्माधारोऽखिलाश्रयः ॥ कालेनात्मानुभावेन साम्यं नीतासु शक्तिषु ॥१७॥ सत्त्वादिष्वादिपुरुषः ॥
प्रधानपुरुषेश्वरः ॥ परावराणां परम आस्ते कैवल्यसंज्ञितः ॥१८॥ केवलानुभवानंदसंदोहो निरुपाधिकः ॥ केवलात्मा
नुभावेन स्वमायां त्रिगुणात्मिकां ॥१९॥ संक्षोभयन्सृजत्यादौ तया सूत्रमरिंदम ॥ तामाहुस्त्रिगुणव्यक्तिं सृजंतीं विश्व
तोमुखं ॥२०॥ यस्मिन्प्रोतमिदं विश्वं येन संसरते पुमान् ॥ यथोर्णनाभिर्हृदयादूर्णां संतत्य वक्त्रतः ॥ तया विहृत्य भूयस्तां
ग्रसत्येवं महेश्वरः ॥२१॥

धयति हे अरिंदम अरीन् रागादीन् दमयितुं समर्थ सूत्रस्यैव व्यक्तिशब्देनोच्यमानस्य तामिति स्त्रीलिंगेन परामर्शः त्रिगुणव्यक्तिं गुणत्रयस्य का
र्यं मन एव विश्वतोमुखं नानाविधं त्रिगुणात्मकं विश्वमहंकारद्वारेण सृजंती ॥२०॥ त्रिगुणकार्यस्य सूत्रसंज्ञायां कारणमाह यस्मिन्निति ॥ कारण
भूते समष्टिरूपे यस्मिन्निदं विश्वं प्रोतं ग्रथितं ॥ सपुत्रं वै गौतम सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानीति
श्रुतेः ॥ येन वाध्यात्मप्राणरूपेण जीवः संसरति न दवसितमर्थमुक्ता दृष्टांतमाह यथादि हृदयादूर्णां तंतून् वक्त्रेण संतत्य प्रसार्य विहृत्य क्री
डित्वा ॥२१॥

श्री भा॰ ११ ८०

भगवद्ध्यानपराणांतत्सारूप्यंनचित्रमितिपेशस्कृतोभ्रमरविशेषाज्ज्ञानमित्याह यत्रयत्रेति ॥ सकलमेकाग्रं ॥२२॥ कुड्यांप्रवेशितः
निरुद्धः भयेनध्यायन्सात्म्यतांसारूप्यंपूर्वरूपेणेति ॥२३॥ स्वदेहादपिकिंचिच्छिक्षितमाह स्वात्मनोदेहाच्छिक्षितां ॥२४॥ गुरुत्वेहेतुः विरक्तिविवेकयोर्हेतु
र्विरक्तिहेतुत्वमाह सत्त्वनिधनं उत्पत्तिविनाशौबिभ्रतिस्म किंच सततंसंततं आर्त्युदर्कं दुःखमेवोत्तरफलंबिभ्रत् ॥ यद्वासततार्तिरेवोद
र्कः उत्तरफलंयस्यतत्सत्त्वनिधनंबिभ्रत् ॥ विवेकहेतुत्वमाह तत्त्वानीति यथायथावदेवमत्युपकारित्वेपिदेहेनैवास्याहंतेत्याह तथापि

यत्रयत्रमनोदेहीधारयेत्सकलंधिया ॥ स्नेहाद्द्वेषाद्भयाद्वापियातितत्तत्सरूपतां ॥२२॥ कीटःपेशस्कृतंध्यायन्कुड्यां
तेनप्रवेशितः ॥ यातितत्सात्म्यतांराजन्पूर्वरूपमसंत्यजन् ॥२३॥ एवंगुरुभ्यएतेभ्यएषामेशिक्षितामतिः ॥ स्वात्मो
पशिक्षितांबुद्धिंशृणुमेवदतःप्रभो ॥२४॥ देहोगुरुर्ममविरक्तिविवेकहेतुर्बिभ्रत्स्मसत्त्वनिधनंसततार्त्युदर्कं ॥ तत्त्वा
न्यनेनविमृशामियथातथापिपारक्यमित्यवसितोविचराम्यसंगः ॥२५॥ जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्
पुष्णातियत्प्रियचिकीर्षयावितन्वन् ॥ स्वांतेसकृच्छ्रमवरुद्धधनःसदेहःसृष्ट्वास्यबीजमवसीदतिवृक्षधर्मा ॥२६

तथापीतिपारक्यंश्वसृगालादिभिर्भक्ष्यमितिनिश्चितवान् ॥२५॥ सततार्त्युदर्कतांप्रपंचयतिजायेतिद्वाभ्यां ॥ यस्यदेहस्यप्रियचिकीर्ष
याभोगसंपादनेच्छयाजायादिवर्गान्वितन्वन्पुष्णातिपुरुषःकथंभूतःसकृच्छ्रंयथाभवतितथावरुद्धानिसंचितानिधनानियेनसःदेहवि
शेषणंवासदेहःस्वांतेस्वस्यायुषोंतेअवसीदतिनश्यति ॥ किंचदेहनाशेपिनदुःखसमाप्तिरित्याह ॥ अस्यपुरुषस्यदेहांतरबीजंकर्मसृष्ट्वा

किंच जिह्वेति ॥ अमुं देहं तदभिमानिनं पुरुषं वा एकतः रसं प्रति जिह्वा अपकर्षति आच्छिनत्ति कर्हिचित् कदाचित् तर्षः पिपासा जलं प्रति, शिश्नो व्यवायं
प्रति त्वक् स्पर्शं प्रति, उदरं अन्नमात्रं प्रति, श्रवणं शब्दं प्रति, घ्राणं गंधं प्रति, चपलदृक् रूपं प्रति, क्व च कुत्रचित् स्वस्व विषयं प्रति कर्मशक्तिः अन्यद
पि कर्मेन्द्रियं लुनंति शोषयंति ॥ २७ ॥ तदेवं देहो गुरुरित्यादि त्रिभिर्विरक्तिविवेकहेतुत्वमुपपाद्येदानीं अस्य देहस्य दुर्लभत्वं दर्शयन्नीश्वर
निष्ठां विधत्ते सृष्ट्वेति द्वाभ्यां ॥ पुराणि शरीराणि पुरुषं पुरुषदेहं ब्रह्मणोऽवलोकाय अपरोक्षाय धिषणं बुद्धिर्यस्मिंस्तं तदुक्तं तासां मे पौरुषी
प्रियेति श्रुतिश्च पुरुषत्वे वाविस्तरामात्मेति ॥ ईश्वरो दिकारणाधिष्ठात्रीरग्न्यादिदेवताः वागादिभिः सह सृष्ट्वा तानुताश्वतं प्रति भोगार्थं शरी

जिह्वैकतोऽमुमपकर्षति कर्हि तर्षा शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् ॥ घ्राणोऽन्यतश्चपलदृक्क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव
गेहपतिं लुनंति ॥ २७ ॥ सृष्ट्वा पुराणि विविधान्यजयात्मशक्त्या वृक्षान्सरीसृपपशून्खगदंशमत्स्यान् ॥ तैस्तैरतुष्टहृदयः पु
रुषं विधाय ब्रह्मावलोकधिषणं मुदमाप देवः ॥ २८ ॥ लब्ध्वा सुदुर्लभमिदं बहुसंभवांते मानुष्यमर्थदमनित्यमपीह धीरः ॥
तूर्णं यतेत न पतेदनुमृत्यु यावन्निःश्रेयसाय विषयः खलु सर्वतः स्यात् ॥ २९ ॥ ॥राम॥ ॥राम॥

रमयाचंत स च ताभ्यो गां शरीरमश्वं शरीरं यथाक्रममानीतवान् न ताः ता देवताः सोऽब्रवीद्यथायतनं चक्षुरादिस्थानं अस्मिन्देहे प्रविशतेति तदा
इत्ताभ्य उक्तत्यादि ॥ तथा ताभ्यो गामानयत्ता अब्रुवन्नैव नोऽलमलमिति ताभ्योऽश्वमानयत्ता अब्रुवन्नेवैव नोऽयमलमिति ॥ ताभ्यः पुरुषमानय
त्ता अब्रुवन्सुकृतं वतेति च ॥ २८ ॥ तस्माद्बहूनां संभवानां जन्मनामंते मानुष्यमनित्यमपि अर्थदं पुरुषार्थप्रापकं दैवाल्लब्ध्वा इदं अनुमृत्यु अन्व
नुनिरंतरं मृत्यवे यस्य तत्तथा यावन्न पतेत्तावदेव तूर्णं शीघ्रं निःश्रेयसाय यतेत विषयः पुनः सर्वतः श्वादियोनिष्वपि स्यादेव ॥ २९ ॥ ॥राम

श्री
भाग
ए
११
८१

नतदेवं देहोपादेयविवेकं बहुभ्यो निस्त्येदानीयदुक्तंत्वं तु कल्पदृत्यादितत्रोत्तरमाह एवमिति ॥ एवं बहुभ्यो गुरुभ्यः शिक्षितेन विशिष्टं ज्ञानमेवालोकः प्रदीपो यस्यसः सन्नहं पतं दा आत्मविशेषणं आत्मनिस्थितएवमहीं विचरामि ॥ ३० ॥ ननु किं बहुभिर्गुरुभिः न हि एकेनैव केनचित्सुप्रसन्नेन बहुरूपो गुरुरेवआश्रितः न चाह्न नहीति ॥ बहुधासप्रपंचनिष्प्रपंचभेदाभेदादिभिः अयं भावः नैतेपरमार्थोपदेशगुरवः किंत्वन्वयव्यतिरेकाभ्यामात्मन्यसंभावनादिमात्रनिवर्तकाः तेषांच बहुत्वमुक्तमेवेति ज्ञानप्रदं मंत्रप्रदं तु गुरुमेकमेव वदन्पतिं ॥ मदभिज्ञं गुरुं शांतमुपासीनेति

एवं संजातवैराग्यो विज्ञानालोक आत्मनि ॥ विचरामि महीमेतां मुक्तसंगोनहंकृतिः ॥ ३० ॥ नह्येकस्माद्गुरोर्ज्ञानं सुस्थिरं स्यात्सुपुष्कलं ॥ ब्रह्मैतदद्वितीयं वै गीयते बहुधर्षिभिः ॥ ३१ ॥ श्री ग उ च ॥ इत्युक्त्वा स यदुं विप्रस्तमामंत्र्य गभीरधीः ॥ वंदितः स्वर्चितो राज्ञा ययौ प्रीतो यथागतं ॥ ३२ ॥ अवधूतवचः श्रुत्वा पूर्वेषां नः स पूर्वजः ॥ सर्वसंगविनिर्मुक्तः समचित्तो बभूव ह ॥ ३३ ॥ इ श्री ग ते हा रा ए द स्कं भगवदुद्धवसंवादे अवधूतगीते नामनवमोध्यायः ॥ ९ ॥

उक्तं च ॥ तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तममिति विप्रो दत्तात्रेयः ॥ योगर्द्धिमाप्तुं गुरुमयीयदुर्देहयाद्याद्युक्तत्वात् ॥ ३२ ॥ यथागतं तथैव यदृच्छया यथायथावित्यर्थः ॥ ३२ ॥ भगवान्स्वीयं ब्रह्मविद्कुलमिति श्लाघयन्नाह नः पूर्वेषां पूर्वजइति ॥ अत्र संग्रहश्लोकाः ॥ कपोतमीनरूपिणा कुमारीगजपन्नगाः ॥ पतंगः ऊर्णनाभ्याष्टौ हेयार्थे गुरवो मताः ॥ मधुहन्मधुकृतौ च पिंगला च द्वयोस्त्रयः ॥ उपादेयार्थविज्ञाने शेषाः षट्सुखादयो मताः ॥ नदवां तदभेदे च ततत्ततसमुटीहतं ॥ अध्यायत्रितये चाष्टनवाष्टादीदिनाः क्रमात् ॥ ९ ॥ इ श्री ग ते ह्रा श ध्ये न मो यः ॥ ९ ॥
राम राम राम राम राम

राम
राम
८१

चतुर्विंशतिगुर्वाख्यानलब्धसंभावनाभुवः ॥ उद्धवस्यात्मतत्त्वाप्तौ साधनोक्तिरतः परं ॥ दशमे देहसंबंधात्संसृतिर्नात्मनः स्वतः ॥ इत्येतद्वर्ण्यते या
मासमतांतरनिरासतः ॥ तदेवमन्वयव्यतिरेकाभ्यामुत्पन्नविवेकज्ञानस्य तत्वज्ञानायादित आरभ्य साधनान्युपदिशति भगवान्मयेति ॥ म
यायंचरात्राद्युक्तावै स्वधर्मेष्ववहितः अप्रमत्तः स च तदविरोधेन वर्णाद्याचारमनुतिष्ठेत् ॥ १ ॥ कथमकामात्मना संभवति तत्राह अन्वीक्षेते
ति ॥ स्वधर्मैर्विशुद्धचित्तः सन् देहिनां विषयेषु सत्यत्वाभिनिवेशेन ये सर्वे आरंभास्तेषां फलवैपरीत्यं पश्येत् ॥ एवं फलवैपरीत्यादकामः

श्री ग नु च मयोदितेष्ववहितः स्वधर्मेषु मदाश्रयः ॥ वर्णाश्रमकुलाचारमकामात्मा समाचरेत् ॥ १ ॥ अन्वी
क्षेत विशुद्धात्मा देहिनां विषयात्मनां ॥ गुणेषु तत्त्वध्यानेन सर्वारंभविपर्ययं ॥ २ ॥ सुप्तस्य विषयालोको ध्यायतो वा
मनोरथः ॥ नानात्मकत्वाद्विफलस्तथा भेदात्मधीर्गुणैः ॥ ३ ॥ निवृत्तं कर्म सेवेत प्रवृत्तं मत्परस्त्यजेत् ॥ जिज्ञा
सायां संप्रवृत्तो नाद्रियेत्कर्मचोदनां ॥ ४ ॥ ॥ राम ॥ राम २ राम ३

स्यात् ॥ २ ॥ किंच काम्यविषयाणां मिथ्यात्वादपीत्याह सुप्तस्येति ॥ विफलः अर्थशून्यः अत्रैवं प्रयोगः इंद्रियैर्याबुद्धिः नानाबुद्धिः सा विफला नाना
नात्मकत्वादिंद्रियकत्वाच्च मनोजन्यस्वप्नमनोरथवदिति मोक्षार्थी न प्रवर्तेत न तत्र काम्यनिषिद्धयोः ॥ ३ ॥ नित्यं नैमित्तिकं कुर्यात्प्रत्यवायजिहास
येति स्मृतेः अतः प्रवृत्तं काम्यं कर्म त्यजेत् निवृत्तं नित्यनैमित्तिकमेव कुर्यात् आत्मविचारेऽपि सम्यक्प्रवृत्तो निवृत्तकर्मचोदनादपि नाद्रियेत ॥ ४

नित्यनैमित्तिकं संकोच्यादरेण जिज्ञासा कर्तव्या किंच॥ यमानहिंसादीनभीक्ष्णमादरेण सेवेत शौचादींस्तु नियमान्क्वचित्॥ यथाशक्ति सदात्मज्ञानाविरोधेन यमान्द्वादश नियमांश्चैकैकेन विशेषाध्याये वक्ष्यति॥ यमेष्वप्यत्यादरं परित्यज्य गुरुमुपासीतेत्याह मदभिज्ञमिति मदात्मकं मद्रूपं॥५॥ गुरुसेवकस्य धर्मानाह अमानीति॥ दक्षः अनलसः निर्ममः जायादिषु ममताशून्यः गुरौ तु दृढसौहृदः असत्वरः अव्यग्रः अमोघवाक् व्यर्थालापरहितः एतान्येव शिष्यस्य लक्षणानि ज्ञेयानि॥६॥ ननु स्वजायादिषु कथं निर्ममः स्यात्तत्राह जायेति॥ औदासीन्यहेतुं विवे

यमानभीक्ष्णं सेवेत नियमान्मत्परः क्वचित्॥ मदभिज्ञं गुरुं शान्तमुपासीत मदात्मकं॥५॥ अमान्यमत्सरो दक्षो निर्ममो दृढसौहृदः॥ असत्वरोऽर्थजिज्ञासुरनसूयुरमोघवाक्॥६॥ जायापत्यगृहक्षेत्रस्वजनद्रविणादिषु॥ उदासीनः समं पश्यन्सर्वेष्वर्थमिवात्मनः॥७॥ विलक्षणः स्थूलसूक्ष्माद्देहादात्मेक्षिता स्वदृक्॥ यथाग्निर्दारुणो दाह्याद्दाहकोऽन्यः प्रकाशकः॥८॥

कं दर्शयति आत्मनोऽर्थं प्रयोजनं सर्वत्र सममिव पश्यन्निति अयं भावः सर्वदेहेष्वात्मन एकत्वाज्जायादिदेहेष्विव स्वदेहे आत्मनोऽर्थः सुखादिः सम एव केनविशेषेणैतेष्वेव ममताभिनिवेश उत्पेवमुदासीनः सन्गुरुं प्रपद्येतेति॥७॥ अदेहकोऽसौ देहव्यतिरिक्तः आत्मा यस्यैकत्वादर्थः सर्वेषु समः स्यात्तमाह विलक्षण इति॥ स्थूलसूक्ष्माद्देहद्वयादात्मान्यः यतो विलक्षणः द्वैधा वैलक्षण्यं दर्शयति ईक्षिता स्वदृगिति द्रष्टा दृश्याद्धि विलक्षणः द्वैधा वैलक्षण्यं॥ स्वप्रकाशश्च जडाद्विलक्षणः तल्लक्षणयोरन्यत्वे दृष्टांतः यथाग्निर्दाहकः प्रकाशकश्च दाह्यात्प्रकाश्याच्च दारुणः काष्ठात् अन्यस्तद्वदिति॥८॥

अनेनैव दृष्टांतेन नित्यत्वानादित्व विभुत्वैकत्वादयोपि सिद्धं नीत्याह निरोधेति ॥ यथा च दारुष्वंतः प्रविष्टोग्निस्तत्कृतान्नाशादीन्प्राप्नोति न तु स्वतो नाशादिमान् ॥ एवं देहगुणान नित्यत्वादीन्देहात्परो नित्यत्वादिस्वरूपोप्यात्मानुभवति न तु स्वनित्यत्वादिभिरपि वैलक्षण्यात्तिन्यत्वमिति भावः ॥ ९ ॥ नन्वग्नेर्दारुसंयोगात्तद्धर्मभाक्त्वं घटते आत्मनस्त्वसंगत्वात्कथं देहेन तद्धर्मैर्वा संबंधः संबंधे वा तस्य किं तन्निरासस्तत्राह योसाविति ॥ पुरुषस्येश्वरस्याधीनेन मायागुणेन योसौ सूक्ष्मः अथ च स्थूलो देहो विरचितः पुंसो जीवस्यायं संसारः तन्निबंधः तदध्यासकृतः ॥ १० ॥ इयस्मादेवं तस्मादात्मविद्या तन्निवर्तिकेत्याह ॥ आत्मनो विद्योज्ज्ञाने तस्य क्लिन्नेजसैत्री आक्लिद् इति वा पदच्छेदः ॥ यस्मादेवं तस्माज्जिज्ञा

निरोधोत्पत्त्यपक्षयवृद्धिनानात्वं न तु तान्गुणान् ॥ अनुप्रविष्ट आप्नोत्येवं देहगुणानयम् ॥ ९ ॥ योसौ गुणैर्विरचितो देहोयं पुरुषस्य हि संसारस्तन्निबंधोयं पुंसो विद्याच्छिदात्मनः ॥ १० ॥ तस्माज्जिज्ञासयात्मानमात्मस्थं केवलं परं ॥ संगम्य निरसेद्देहबुद्ध्यादीन्यथाक्रमं ॥ ११ ॥ आचार्योरण्याद्यः स्यादंतेवास्युत्तरारणिः ॥ तत्संधाने प्रवचनं विद्यासंधिः सुखावहः ॥ १२ ॥

सया विचारेण आत्मस्थं कार्यकारणसंघातेनएव स्थितं सम्यक् ज्ञात्वा एतत एतस्मिन्देहादौ वस्तुबुद्धिं स्थूलसूक्ष्मक्रमेण निरसेत्त्यजेत ॥ ११ ॥ गुरोर्लब्धा विद्या अविद्या तत्कार्ये निरसनक्षमेति स्फुटीकर्तुं विद्योत्पत्तिमग्न्युत्पत्तिनिरूपकेण निरूपयति आचार्य इति ॥ आद्यः अधरः तत्संधाने तयोर्मध्यमंथनकाष्ठं प्रवचनं उपदेशः विद्या च संधिः संधो भवत्यग्निरिव ॥ तथा च श्रुतिः आचार्यः पूर्वरूपं अंतेवास्युत्तरं रूपं विद्यासंधिः प्रवचनं संधानमिति ॥ १२ ॥ राम ॥ राम ॥ राम ॥ राम ॥

श्री
भा टी
ए ४.
४३

अग्निसादृश्यमेवाह वैशारदीति ॥ विशारदो निपुणः तेन शिष्येण प्राप्ता तेन गुरुणा चोपदिष्टा अतिविशुद्धा बुद्धिः गुणकार्यरूपां मायां निवर्त्त
यति तदात्मकमेतद्विश्वं जीवस्य संसृतिनिमित्तं नानागुणांश्च दग्ध्वा असमिद्वह्निरिंधनः तस्मात्कार्येण कारणेन विद्यया व्यवधानाभावात्तस्मा
ज्ज्ञात्परमानंदरूपो भवतीति भावः ॥ १३ ॥ एवं तावद्बद्धमुक्तप्रकाशज्ञानस्वरूपो नित्यः एक एवात्मा कर्तृत्वादयस्तु धर्मास्तस्य देहोपाधिकाः तद्व्य
तिरिक्तं च सर्वमनित्यं मायामयं अतः सर्वतो विरक्तः सन्नात्मज्ञानेन मुच्यते ॥ युक्तो विलक्षणस्य लक्षणस्याक्रियादिनानादेवं श्रुतिसमन्वये

वैशारदी सातिविशुद्धबुद्धिर्धुनोति मायां गुणसंप्रसूतां ॥ गुणांश्च संदह्य यदात्ममेतत्स्वयं च शाम्यत्यसमिद्यथाग्निः ॥ १३ ॥
अथैषां कर्मकर्तॄणां भोक्तॄणां सुखदुःखयोः ॥ नानात्वमथ नित्यत्वं लोककालागमात्मनां ॥ १४ ॥ राम ॥

न निर्णीतेऽप्यर्थे मतांतरविरोधेन संदेहो माभूदिति तन्मतं निराकर्तुमुद्भावयति अथेति ॥ अथ मन्यसे एषां जीवात्मनां कर्मकर्तॄणां सुखदुःख
योर्भोक्तॄणां च नानात्वमिति ॥ एवं हि जैमिनीया मन्यंते अहंप्रत्ययवेद्य एवात्मा स च प्रतिशरीरं भिन्नः कर्तृभोक्तृरूपश्च न तु ज्ञानानंदस्वरूपस्ततोऽनि
र्विकार एकः परमात्मास्तीति यथाहुः अहंप्रत्ययविज्ञेयो ज्ञाताध्यः सर्वदैवहीति ॥ तथा वैराग्यं च न संभवति तथा हि भोगस्थानानाम नित्यत्वा
द्वैराग्यं भवेत् भोगकालस्य च तदुपायकर्मबोधकागमस्य वा भोक्तुरात्मनो वा तन्नैतदस्तीत्याह ॥ अथ नित्यत्वं लोककालागमात्मनां मन्यस इति ॥ १४

राम
४.
४३

विकेरा

न च भोगानां वैराग्यान्मायामयत्वाद्वा वैराग्यं स्यादित्याह सर्वभावानां स्वच्छंदमादीनां संस्थास्थितिः औत्पत्तिकी प्रवाहरूपेण नित्या तथा
वदंति ॥ न कदाचिदनीदृशं जगदिति श्रुतेस्तत्कर्ता कश्चिदीश्वरोपि नास्तीति भावः ॥ किंच यथा यथा कल्पितं मायामयीत्यर्थः न चात्म
स्वरूपस्यैतं नित्यमेकं ज्ञानमस्तीत्याह न त्वदिति घटपटाद्याकारभेदेन धीर्जायते अतो नित्या म्रियते ॥ अयं गूढाभिप्रायः न हि नित्य
ज्ञानरूप आत्मापि तज्ज्ञानपरिणामवानु ॥ न च विकारित्वेनानित्यत्वप्रसंगः ॥ यथाहुः ॥ विक्रिया ज्ञानरूपास्य न नित्यत्वे विरोत्स्यत

मन्यसे सर्वभावानां संस्था ह्यौत्पत्तिकी यथा ॥ नातद्रूपाकृतिभेदेन जायते म्रियते च धीः ॥१५॥ एवमप्यंग सर्वेषां देहिनां
देहयोगतः ॥ कालावयवतः संति भावा जन्मादयोऽसकृत् ॥१६॥ तत्रापि कर्मणां कर्तुरस्वातंत्र्यं च लक्ष्यते ॥ भोक्तु
श्च दुःखसुखयोः को न्वर्थो विवशं भजेत् ॥१७॥ न देहिनां सुखं किंचिद्विद्यते विदुषामपि ॥ तथा च दुःखं मूढानां वृथा
हंकरणं परं ॥१८॥ राम ॥राम॥ राम ॥राम ॥राम॥

इति ॥ अतो मुक्तो विंद्रियादिदेहिनस्य परिणामासंभवाज्जडत्वेन न तस्य प्राप्ते स्तुसमार्थत्वान्मुहुर्निरेव प्रेयसी न निहन्तिरिति ॥१५॥ न त्वना
वृतेनैव कर्मणा ईशस्य वैराग्योपपादनाय प्रवृत्तिमार्गस्यानर्थहेतुत्वं प्रपंचयति एवमित्यादिना ॥ लोकानां लोकपालानामित्यतः
प्राक्तनेन ग्रंथेन ॥ अंगहे उद्धव कालावयवतः संवत्सरादिरूपात् ॥१६॥ स्वातंत्र्यपक्षे कर्मणो दुःखभोगस्य चासंभवादित्यर्थः
॥१७॥ ननु ये सम्यक् कर्म कर्तुं जानंति ते सुखिन एव ये तु न जानंति ते दुःखिन इति चेन्नेत्याह नेति ॥ विदुषामपि सुखं किंचिन्न विद्यते ॥
तथा मूढानामपि दुःखं न भवति ॥ अतो वयं कर्मकुशलास्तेन सुखिन इति तेषां केवलं वृथैवाहंकार इत्यर्थः ॥१८॥ राम

श्री
भा० टी
११
५१
४४

अंगीकृत्याप्याह यदीति ॥ नं ते योगमुपायं न विदुः यथा साक्षान्मृत्युर्न प्रभवेत् ॥१९॥ तथापि यावज्जीवं सुखं लभ्यत इति चेत्तत्राह
कोन्विति ॥ यतः अंतिके वर्तमानो मृत्युः न तुष्टिं ददाति आघातं वधस्थानं प्रति ॥२०॥ एवमस्मिंल्लोके सुखं नास्तीत्युक्ते लोकांतरे तथैवे
त्याह श्रुतमिति ॥ श्रुतं स्वर्गादि तदपि दुष्टं स्पर्धा परस्परोत्कर्षासहनं असूया परगुणेषु दोषाविष्करणं अत्ययो नाशः व्ययोपक्षयः तैर्दुष्टं
यद्वा व्ययो नाशः अत्ययो त्ययस्यातिशयः तैर्दृष्टवत् प्राप्यदुःखमित्यर्थः ॥ किंच बह्वंतरायो दैवगुणादिरूपा विघ्ना यस्मिन्का

यदि प्राप्तिं विघातं च जानंति सुखदुःखयोः ॥ तेप्यद्धा न विदुर्योगं मृत्युर्न प्रभवेद्यथा ॥१९॥ कोन्वर्थः सुखयत्येनं का
मो वा मृत्युरंतिके ॥ आघातं नीयमानस्य वध्यस्येव न तुष्टिदः ॥२०॥ श्रुतं च दृष्टवद्दुष्टं स्पर्धासूयात्ययव्ययैः
बह्वंतरायकामत्वात्कृषिवच्चापि निष्फलं ॥२१॥ अंतरायैरविहितो यदि धर्मः स्वनुष्ठितः ॥ तेनापि निर्जितं स्थानं यथा गच्छ
ति तच्छृणु ॥२२॥ इष्ट्वेह देवता यज्ञैः स्वर्लोकं याति याज्ञिकः ॥ भुंजीत देववत्तत्र दिव्यान्भोगान्निजार्जितान् ॥२३॥ स्वपुण्योपचिते
शुभ्रे विमान उपगीयते । गंधर्वैर्विहरन्मध्ये देवीनां हृद्यवेषधृक् ॥२४॥ स्त्रीभिः कामगयानेन किंकिणीजालमालिना
क्रीडन्न वेदात्मपातं सुराक्रीडेषु निर्वृतः ॥२५॥

मस्तत्वेन स्वभावस्तत्त्वं तस्मात् कृषिर्यथा बहुविघ्ना तद्वत्सुखदुःखत्वेन श्रुतमपि निष्फलं ॥२१॥ विघ्नैर्वैगुण्याद्यभावमंगीकृत्यापि
नाशदुःखं निष्परिहरमित्याह अंतरायैरिति पंचभिः ॥ निर्जितं साधितं ॥२२॥ यज्ञैः देवता इंद्रादिरूपा इष्ट्वा ॥२३॥ स्वपुण्यैरेवोपचिते स
र्वभोगसंपन्ने देवीनां मध्ये विहरन् गंधर्वैरुपगीयते ॥२४॥ कामेन इच्छया गच्छता विमानेन किंकिणीजालमालिना क्षुद्रघंटिकास
मूहशोभिना सह स्त्रीभिः सुराक्रीडेषु नंदनादिषु क्रीडन् आत्मपातं न वेद ॥२५॥ राम राम

राम
५१
४४

कालेन चालितः पालितः ॥२६॥ प्रवृत्तिर्द्विविधा विधिप्रवृत्तसरेण काम्ये कर्मणि स्थितत्वं येनेन अधर्मे कृतत्व काम्ये प्रवृत्तेर्गतिरुक्ता अधर्म
प्रवृत्तेर्गतिमाह यदिति जियदिवेतान्वयः ॥ अजितेंद्रियत्वात्कामात्मा अतः कृपणः अतो लुब्धः भोगतृष्णाकुलः अतः स्त्रैणः स्त्रीलंपटः
तदर्थं भूतविहिंसकः ॥२७॥ किंच दुष्टजनप्रलोभितो धनाद्यर्थं पशून विधिनादत्त्वा तमः स्थावरतां याति ॥२८॥ एवं कर्मस्तु प्रवृत्तस्य नस्त
त्वं न च निवृत्तिरिति उपसंहरति कर्माणीति ॥२९॥ तथापि लोकानां नित्यत्वात्समस्त धर्मत्वाच्च लोकपालानां च सुखमस्तीति चेन्नेत्या
ह लोकानामिति ॥ द्वौ परार्धौ परमायुर्यस्य तस्य ब्रह्मणोपि ॥ तथा च श्रुतिः भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्च

तावत्स प्रमोदते स्वर्गे यावत्पुण्यं समाप्यते ॥ क्षीणपुण्यः पतत्यर्वागनिच्छन्कालचालितः ॥२६॥ यद्यधर्मरतः संगाद
सतां वाजितेंद्रियः ॥ कामात्मा कृपणो लुब्धः स्त्रैणो भूतविहिंसकः ॥२७॥ पशूनविधिनालभ्य प्रेतभूतगणान्यजन्
नरकानवशो जंतुर्गत्वा यात्युल्बणं तमः ॥२८॥ कर्माणि दुःखोदर्काणि कुर्वन्देहेन तैः पुनः ॥ देहमाभजते तत्र किं
सुखं मर्त्यधर्मिणः ॥२९॥ लोकानां लोकपालानां मद्भयं कल्पजीविनां ॥ ब्रह्मणोपि भयं मत्तो द्विपरार्धपरायु
षः ॥३०॥ गुणाः सृजंति कर्माणि गुणोनुसृजते गुणान् ॥ जीवस्तु गुणसंयुक्तो भुंक्ते कर्मफलान्यसौ ॥३१॥

सत्वादि

द्रश्च मृत्युर्धावति पंचम इति ॥ अतः प्रवृत्तिमार्गस्यैवमनर्थहेतुत्वाद्धिरं तयानंतो निवृत्तिरेव युक्तेति तात्पर्यार्थः ॥३०॥ एतेनैवस्वयमी
श्वरत्वाविकारेणोम्यराभावं गीकारः परित्यक्तः अन्यदपि प्रोढ्यान्स्वदेमं गीकृतं निराकरोति चतुर्भिः ॥ तत्र यदुक्तं कर्तृभोक्तृस्वरूपत्वात्मे
ति तन्निराकरोति गुणा इति ॥ गुणाः इंद्रियाणि कर्माणि सृजंति न त्वात्मा आत्मैवेंद्रियाणि प्रवर्तयन्कर्माणि करोतीति चेन्नेत्याह गुणा इति गुणाः
सत्वादिः गुणानिंद्रियाणि अनुसृजते प्रवर्तयति न त्वात्मा अतः आत्मनः कर्तृत्वं नास्ति भोक्तृत्वमप्यौपाधिकमित्याह जीवस्त्विति गुण
संयुक्तः इंद्रियादिसंयुक्तः उ तत्र उक्तं तत्र आरु अस्तीति नेष्टुं हंकारस्यानित्यर्थः ॥३१॥

श्री
भा॰टी॰
४२
९
४५

यच्चोक्तं नानात्वमात्मनः तदप्यौपाधिकमित्याह यावदिति ॥ गुणानां वैषम्यं अहंकारादिकार्यरूपं नन्वात्मन एकत्वे कथं पारतंत्र्यमुक्तं कथं वा लोकपालादीनामपि भयमित्युक्तं तत्राह नानात्वमिति ॥ ३१ ॥ यद्याप्येवमभिप्रेतं प्रवृत्तिरेव श्रेयसीति तत्राह य एतदिति ॥ एतद्गुणवैषम्यं तत्कृतं भोगं कर्म वेत्यर्थः उपासीरन् सेवेरन् लोकादीनामनित्यत्वात् शुचार्पिताः प्राप्ताः संतो मुह्यंतीति ॥ ३२ ॥ न केवलमनित्यतामात्रं किंतु मायामयत्वमपीत्याह काल इति ॥ स्वभावो देवत्वादिपरिणामहेतुः धर्मस्तद्भोगकारणं गुणव्यतिकरे मायाक्षोभे सति मामेव प्राहुः ॥ ननु मद्यति

यावत्स्याद्गुणवैषम्यं तावन्नानात्वमात्मनः ॥ नानात्वमात्मनो यावत्पारतंत्र्यं तदेव हि ॥ ३१ ॥ यावदस्यास्वतंत्रत्वं तावदीश्वरतो भयं ॥ य एतत्समुपासीरंस्ते मुह्यंति शुचार्पिताः ॥ ३२ ॥ काल आत्मागमो लोकः स्वभावो धर्म एव च ॥ इति मां बहुधा प्राहुर्गुणव्यतिकरे सति ॥ ३३ ॥ उ॰ व॰ च॰ गुणेषु वर्तमानोपि देहजेष्वनपावृतः ॥ गुणैर्न बध्यते देही बध्यते वा कथं प्रभो ॥ ३४ ॥

३४

रिक्ताः संति ततो निवृत्तिरेव मत्तोक्तेर्हेतुत्वात् श्रेयसीति प्रसिद्धं ॥ ३४ ॥ एवं तावदेक एवात्मा तस्य च गुणकार्यदेहसंबंधकृतः संसारः आत्मज्ञानाच्च मुक्तिरित्युक्तं विलक्षणः स्थूलसूक्ष्मादिन्यादिना तदेव च मतांतरनिरासेन दृढीकृतं अथैषामित्यादिना तत्र पृच्छति गुणेष्विति अयमर्थः गुणेषु सत्त्वमुक्तिः सर्वैरेव वाच्या ज्ञानसाधनाभावान्न मुक्तिः द्वितीये च गुणेषु वर्तमानोपि तत्कार्यदेहजेषु कर्मसु स्वत्वा दिषु कथं न बध्यते न पापितैराकाशवदनावृतत्वान्न बध्यत इति चेन्न दिवंधोन संभवतीत्याह अनपावृतः कथं बध्यत इति यदि तु सत्त्वेव तत्र हंकारेणैव बध्यते न निवृत्त्या च मुच्यत इति मतं ॥ ३५ ॥ राम राम राम

राम
४२
४५

नर्हि तत्कथं ज्ञातव्यमिति एकेति बद्धो मुक्तो वा कथं वर्तेतेत्यादि किं भुंजीत कथं भुंजीतेत्यर्थः ॥ ३६ ॥ एतदिति एतद्विषयं प्रश्नं किं च एकस्या
वात्मानादिगुणसंबंधान्नित्यबद्धः मुक्तेजेन्यत्वे नित्यत्वप्रसंगान्नित्यमुक्त इत्यप्यंगीकार्यं स्यात् तत्र मे भ्रमो भविष्यतीत्याह नित्यबद्ध इति
१२ ३ श्री भा श प श ध्या ॥१०॥ एकादशे तु मुक्तानां बद्धानां चापि लक्षणं ॥ साधूनां च तथा भक्तेर्लक्षणं ददिवोदितं
नित्यबद्धो नित्यमुक्त एक एवेति मे भ्रम इति उक्तेन किं वस्तुतो विरोधात् प्रतीतितो वानाद्यबंधमोक्षयोर्वास्तवत्वाभावादित्याह
बद्धो मुक्त इति द्वाभ्यां ॥ आत्मा बद्धो मुक्तश्च मे गुणतः मदधीनसत्त्वादिगुणोपाधितः न तु वस्तुतः नत्वौपाधिकत्वेपि तंतुलपाकादिव

कथं वर्तेत विहरेत्कैर्वा ज्ञायेत लक्षणैः ॥ किं भुंजीतोत विसृजेच्छयीतासीत याति वा ॥ ३६ ॥ एतदच्युत मे ब्रूहि प्रश्नं प्र
श्नविदां वर ॥ नित्यमुक्तो नित्यबद्ध एक एवेति मे भ्रमः ॥ ३७ ॥ ३ श्री ग ते हा रा ए द स्कं श्री
भगवदुद्धवसंवादे श ध्या १० श्री ग उ च बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः ॥ गुणस्य
मायामूलत्वान्न मे मोक्षो न बंधनं ॥ १ ॥ शोकमोहौ सुखं दुःखं देहापत्तिश्च मायया ॥ स्वप्नो यथात्मनः ख्यातिः संसृतिर्न तु
वास्तवी ॥ २ ॥

द्वास्तवत्वं किं न स्यात् तत्राह गुणस्य मायामूलत्वाद्बंधनं नास्ति अत एव मोक्षश्च नास्तीति ॥ ननु कथं सर्वशास्त्रविरुद्धमुच्यते तत्राह इ
ति मे व्याख्येति एवं मत्कृतो निर्णयः अलमति उत्तैरित्यर्थः अथ चैवमन्वयः आत्मा बद्धो मुक्त इति याव्याख्या ७ किं सा मे गुणतः म
द्गुणपारवतंत्र्यादेव देहत्वे न गुणनियंतरीस्य स्वि किं सत्तद्वा निरेकमाह ॥ अत एव न मे बंधनं न मोक्षश्चेति अन्यत्सामान्यं ॥ १ ॥ एवं कारणाभ्यस्तगु
णानां मायामयत्वात्तत्कार्यं संसृतिर्मायेति प्रपंचयति शोकमोहाविति ॥ यथा स्वप्न आत्मनः बुद्धेर्वख्यातिः विवर्तः न तु तत् ॥ २ ॥

श्री भा॰ टी॰ ११ ४३ ४९

अतो बद्धमुक्तविरोधस्तावन्नास्ति प्रतीतिस्त्वौपाधिकी घटत इत्याह विद्याविद्ये इति ॥ नन्वेते मोक्षबंधावाभ्यामिति तत्तनू शक्ती अतः मे मायया वि-
निर्मिते मायाया उत्तरत्वात् ॥ बंधमोक्षकरी न त्वेकवचनेन द्विवचनार्थे ननु तत्कार्यत्वे बंधमोक्षयोरनादित्वनित्यत्वेन स्यातां ॥ नत्राद्ये अ-
नादी अतो विद्यां यावत्स्वं वर्तयामि तावद्बंधः यदा विद्योदयस्तदा मोक्षः स्फुरतीत्यर्थः तथा च स्कंदपुराणे ॥ बंधको भवपाशेन
भवपाशाच्च मोचकः ॥ कैवल्यदः परं ब्रह्म विष्णुरेव सनातन इति ॥ ३ ॥ तत्र शरीरिणामिति बहुवचननिर्देशाद्विषयभेदेनाविरो-
धत्वमाह इति भ्रांतिं व्यावर्तयन् बंधमोक्षव्यवस्थामुपपादयति एकस्यैवेति ॥ तर्हि किमात्माभेदान्न वापि बंधः न हीत्याह अंशस्य जीवस्ये-

विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणां ॥ बंधमोक्षकरी आद्ये मायया मे विनिर्मिते ॥ ३ ॥ एकस्यैव ममांश-
स्य जीवस्यैव महामते ॥ बंधोऽस्याविद्ययानादिर्विद्यया च तथेतरः ॥ ४ ॥ ॥ राम ॥

चेति नन्वात्माभेदे जीवो नाम कोऽन्योऽस्ति कथं च बंधमोक्षसुखदुःखादिव्यवस्था तत्राह ॥ ममांशस्यायं भावः यथैकस्यापि चंद्रादेर्जे-
लाद्युपाधिना बिंबप्रतिबिंबरूपो भेदः तथा तत्र जलादिकृताः कंपादयः प्रतिबिंबस्यैव यथा च तत्र प्रतिबिंबानामप्युपाधिभेदेन भे-
दादेकस्मिन् बुद्बुदे भग्ने तत्रत्यप्रतिबिंबस्यैव बिंबैक्यं नान्यगतस्य तथा विद्यायां प्रतिबिंबितस्य मदंशस्य जीवस्यैव तत्कृतो बंधः त-
स्यैवोपाधिनाभेदान्न व्यवस्थेति ॥ तथा चाहुः ॥ यथैकस्मिन् घटाकाशे रजोधूमादिभिर्युते ॥ न सर्वे संप्रयुज्यंते तथा जीवाः सुखादिभि-
रिति ॥ एतच्चातिरहस्यत्वबुद्ध्या निश्चित्य नव्यमिति संबोधयति हे महामते ॥ इतरो मोक्षः ॥ ४ ॥ राम ॥ राम

राम ४३ ४९

चै॰ २

तदेवं बद्धस्यानुपपाद्य कथं वर्तेतेत्यादि वैलक्षण्यप्रश्नस्योत्तरमाह अथेति ॥ तच्च वैलक्षण्यं द्विविधं जीवेश्वरयोरेकं जीवानां चैकं तत्र जीवेश्वरयोर्वैलक्षण्यमाह विरुद्धधर्मिणोरिति सार्धद्वयेन शोकानंदधर्मवतोः ॥ एकस्मिन्धर्मिणि शरीरे नियम्यनियंतृत्वेन स्थितयोः ॥५॥ तदेव रूपयति ॥ सुपर्णौ शोभनपक्षिणाविव देहात्पृथग्भूतौ सदृशौ चिद्रूपत्वात् सखायाववियोगादेकमंत्याश्रयदृक्ष्या निरूढयामाय या हृच्चैतेरुतिरुहोपमो देहः ॥ ऊर्ध्वमूलमवाक्शाखं वृक्षं यो वेद संप्रतीति श्रुतेः ॥ ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययमिति स्मृतेश्च तस्मिन्वृक्षे नीडं निकेतनं हृदयं समं यथा भवति तयोर्मध्ये एको जीवः पिप्पलान्नं पिप्पलोपमस्यादेहस्य तस्मिन्नदनीयं कर्मफलमित्यर्थः ॥ स्वाद

अथ बद्धस्य मुक्तस्य वैलक्षण्यं वदामि ते ॥ विरुद्धधर्मिणोस्तात स्थितयोरेकधर्मिणि ॥५॥ सुपर्णावेतौ सदृशौ सखायौ यदृच्छयैतौ कृतनीडौ च वृक्षे ॥ एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोपि बलेन भूयान् ॥६॥ आत्मानमन्यं च स वेद विद्वानपिप्पलादो न तु पिप्पलादः ॥ योऽविद्यया युक् स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः ॥७॥

ति भक्षयति अन्यः ईश्वरो निरन्नः अभोक्तापि निजानंदस्वरूपेण बलेन ज्ञानादिशक्त्या भूयानधिकः ॥ श्रुतिश्च ॥ द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ॥ तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीति ॥ ६ ॥ बलाधिक्यमेवाह आत्मानमिति ॥ अतः यः अविद्यया युक् युक्तः स तु नित्यबद्धः अनादिबद्धः यस्तु विद्याप्रधानः स तु नित्यमुक्तः मायाया अनावरकत्वात् आश्रययामोहकत्वाच्च ॥ ७ ॥ ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम

इदानीं बद्धमुक्तजीवानामेव मिथो वैलक्षण्यमाह देहस्थोपीति दशभिः ॥ विद्वान्मुक्तः संस्कारवशेन देहस्थोपि देहस्थो न भवति ॥ यथा स्वप्नादुत्थितः स्मर्यमाणः स्वप्नदेहे स्थितोपि तत्रस्थो न भवति तद्गतसुखदुःखाद्यभावात् तद्वत्तथा वस्तुतः अदेहस्थोपि कुमतिः अविद्वान्देहस्थः तन्निमित्तसुखदुःखभाक् यथा स्वप्नदेहगत इति ॥८॥ अत्र देहत्वेन वैलक्षण्यं तमाह द्वाभ्यां ॥ इंद्रियैरिंद्रियार्थेषु गृह्यमाणेष्वपि यस्त्वविद्वान् स नाहं कुर्यात् अहं गृह्णामीति मतिं न कुर्यादित्यर्थः ॥ कुतः गुणैरिन्द्रियैः गुणेषु विषयेषु गृह्यमाणेषु अविक्रियः

देहस्थोपि न देहस्थो विद्वान्स्वप्नाद्यथोत्थितः ॥ अदेहस्थोपि देहस्थः कुमतिः स्वप्नदृग्यथा ॥८॥ इंद्रियैरिंद्रियार्थेषु गुणैरपि गुणेषु च ॥ गृह्यमाणेष्वहं कुर्यान्न विद्वान्यस्त्वविक्रियः ॥९॥ दैवाधीने शरीरेस्मिन्गुणभाव्येन कर्मणा ॥ वर्तमानोबुधस्तत्र कर्तास्मीति निबध्यते ॥१०॥ एवं विरक्तः शयन आसनाटनमज्जने ॥ दर्शनस्पर्शनघ्राणभोजनश्रवणादिषु ॥११॥

रागादिष्वन्यः ॥ तदुक्तं गीतासु ॥ तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ॥ गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते इति ॥९॥ अबुधस्तु पूर्वकर्माधीने शरीरेस्मिन्वर्तमानः गुणैरिंद्रियैर्भाव्येन कर्मणा तत्र देहादौ निबध्यते कुतः कर्तास्मीत्यहंकारेण ॥ तदुक्तं तत्रैव ॥ प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ॥ अहंकारविमूढात्मा कर्ताहमिति मन्यते ॥१०॥ एतैस्त्रिभिः कथं वर्तेतास्पष्टस्वप्नसुखदुःखस्पृष्टो निरभिमानश्च देहे वर्तेतेत्युक्तं भवति वैलक्षण्यांतरं वदन्विविक्तं भुंजीतेत्यादिप्रश्नांतरमाह एवमिति त्रिभिः ॥ देहगतमेव कर्म मां बध्नातीत्येवं विरक्तो विद्वान् ॥१

२ तथाविद्वान्वाशयनासनादिषुनबध्यतेइत्याह

२ तत्रतत्रविषयेषुगुणानिंद्रियाण्यादयन्भोजयन्तत्साक्षित्वेनवर्तमानः नतुस्वयमदन् एतदेवाह प्रकृतिस्थोपीतिसार्धेन यथाखं सर्वत्रस्थितमपिनसज्जते यथासविताजलेषुप्रतिबिंबितोपि यथानिलः सर्वत्रसंचरन्नपितद्वत् ॥१२॥ असंगेनवैराग्येणशितयातीक्ष्णया छिन्नाः संशयाः असंभावनादयोयस्यसः नानात्वाद्देहादिप्रपंचात् ॥१३॥ कथंविवर्तेदित्यस्योत्तरत्वेनदेहलक्षणपातरमाह यस्यस्युरिति ॥ तद्गुणैः देहगुणैः संकल्पशून्याभिः प्राणादिवृत्तिभिः विमुक्तइत्यर्थः ॥१४॥ एवंतावद्बद्धमुक्तयोः स्वसंवेद्यमेवदेहलक्षणमुक्तं

नतथाबध्यतेविद्वांस्तत्रतत्रादयन्गुणान् ॥ प्रकृतिस्थोप्यसंसक्तोयथाखंसवितानिलः ॥१२॥ वैशारद्येक्षयासंगशितयाछिन्नसंशयः ॥ प्रतिबुद्धइवस्वप्नान्नानात्वाद्विनिवर्तते ॥१३॥ यस्यस्युर्वीतसंकल्पाः प्राणेंद्रियमनोधियां ॥ वृत्तयः सविनिर्मुक्तोदेहस्थोपिहितद्गुणैः ॥१४॥ यस्यात्माहिंस्यतेहिंस्रैर्येनकिंचिद्यदृच्छया ॥ अर्च्यतेवाक्वचित्तत्र नव्यतिक्रियतेबुधः ॥१५॥ नस्तुवीतननिंदेतकुर्वतःसाध्वसाधुवा ॥ वदतोगुणदोषाभ्यांवर्जितःसमदृङ्मुनिः ॥१६॥

इदानीमन्यैर्ज्ञायमानंलक्षणमाह यस्यात्मेतित्रिभिः ॥ हिंस्रैर्दुर्जनैरन्यैर्वाप्राणिभिः यस्यात्मादेहः पीड्यते यदृच्छयायेनकेनापि क्वचित्किंचिदर्च्यतेवा सबुधस्तत्रनव्यतिक्रियते नातिविक्रियतइत्यर्थः ॥ तदुक्तंयाज्ञवल्क्येन यःकंटकैर्वितुदति चंदनैर्यश्चलिंपति ॥ अक्रुद्धोपरितुष्टश्च समस्तस्यचतस्यचेति ॥१५॥ किंचसाध्वसाधुवाकुर्वतोवदतोवाजनान्नस्तुवीतनचनिंदेत ॥ योलोकिकव्यवहारविमुखः समदृगित्यर्थः ॥१६॥ ॥राम॥ ॥राम॥

श्री
भा टी
ए
४५
५८

अपि च न कुर्यादिति || यो देहादिकेष्वपि कर्मण्युदासीनः स मुक्तः इतरो बद्ध इत्यर्थः || १७ || एतान्येव सर्वाणि मुमुक्षोः साधनानि ज्ञातव्यानि यस्तु केवलं शब्दब्रह्मण्येवाभिज्ञः पांडित्यमानी न तु तैः साधनैः तदर्थनिष्ठो भवेत्तं निंदति || शब्दब्रह्मणि निष्णातः पारंगतोपि परे ब्रह्मणि निष्णायात् ध्यानाद्यभियोगं न कुर्यात् तस्य शास्त्रश्रमः श्रमैकफलः न तु पुरुषार्थपर्यवसायी अधेनुं चिरप्रसूतां || १८ || एतदेवान्यार्थनिदर्शनैः प्रपंचयति गामिति || दुग्धा इति दोहः पयः दुग्धो दोहः नोत्तरत्र दोहोस्ति यस्यास्तामर्थं अन्यामसतीं भार्यां का

न कुर्यान्न वदेत्किंचिन्न ध्यायेत्साध्वसाधु वा || आत्मारामोनया वृत्त्या विचरेज्जडवन्मुनिः || १७ || शब्दब्रह्मणि निष्णातो न निष्णायात्परे यदि || श्रमस्तस्य श्रमफलो ह्यधेनुमिव रक्षतः || १८ || गां दुग्धदोहामसतीं च भार्यां देहं पराधीनमसत्प्रजां च || वित्तं त्वतीर्थीकृतमंग वाचं हीनां मया रक्षति दुःखदुःखी || १९ || यस्यां न मे पावनमंग कर्म स्थित्युद्भवप्राणनिरोधमस्य || लीलावतारेप्सितजन्म वा स्याद्वंध्यां गिरं तां बिभृयान्न धीरः || २० || || राम ||

मप्यन्यां देहं पराधीनं प्रतिक्षणं दुःखदं असत्प्रजां दुष्टापत्यं पुत्रं अतीर्थीकृतं सत्पात्रे अदत्तं वित्तं दुष्कीर्तिदं विनाशि कष्टसंगं हे उद्धव दुःखादनंतरं दुःखमेव यस्य सः रक्षति || १९ || मया हीनां वाचमित्युक्तं विवृणोति || यस्यां मे जगतः शोधकं चरितं न स्यात् किं तत् अस्य विश्वस्य स्थित्यादिरूपं तद्धेतुरित्यर्थः लीलावतारेषु ईप्सितं जगतः प्रेमास्पदं श्रीरामकृष्णादिजन्म वा न स्यात् तां निष्फलां गिरं धीमान् धारयेत् || २० ||

राम
४५
५८

उक्तं ज्ञानमार्गमुपसंहरति ॥ एवं निश्चित्य विचारेणात्मनि नानात्वभ्रमं देहाद्यध्यासं निरस्य निर्मलं मनो मयि सर्वगे परिपूर्णे समर्प्य संधाय
उपरमेत् किंचित् कुर्यात् न शास्त्रपांडित्यमात्रेणेत्यर्थः ॥२१॥ यद्यनीशः अशक्तः तर्हि आस्तामिदं मद्भक्त्यैव कृतार्थो भविष्यसीत्याह मयी
ति ॥२२॥ मदर्पणेन कर्मभिर्विशुद्धसत्त्वस्यांतरंगां भक्तिमाह श्रद्धालुरिति ॥ अभिनयन् व्यवयमनुकुर्वन् ॥२३॥ आचरन् सेवमानः ॥२४॥
ततश्चानेन प्रकारेण मयि सत्संगेन लब्धया भक्त्या स भक्तः मां य उपासिता ध्याता भवति स च ध्यानशीलः सद्भिर्दर्शितं विनिश्चितं स्वं वैने

एवं जिज्ञासयापोह्य नानात्वभ्रममात्मनि ॥ उपारमेत विरजं मनो मय्यर्प्य सर्वगे ॥२१॥ यद्यनीशो धारयितुं मनो ब्रह्म
णि निश्चलं ॥ मयि सर्वाणि कर्माणि निरपेक्षः समाचर ॥२२॥ श्रद्धालुर्मे कथाः शृण्वन् सुभद्रा लोकपावनीः ॥ गायन्ननु
स्मरन् कर्म जन्म चाभिनयन्मुहुः ॥२३॥ मदर्थे धर्मकामार्थानाचरन्मदपाश्रयः ॥ लभते निश्चलां भक्तिं मय्युद्धव सना
तने ॥२४॥ सत्संगलब्धया भक्त्या मयि मां य उपासिता ॥ स वै मे दर्शितं सद्भिरंजसा विंदते पदं ॥२५॥ उ व वा साधु
स्तवोत्तमश्लोक मतः कीदृग्विधः प्रभो ॥ भक्तिस्त्वय्युपयुज्येत कीदृशी सद्भिरादृता ॥२६॥ एतन्मे पुरुषाध्यक्ष लोका
ध्यक्ष जगत्प्रभो ॥ प्रणतायानुरक्ताय प्रपन्नाय च कथ्यतां ॥२७॥ ॥राम॥ राम

व मे परं स्वरूपं प्राप्नोति ॥२५॥ सत्संगलब्धया भक्त्येत्युक्तं तत्र संतो भक्तेषु विशेषं पृच्छति साधुरिति ॥ साधवः स्वमतिपरिकल्पिताः
संति बहवः ते तव कीदृशाः संमतः भक्तिरपि बहुधा लोके कीदृशी पुनस्त्वय्युपयुज्येत सद्भिश्च नारदादिभिरादृता ॥२६॥ एतच्च कथ्यतामि
दं चाविशिष्टं तवैव वक्तव्यमिति यस्माद्विष्करोति ॥ हे पुरुषाध्यक्षेत्यादिना ब्रह्मादिनियंतः ॥२७॥ ॥राम॥ ॥राम

श्री
भा टी
ए
४८
४९

अत्र हेतुः त्वमिति ॥ व्योमवदसंगः यतः प्रकृतेः परः स्वेच्छयात्तपात्तं पृथक्चरितमितं वपुर्येन सः ॥ २८ ॥ तत्र त्रिंशल्लक्षणैः साधुं निरूप
यति कृपालुरिति ॥ कृपालुः परदुःखासहिष्णुः सर्वदेहिनां केषांचिदप्यकृतद्रोहः तितिक्षुः क्षमावान् सत्यं सारं स्थिरं बलं यस्य सः अन
वद्यात्मा असूयादिरहितः सुखदुःखयोः समः यथाशक्ति सर्वेषामुपकारकः ॥ २९ ॥ कामैरहतमतिचित्तः दांतः संयतबाह्येंद्रियः मृदुः

तं ब्रह्म परमं व्योम पुरुषः प्रकृतेः परः ॥ अवतीर्णोसि भगवन्स्वेच्छयात्तपृथग्वपुः ॥ २८ ॥ श्री भ उ च ॥ कृपालुरकृत
द्रोहस्तितिक्षुः सर्वदेहिनां ॥ सत्यसारोनवद्यात्मा समः सर्वोपकारकः ॥ २९ ॥ कामैरहतधीर्दांतो मृदुः शुचिरकिंचनः ॥
अनीहो मितभुक्शांतः स्थिरो मच्छरणो मुनिः ॥ ३० ॥ अप्रमत्तो गभीरात्मा धृतिमाञ्जितषड्गुणः ॥ अमानी मानदः कल्यो
मैत्रः कारुणिकः कविः ॥ ३१ ॥

अकठिनचित्तः शुचिः सदाचारः अकिंचनः अपरिग्रहः अनीहः दृष्टक्रियाशून्यः मितभुक् लघ्वाहारः शांतः नियतांतःकरणः स्थिरः स्व
धर्मे मच्छरणः मदेकाश्रयः मुनिः मननशीलः ॥ ३० ॥ अप्रमत्तः सावधानः गभीरात्मा निर्विकारः धृतिमान्विपद्यपि अकृपणः जितष
ड्गुणः क्षुत्पिपासे शोकमोहौ जरामृत्यू षडूर्मयः एते जिता येन सः अमानी न मानकांक्षी अन्येभ्योपि मानदः कल्यः परबोधने दक्षः
मैत्रः अवंचकः कारुणिकः करुणयैव प्रवर्तमानः न दृष्टलोभेन कविः सम्यग्ज्ञानी ॥ ३१ ॥ राम राम

राम
४८
४९

किंचतदेवाज्ञायेत्यादिनाकथयति ॥ मयावेदरूपेणादिष्टानपिस्वधर्मान्संत्यज्ययोमांभजेतसोपिपूर्वोक्तवत्सत्तमः किमज्ञानान्नास्ति
कथाह्यानधर्माचरणेसत्वशुद्ध्यादीन्गुणान्विपक्षेदोषांश्चआज्ञायज्ञात्वापिमद्ध्यानविक्षेपकतयामद्भक्त्यैवसर्वंभविष्यतीतिदृढनिश्चयेनैव
धर्मान्संत्यज्य ॥ यद्वाभक्तिदार्ढ्येननिवृत्ताधिकारतयासंत्यज्य अथवाविडैकादशीरूपैकादश्युपवासानिनिवेद्यश्राद्धादयोयेभक्तिवि
रुद्धधर्मास्तान्संत्यज्येत्यर्थः ॥ ३२ ॥ किंचयावान्देशकालापरिच्छिन्नः यश्चसर्वात्मायादृशः सच्चिदानंदादिरूपः तंमांज्ञात्वाअज्ञात्वापि

आज्ञायैवंगुणान्दोषान्मयादिष्टानपिस्वकान् ॥ धर्मान्संत्यज्ययःसर्वान्मांभजेत्सचसत्तमः ॥ ३२ ॥ ज्ञात्वाज्ञात्वाथयेवैमां
यावान्यश्चास्मियादृशः ॥ भजंत्यनन्यभावेनतेमेयुक्ततमामताः ॥ ३३ ॥ मल्लिंगमद्भक्तजनदर्शनस्पर्शनार्चनं ॥ परिचर्या
स्तुतिप्रह्वगुणकर्मानुकीर्तनं ॥ ३४ ॥ मत्कथाश्रवणेश्रद्धामदनुध्यानमेवच ॥ सर्वलाभोपहरणंदास्येनात्मनिवेदनं ॥ ३५ ॥
मज्जन्मकर्मकथनंममपर्वानुमोदनं ॥ गीततांडववादित्रगोष्ठीभिर्मद्गृहोत्सवं ॥ ३६ ॥ यात्राबलिविधानंचसर्ववार्षिकप
र्वसु ॥ वैदिकीतांत्रिकीदीक्षामदीयव्रतधारणं ॥ ३७ ॥ राम राम राम राम

श्री यद्वाअशेषतःपुनःपुनर्ज्ञात्वाएकांतभावेनयेभजंतीति ॥ ३३ ॥ साधुलक्षणमुक्त्वाभक्तेर्लक्षणमाह मल्लिंगेत्यष्टभिः लिंगानिप्रतिमादीनि
॥ ३४ ॥ सर्वलाभोपहरणंसर्वस्यलब्धस्यमदर्पणं ॥ ३५ ॥ पर्वाणिजन्माष्टम्यादीनितदनुमोदनंतत्रसंतोषः ॥ ३६ ॥ बलिविधानंपुष्पोपहारादिस
मर्पणंसर्ववार्षिकपर्वसुचातुर्मास्यैकादश्यादिषुविशेषतः ॥ ३७ ॥ ॥ राम ॥ ॥ राम ॥ ॥ राम

उद्यानादिकरणेसामर्थ्येसतिस्वतः असतिचान्यैः संभूयमिलित्वाउद्यमः॥ उद्यानंपुष्पप्रधानं उपवनंफलप्रधानंवनं आक्रीडंक्रीडास्थानं
३८॥ संमार्जनंरजसोपाकरणं उपलेपः गोमयोदकादिभिरालेपनं सेकः नैरेवप्रोक्षणं मंडलवर्तनं स्वर्णलोभद्रादिकरणं मत्सद्म॥३९॥ स्वयम
न्येनवानिवेदितं नस्वीकुर्यात्॥ एतच्चसाधारणस्थावरविषयं गौचैरन्नादिविषयंवाभक्तपानुयायस्वमेव॥ तदेवाह॥ यद्भिर्मोसोपरासैरन्यदन्य

ममार्चास्थापनेश्रद्धासुतः संभूयचोद्यमः॥ उद्यानोपवनाक्रीडपुरमंदिरकर्मणि॥३८॥ संमार्जनोपलेपाभ्यां सेकमंडल
वर्तनैः॥ गृहशुश्रूषणंमह्यं दासवद्यदमायया॥३९॥ अमानित्वमदंभित्वं कृतस्यापरिकीर्तनं॥ अपिदीपावलो
कंमेनोपयुंज्यान्निवेदितं॥४०॥ यद्यदिष्टतमंलोके यच्चातिप्रियमात्मनः॥ तत्तन्निवेदयेन्मह्यं तदानंत्यायकल्पते॥४१॥
सूर्योग्निर्ब्राह्मणागावो वैष्णवः खंमरुज्जलं॥ भूरात्मासर्वभूतानि भद्रपूजापदानिमे॥४२॥ सूर्येतुविद्ययात्रय्या
हविषाग्नौयजेतमां॥ आतिथ्येनतुविप्राग्र्ये गोष्वंगयवसादिना॥४३॥ राम राम

लंपरिकीर्तितं॥ विष्णोर्नैवेद्यसिक्थेनपुण्यंतंडुजतांकलौ॥ हृदिरूपंमुखेनाम नैवेद्यमुदरेहरेः॥ पादोदकंचनिर्माल्यंमस्तकेयस्यसोच्यु
तइतिवचनात्॥ यद्वाअन्यस्मैनिवेदितंमांनोपयुंज्यात् मह्यंननिवेदयेत्॥ विष्णोर्निवेदितान्नेन यष्टव्यंदेवतांतरं॥ पितृभ्यश्चैवतद्दे
यंतदानंत्यायकल्पते॥ पितृशेषंतुयोदद्याद्धरयेपरमात्मने॥ रेतोधाः पितरस्तस्यभवंतिक्लेशभागिनइत्यादिवचनेभ्यः॥४२॥ इदानी
मेकादशपूजाधिष्ठानान्याह सूर्यइति॥ द्वयम्॥४२॥ अधिष्ठानभेदेनपूजासाधनान्याह सूर्यइतित्रिभिः॥ त्रय्याविद्ययास्तवैः रमस्थानादिना अग

वंधुसत्कृत्या वंधुसत्कारमानेन हृदि खे हृदयाकाशे मुख्यधिया प्राणदृष्ट्या तोये तोयादिभिर्द्रव्यैस्तर्पणादिना ॥४४॥ स्थंडिले मंत्रहृदयैः
रहस्यमंत्रन्यासैः ॥४५॥ सर्वाधिष्ठानेषु ध्येयमाह धिष्ण्येष्विति ॥ इति अनेन प्रकारेणैषु धिष्ण्येषु ॥४६॥ उक्ताया भक्तेः फलमाह इष्टा
पूर्तेनेति ॥ सद्भक्तिं दृढां भक्तिं अस्या भक्तेरंतरंगसाधनमाह ॥ उत्थं मत्स्मृतिः साधुसेवया भवति ॥ यद्वा मत्स्मृति ज्ञानं नतु स्मृतेर्दृढभक्तिं अ
तः पुंसः साधुसेवया मम ज्ञानं भवतीत्यर्थः ॥४७॥ ज्ञानभक्तिमार्गावुक्तौ तत्र ज्ञानमार्गादपि भक्तिमार्गः श्रेष्ठ इत्याह प्रायेणेति सत्संगेन यो

वैष्णवे बंधुसत्कृत्या हृदि खे ध्याननिष्ठया ॥ वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः ॥४४॥ स्थंडिले मंत्रहृदयैर्भो
गैरात्मानमात्मनि ॥ क्षेत्रज्ञं सर्वभूतेषु समत्वेन यजेत मां ॥४५॥ धिष्ण्येष्वित्येषु मद्रूपं शंखचक्रगदांबुजैः ॥ युक्तं च
तुर्भुजं शांतं ध्यायन्नर्चेत्समाहितः ॥४६॥ इष्टापूर्तेन मामेवं यो यजेत समाहितः ॥ लभते मयि सद्भक्तिं मत्स्मृतिः साधु
सेवया ॥४७॥ प्रायेण भक्तियोगेन सत्संगेन विनोद्धव ॥ नोपायो विद्यते सम्यक्प्रायणं हि सतामहं ॥४८॥ अथैतत्परमं गुह्यं
शृण्वतो यदुनंदन ॥ सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत्सखा ॥४९॥ इ श्री का श ध्ये भगवदुद्धवसंवादे एका
दशोध्यायः ॥११॥

भक्तियोगः तेन विनोपायः संसारतरणे न विद्यते सत्संगेनेत्यत्र हेतुमाह ॥ हि यस्मात्सतामहं प्रायणं प्रकृष्टमयनं आश्रयः अतः सत्संगो म
ग्यंतरंग इत्यर्थः ॥४८॥ इदानीं सांख्ययोगादीनि साधनांतराण्यपेक्ष्याणि सव्यभिचाराणि च ॥ सत्संगस्तु स्वतंत्र एव समर्थः फलाव्यभिचारी चे
ति वर्णयितुमाह अथेति ॥ एतद्गुह्यमात्मं परमं गुह्यं अतः शृण्विति त्यर्थः ॥४९॥ इ श्री ग ते का श धे का शो यः ॥११॥

लि २

श्री भा टी ० ४८ ५१

द्वादशे साधुसंगस्य महिमा वर्ण्यते परः । कर्मानुष्ठानतत्त्यागव्यवस्था च ततः परं ॥ नरोधयति न वशीकरोति योगः आसनप्राणायामादिः सांख्यं तत्त्वानां विवेकः धर्मः सामान्यतो हिंसादि स्वाध्यायो वेदजपः तपः कृच्छ्रादि त्यागः संन्यासः इष्टापूर्ते इष्टं च पूर्तं च तत्रेष्टमग्निहोत्रादि पूर्तं कूपारामादिनिर्माणं दक्षिणाशब्देन सामान्यतो दानं लक्ष्यते १ व्रतानि एकादश्युपवासादीनि यज्ञः देवपूजा छंदांसि र

श्री ग. उ १२ ॥ नरोधयति मां योगो न सांख्यं धर्म उद्धव ॥ न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणा ॥१॥ व्रतानि यज्ञश्छंदांसि तीर्थानि नियमा यमाः ॥ यथावरुंधे सत्संगः सर्वसंगापहो हि मां ॥२॥ सत्संगेन हि दैतेया यातुधानाः खगा मृगाः ॥ गंधर्वाप्सरसो नागाः सिद्धाश्चारणगुह्यकाः ॥३॥ विद्याधरा मनुष्येषु वैश्याः शूद्राः स्त्रियोंत्यजाः ॥ रजस्तमःप्रकृतयस्तस्मिंस्तस्मिन्युगे नघाः ॥४॥ बहवो मत्पदं प्राप्तास्त्वाष्ट्रकायाधवादयः ॥ वृषपर्वा बलिर्बाणो मयश्चाथ विभीषणः ॥५॥ सुग्रीवो हनुमानृक्षो गजो गृध्रो वणिक्पथः ॥ व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथापरे ॥६॥ तेनाधीतश्रुतिगणा नोपासितमहत्तमाः ॥ अव्रतातप्ततपसः सत्संगान्मामुपागताः ॥७॥ राम

हस्यमंत्राः अवरुंधे वशीकरोति ॥२॥ यातुधाना राक्षसाः ॥३॥ त्वाष्ट्रो वृत्रः कायाधवः प्रह्लादः ॥५॥ ऋक्षो जांबवान् गृध्रो जटायुः वणिक्पथः तुलाधरः व्याधो धर्मव्याधः यज्ञपत्न्यः दीक्षितभार्याः ॥६॥ तेषां सत्संगव्यतिरिक्तसाधनांतराभावमाह ते इति ॥ न अधीताः श्रुतिगणा यैस्ते न तदर्थं च न उपासिता महत्तमा यैस्ते तथा किंच अव्रता अतप्ततपसः न व्रतानि येषां न तप्तानि तपांसि येषां च ते च तथा सत्संगादिति सद्भिः संगो नाम मय्येव संग इत्यभिप्रेत्योक्तं ॥ यद्वा स्वसंगस्यापि सत्संगत्वं च द्योतते स्वस्यापि सत्त्वात् यद्वा मदीयसंगादित्यर्थः ॥७॥

राम ४८ ५१

तत्रवृत्रादीनांभवतुनामकथंचित्साधनांतरंगोपीप्रभृतीनांनान्यदस्तीत्याहकेवलेनेति || सत्संगलब्धेनकेवलेनैवभावेनप्रीत्यानगा यमलार्जुनादयःनागाःकालियादयः || यद्वातदानींतत्रसर्वत्रगुल्मादीनामपिभगवतिभावोस्तीतिगम्यते || तदुक्तंभगवतैव || अहोअ मीदेववरामरार्चितंपादांबुजंतेसुमनःफलार्हणं || नमंत्युपादायशिखाभिरात्मनस्तमोपहत्यैतरुजन्मयत्कृतं || इत्यादिसिद्धाःकृतार्थाः संतःईयुःप्राप्तुः || ८ || स्वप्राप्तेर्दुर्लभतामाहयमिति || योगादिभिःकृतप्रयत्नोपियंनप्राप्नुयात्तंमामीयुरित्यन्वयःपूर्वेण || अत्रचप्र

केवलेनहिभावेनगोप्योगावोनगामृगाः || येन्येमूढधियोनागाःसिद्धामामीयुरंजसा || ८ || यंनसांख्येनयोगेनदान व्रततपोध्वरैः || व्याख्यास्वाध्यायसंन्यासैःप्राप्नुयाद्यत्नवानपि || ९ || रामेणसार्द्धंमथुरांप्रणीतेश्वाफल्किनामय्यनु रक्तचित्ताः || विगाढभावेननमेवियोगतीव्राधयोन्यंददृशुःसुखाय || १० || तास्ताःक्षपाःप्रेष्ठतमेननीतामयैववृंदा वनगोचरेण || क्षणार्धवत्ताःपुनरंगतासांहीनामयाकल्पसमाबभूवुः || ११ || राम || राम ||

यमंयमेष्यः(?)पश्चादयोवाश्रीहलिनेनसहसंगताःतेसंतःतत्संगोन्येषांसत्संगःतेनचतेषांभक्तिरितिज्ञातव्यं || ९ || गोपीनांभावंप्रपंचयतिरा मेणेतिचतुर्भिः || श्वाफल्किनाक्रूरेणमयिप्रणीतेसतिनमेमत्तोन्यंसुखायददृशुःकुतःवियोगेनतीव्रःसहआधिर्यासांताःअतएवतु मयिविगाढेनअतिदृढेनभावेनप्रेम्णाअनुरक्तानिप्रेमाणिचित्तानियासांताः || १० || तीव्राधिकत्वंव्यनक्तितास्ताइति || मयासहयाएवक्षपारात्र यःक्षणार्धवत्क्षीणाः || ताएवपुनर्मयाहीनानांतासांकल्पसमाबभूवुःकथंभूतास्तास्तावाचामगोचराइत्यर्थः || ११ || राम ||

संसक्रांति २

एवं तीव्राधयस्ता मोहमिवेणसमाधिं प्राप्ताइत्याह ताइति ॥ मयि अनुषंगेणासक्तयाबद्धाधियोयाभिस्ताः स्वमात्मानं स्वदेहमदः इदमस्थं इदं सन्निहितं च नाविदन् ॥ यद्वा स्वपतिपुत्रादि ममतास्पदं आत्मानमहंकारास्पदं अदः परलोकं इदं इमं लोकं च नाविदन्निति यथा मुनयः समाधौ नामरूपेन विदुः तद्वत् किंवत् अब्धितोयेन द्यइव मयि प्रविष्टा इत्यन्वयः ॥१२॥ एवं ता अबला मत्कामा अस्वरूपविदः स्वरूपं तं न जानंतितथापि मत्संगात् जारं ब्रह्मजारबुद्ध्यैव यमपि ब्रह्मस्वरूपमेव मां परमं प्रापुरित्यर्थः ॥ १३॥ यस्मादेवं श्रुतो महिमा जनस्य भावः तस्मात्त्वं

तानाविदन्मय्यनुषंगबद्धधियः स्वमात्मानमदस्तथेदं । यथा समाधौ मुनयोऽब्धितोये नद्यः प्रविष्टा इव नामरूपे ॥१२॥ मत्कामा रमणं जारमस्वरूपविदोऽबलाः ॥ ब्रह्म मां परमं प्रापुः संगाच्छतसहस्रशः ॥१३॥ तस्मात्त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनां ॥ प्रवृत्तिं च निवृत्तिं च श्रोतव्यं श्रुतमेव च ॥१४॥ मामेकमेव शरणमात्मानं सर्वदेहिनां ॥ याहि सर्वात्मभावेन मया स्याह्यकुतोभयः ॥१५॥ उ द्ध वा संशयः शृण्वतो वाचं तव योगीश्वरेश्वर ॥ न निवर्तत आत्मस्थो येन भ्राम्यति मे मनः ॥१६॥ राम राम राम

चोदनां श्रुतिः प्रतिचोदनां स्मृति च यद्वा विधिं च निषेधं च उत्सृज्य ॥१४॥ मां शरणं यायाहि मयैवाकुतोभयः स्याभव ॥१५॥ पूर्वं तावत्त्वम् यादितेषु वदितः स्वधर्मस्थित्यादिना कर्म कर्तव्यमित्युक्तं इदानीं तु सर्वं त्यक्त्वा मां शरणं यायाहीत्युच्यते ॥ तत्र किमात्मनः कर्तव्यमस्तिन वेत्यात्मस्थः आत्मविषयः संशयो न निवर्तते ॥ यद्वा कर्म कार्यं त्याज्यं वेत्यात्मस्थः हृदिस्थः संशयो न निवर्तते इति एवं कृति संशय इति येन संशयेन ॥१६॥

उत्तरं स एष इत्यष्टभिः ॥ अयं भावः ईश्वरस्तावत्स्वमायावशात्प्रपंचात्मना भाति तत्प्रपंचाध्यासाच्च जीवानामनाद्यविद्यया कर्तृत्वादि
तेनो विधिप्रतिषेधाधिकारः ॥ तदानीं सत्त्वशुद्ध्यर्थं कर्माणि कुर्यादित्युक्तं सत्त्वे च शुद्धे पुनः कर्मजाड्यपरिहाराय भक्तिविक्षेपककर्माणि
परित्यज्य दृढविश्वासेन मां भजेदित्युक्तं ॥ जातायां तु विद्यायां न किंचित्कर्तव्यमस्तीति तत्र तावदीश्वराद्धृगादीदिद्वारा जीवसंसृतिका
रणमुक्तं प्रपंचोद्गममाह सार्धैस्त्रिभिः ॥ स एष अपरोक्षः जीवयतीति जीवः परमेश्वरः अपरोक्षत्वे हेतुः विवरेषु आधारादिचक्रेषु
प्रसूतिर्विवरप्रसूतिरभिव्यक्तिर्यस्य सः तामेवाभिव्यक्तिमाह घोषेणेति घोषेणापराख्येन नादवता प्राणेन सह गुहां आधारचक्रं प्रवि

श्री ग गु च स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः ॥ मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति
स्थविष्ठः ॥१७॥ यथानलः खेऽनिलबंधुरूष्मा बलेन दारुण्यभिमथ्यमानः ॥ अणुः प्रजातो हविषा समिध्यते तथैव मे व्यक्ति
रियं हि वाणी ॥१८॥

ष्टः सन् मनोमयं सूक्ष्मरूपं पश्यंत्याख्यं मध्यमाख्यं च मणिपूरकचक्रे विशुद्धचक्रे च उपेत्य प्राप्य मात्रा ह्रस्वादिः स्वर उदात्तादिः वर्णः अका
रादिरित्येवं वैखर्याख्यः स्थविष्ठः अतिस्थूलः नानावेदशाखात्मको भवति ॥ तथा च श्रुतिः चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये म
नीषिणः ॥ गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो मनुष्या वदंतीति ॥ अभिव्यक्तिक्रमस्तु यास्कमित्रावरुणाभ्यामुच्चरंती त्रिषष्टिं वर्णानंतः प्र
करकारणैः प्राणसंगात्प्रसूयते ॥ तां पश्यंतीं प्रथममुदितां मध्यमां शुद्धिसंस्थां वा वक्त्रे करणविशदां वैखरीं च प्रपद्ये इति ॥१७॥ अस्य क्रमस्य सतः स्व
क्रमधमक्रमेणाभिव्यक्तौ दृष्टांतः यथेति ॥ यथाग्निः खे ऊष्मा अव्यक्तोष्मरूपः दारुणि अधिमथ्यमानः अनिलसहायः सन् अणुः सूक्ष्मविस्फु
लिंगादिरूपो भवति पुनः प्रवृद्धो जातो हविषा संवर्धते तथैवेयं वाणी मम अभिव्यक्तिः ॥१८॥ राम राम

वु

श्री
भा॰टी
ए
५०
५३

१ स्पर्शनं स्पर्शः

उक्तानामावृत्तिमुपसंहरन्नितरेंद्रियद्वन्निष्टुति दिशति एवमादिभिरिति ॥ गदिर्गदनं भाषणं मेव्यक्तिरित्युपसंहारः कर्मेहस्तयोरीह्नः गतिः पादयोः विस
र्गः पायूपस्थयोरिति कर्मेंद्रियाणां घ्राणः अवघ्राणं रसो रसनं दृक् दर्शनं श्रुतिः श्रवणमिति ज्ञानेन्द्रियाणां संकल्पो मनसः विज्ञानं बुद्धिचित्त
योः अभिमानोऽहंकारस्य सूत्रं प्रधानस्य सत्वरजस्तमसां विकारोऽधिदैवादिस्त्रिविधः प्रपंचः मेव्यक्तिरिति पूर्वेणैवान्वयः ॥१९॥ तस्मादीश्व
राभिव्यक्तिरूपः प्रपंचो नेश्वराद्भिन्नोऽस्तीत्याह अयमिति ॥ अयं जीवइव स्वस्यादावव्यक्तः एकएव वयसा कालेन विश्लिष्टा विभक्ता वागा
दीन्द्रियरूपाः शक्तयो यस्य यद्वा विशेषेण श्लिष्टा आलिंगिता मायाशक्तिर्येन सः बहुप्रकारइवाभाति यतः स एवायं विश्वतत्त्रिगुणाश्रयः

एवंगदिः कर्मगतिर्विसर्गो घ्राणोरसोदृक्स्पर्शनं श्रुतिश्च ॥ संकल्पविज्ञानमथाभिमानः सूत्रं रजःसत्वतमोविकारः ॥ १९ ॥
अयं हि जीवस्त्रिवृदब्जयोनिरव्यक्तएकोवयसासआद्यः ॥ विश्लिष्टशक्तिर्बहुधेवभाति बीजानियोनिंप्रतिपद्ययद्वत् ॥ २० ॥
यस्मिन्निदंप्रोतमशेषमोतंपटोयथातंतुवितानसंस्थः ॥ यएषसंसारतरुः पुराणः कर्मात्मकः पुष्पफलेप्रसूते ॥ २१ ॥

अब्जयोनिः लोकपद्मस्य कारणभूतः एकस्य बहुधाभाने दृष्टांतः योनिं क्षेत्रं प्रतिपद्य प्राप्य बीजानि यद्वदिति ॥२०॥ तस्मात्तन्मायाविलसि
तत्वात्तदाश्रयमिदं जगत् न ततः पृथगिति सदृष्टांतमाह यस्मिन्निति ॥ तंतुविताने संस्था स्थितिर्यस्य सः पटो यथा तथा यस्मिन्निदं विश्व
मोतं दीर्घतंतुषु पटइव प्रोतं तिर्यक्तंतुष्विव एवंभूतं तत्सम्यग्विद्यस्यात्मकं विश्वमविद्ययात्मन्यध्यस्तं हृद्वारूपं जीवस्य कर्तृत्वादिसंसाररूढः
अतस्तद्विवेकज्ञानेन कर्मादि सर्वं त्याज्यमित्युक्तमित्यभिप्रायेणाह यएषइति सार्धैस्त्रिभिः ॥ पुराणः अनादिः कर्मात्मकः इति स्वभा
वः पुष्पफले भोगापवर्गौ कर्मेतत्फलेवा प्रसूते जनयति ॥ २१ ॥

राम राम राम

राम
५०
५३

वृक्षरूपकेणवर्णयति हे इति ॥ हे पुण्यपापे अस्य बीजे सत्वशतमूलः शतं अपरिमितानि वासनामूलानि यस्य त्रयो गुणा नालानि प्रकांडाः यस्य पंच
भूतानि स्कंधाः यस्य पंच रसाः शब्दादि विषयाः तेषां प्रसूतिर्यस्मात् ॥ दश च एका च शाखाश्च इंद्रियाणि यस्य द्वयोः सुपर्णयोर्जीवपरमात्मनो
नीडं यस्मिन् ॥ त्रीणि वल्कलानि त्वचः वातपित्तश्लेष्माणो यस्य द्वे सुखदुःखे फले यस्य सः अर्कं प्रविष्टः सूर्यमंडलपर्यंतं व्याप्तः तं निर्भिद्य गत
तस्य संसाराभावात् ॥२२॥ तत्फलभोक्तॄनाह ॥ अदंतीति गृध्राः कामिनः ग्रामेचराः गृहस्थाः अस्य हृत्स्यैकं फलं दुःखमदंति परित्यागमतः

हे अस्य बीजे शतमूलस्त्रिनालः पंचस्कंधः पंचरसप्रसूतिः ॥ दशैकशाखो द्विसुपर्णनीडस्त्रिवल्कलो द्विफलोऽर्कं प्रविष्टः ॥ २२ ॥
अदंति चैकं फलमस्य गृध्रा ग्रामेचरा एकमरण्यवासाः ॥ हंसा य एकं बहुरूपमिज्यैर्मायामयं वेद स वेद वेदं ॥ २३ ॥ एवं गुरू
पासनयैकभक्त्या विद्याकुठारेण शितेन धीरः ॥ विवृश्च्य जीवाशयमप्रमत्तः संपद्य चात्मानमथ त्यजास्त्रं ॥ २४ ॥ ३ ॥ श्री
भा व म पु णे का श धे भगवदुद्धवसंवादे द्वा शो यः ॥१२॥ राम

द्वि
स्वर्गादिपितुः खस्वस्वरूपत्वात् हंसा विवेकिनः अरण्यवासाः संन्यासिनः एकं फलं सुखमदंति ॥ एकं परमात्मानं मायामयं पदं बहुरूपमिज्यैः प्र
ज्यैर्गुरुभिः ज्ञात्वा यो वेद स वेदं तत्त्वार्थं वेद ॥ २३ ॥ त्वं चैवं ज्ञात्वा अतः परं त्वं सर्वसाधनं त्यजेत्याह एवमिति ॥ एकांतभक्त्या शितेन तीक्ष्णेन कुठा
रेण एवं तेन ज्ञानेन वा वृक्षो जीवोपाधिं त्रिगुणात्मकं लिंगशरीरं विवृश्च्य छित्त्वा परमात्मानं च संपद्य प्राप्य अथास्त्रं साधनं त्यजेति ॥ २४ ॥
३ श्री ग ते का श धे द्वा ध्या ॥ १२ ॥ ॥राम॥ ॥राम॥ ॥राम॥

श्री
भा टी
९
५२
५८

त्रयोदशोऽध्यायस्तत्त्वस्पष्टञ्चाविद्योदयक्रमः ॥ हंसेतिहासतत्त्रिवर्गगुणविश्लेषवर्णनं ॥ विद्याऽत्मावेणजीवाशयंसंसृत्यासाधनंतत्त्वजेत्युक्तं
तत्त्वतत्त्वतमस्त्वादिगुणत्रयस्यत्रिप्रतिबंधमतिकथंविद्यात्मप्रतिरित्याशंकाननिवृत्त्याविद्योत्पत्तिप्रकारमाहसत्त्वमितित्रिभिः ॥ तत्त्रय
याणांदादिवदानंदादिगुणाःस्युःतदिततत्त्वरूपत्वात्तेषांगुणानांनिवृत्तिनेस्यात्ननत्वेतत्स्यादित्यादबुद्धेःप्रकृतेरेवतेगुणाःनत्वात्मनइति
अतःसत्त्वेनसत्त्ववृद्ध्यान्यतमोऽरुन्यात्रजस्तमोवृत्तीजयेदित्यर्थः ॥ सत्त्वंचसत्त्पदयादिरूपमुपशमात्मकेनसत्त्वेनैवहन्यात् ॥ १ ॥ ननु
गुणत्रयवृत्तीनांपरस्परोपमर्दरूपत्वात्कथंसत्त्ववृत्त्यैवेतरवृत्त्योर्नियमेनहंतव्यास्तत्राहसत्त्वादिति ॥ मद्भक्तिलक्षणयतियोधर्मःसमद्भ

श्रीभगवानुवाच ॥ सत्त्वंरजस्तमइतिगुणाबुद्धेर्नचात्मनः ॥ सत्त्वेनान्यतमौहन्यात्सत्त्वंसत्त्वेनचैवहि ॥ १ ॥ सत्त्वाद्धर्मोभवेद्वृ
द्धात्पुंसोमद्भक्तिलक्षणः ॥ सात्त्विकोपासयासत्त्वंततोधर्मःप्रवर्तते ॥ २ ॥ धर्मोरजस्तमोहन्यात्सत्त्ववृद्धिरनुत्तमः ॥ आशुन
श्यतितन्मूलोह्यधर्मउभयेहते ॥ ३ ॥ आगमोऽपःप्रजादेशःकालःकर्मचजन्मच ॥ ध्यानंमंत्रोऽथसंस्कारोदशैतेगुणहेतवः ॥ ४

किंरूपमेववाःसत्त्वमेवकथंवर्धेततत्राहसात्त्विकानांपदार्थानामुपासयासेवयासत्त्ववृद्धिर्भवतीत्यर्थः ॥ २ ॥ सचधर्मोरजस्तमसीहन्यात्कुतः
नदियतेउत्तमोयस्मात्ससदोत्तमःयतःसत्त्ववृद्धिःसत्त्वस्यवृद्धिर्यस्मात्तत्कारणोऽस्तःअतएवतत्कार्योधर्मप्रतिबंधोपिनास्तीत्याहतस्मिन्नुभ
यस्मिन्हतेतन्मूलस्तेरजस्तमसीरागद्वेषादिनाप्रमादालस्यादिनाचसमूलेयस्य ॥ ३ ॥ सात्त्विकोपासनयासत्त्वंवर्धतइत्युक्तंतानेवसत्त्ववृद्धिहेतू
न्दर्शयितुंसामान्यतोगुणत्रयवृद्धिहेतूनाह ॥ आगमंशास्त्रंअपःआपःक्वचिदागमोर्थइतिपाठःआगमःअधीतोवेदःअर्थःन्यायोपार्जितंवि
त्तंप्रजास्तत्पुत्रःदेशःकाश्मीरगंसंचारिप्रभृतिकालोवसंतादिकर्मआश्रमादिविहितंजन्मउभयकुलविशुद्धंध्यानंदेवताविषयंमंत्रंगायत्र्या

दिवंसक्तवेदगुणाधिनाकालातनासाक्षेत्रकालदेशःसंस्कारः ॥ ४

राम
५२
५८

एतेषामपि त्रैविध्यं हृद्गतानुष्ठानपरंपरया ज्ञातव्यमाह तस्मादिति ॥ एषु सात्विकादिनिर्णयमाह एषामेव मध्ये यद्वृद्धाः प्रचक्षते प्रशंसंति तद्यत्सात्विकं निं-
दंति तत्तामसं यत्तु वृद्धैरुपेक्षितं न स्तुतं न च निन्दितं तद्राजसं ॥५॥ निवृत्तिशास्त्राण्येव सेवेत न प्रवृत्तिपाखंडशास्त्राणि तीर्थोदकमेव न गंधोद-
कसुरादयः प्रजाजनाः निवृत्तानेव जनान्न प्रवृत्तान्दुराचारान् विविक्तदेशं न रथ्याद्युतदेशान् कालं ब्राह्ममुहूर्तादिकं ध्यानादौ न प्रदोषनि-
शीथादीन् कर्म च ॥ नित्यं न काम्याभिचारादीनि जन्म च वैष्णवशैवदीक्षालक्षणं न शाक्तक्षुद्रदीक्षारूपं ध्यानं श्रीविष्णोर्गुरोर्वा न का-
मिनीविद्विषां मंत्रं प्रणवादिकं न काम्यक्षुद्रान् संस्कारमात्मनः शोधकं न तु केवलं देवगृहकारादीनां ॥ न तु ज्ञानं वाक्यश्रवणादेवान्य

तत्तत्सात्विकमेवैषां यद्यद्वृद्धाः प्रचक्षते ॥ निंदंति तामसं तत्तद्राजसं तदुपेक्षितं ॥५॥ सात्विकान्येव सेवेत पुमान्सत्ववि-
वृद्धये ॥ ततो धर्मस्ततो ज्ञानं यावत्स्मृतिरपोहनं ॥६॥ वेणुसंघर्षजो वह्निर्दग्ध्वा शाम्यति तद्वनं ॥ एवं गुणव्यत्ययजो
देहः शाम्यति तत्क्रियः ॥७॥ उ व वा विदंति मर्त्याः प्रायेण विषयान्पदमापदां ॥ तथापि भुंजते कृष्ण तत्कथं श्व

यते ॥ किं तत्र सत्ववृद्ध्या धर्मेण वा अत आह यावत्स्मृतिः आत्मापरोक्ष्यं यावच्च देहद्वयतत्कारणभूतगुणापोहः तावत्पर्यंतं ज्ञानं भवती-
त्यर्थः ॥६॥ ननु गुणव्यतिकराज्जातो देहः कथं स्वाश्रयस्तान्गुणान्स्वतएवोत्पत्त्याविद्ययापोह्य स्वयमप्युपरमेत तत्राह ॥ वेणूनां सं-
घर्षणाज्जातो वह्निः यथा स्वतएवोत्पन्नाभिर्ज्वालाभिस्तद्वनं सर्वं दग्ध्वा स्वयं शाम्यति ॥ एवं देहोपि तत्क्रियः तस्याग्नेरेव क्रिया व्यापारो य-
स्य सः ॥७॥ ननु नियतेंद्रियतया सात्विकसेवया मियानविपुरुषार्थस्तथापि राजसादीन्विषयान्दुःखमिति जानंतोपि कुर्वंत्येवं न तु त्यज-
ंतीति विदंतीति ॥ पदं स्थानं श्वा यथा भर्त्स्यमानोपि खरो यथा पदाहन्यमानोपि खरीमनुधावति अजो यथा निर्लज्जो दंतुमानीतो-
पि तद्वत् ॥८॥

श्री भा टी ११ ५२

मिथ्याभिनिवेशेन युंजते इति सद्दृष्टकमाह त्रिभिः॥ प्रमत्तस्य विवेकशून्यस्य देहादावहमिति मिथ्याबुद्धिः हृदि यथा व उत्सर्पति ततो ऽहं बुद्धेश्च वैकारिकं सत्वप्रधानमपि मनः प्रतिघोरदुःखात्मकं रजः उत्सर्पति मनो व्याप्नोतीत्यर्थः॥९॥ इदमेवं भोग्यमिति सविकल्पः संकल्पः स्यात् ततश्च॥ अहो रूपमहो भाव इति गुणध्यानाद् दुर्धरः कामः स्यात्॥१०॥ ततो विषयान्भोक्तुं कर्माणि करोति॥११॥ एवं चेत्कस्यापि दुःखनिवृत्तिः स्यादित्याशंक्याह॥ यद्यपि रजस्तमोभ्यां विक्षिप्तधीर्मूढधीश्च तथापि विद्वान् विवेकी पुनः मनो

इदमेवं २

५५

श्री ग उ च॥ अहमित्यन्यथाबुद्धिः प्रमत्तस्य यथा हृदि॥ उत्सर्पति रजो घोरं ततो वैकारिकं मनः॥९॥ रजोयुक्तस्य मनसः संकल्पः सविकल्पकः॥ ततः कामो गुणध्यानाद्दुःसहः स्याद्धि दुर्मतेः॥१०॥ करोति कामवशगः कर्माण्यविजितेंद्रियः॥ दुःखोदर्काणि संपश्यन् रजोवेगेन मोहितः॥११॥ रजस्तमोभ्यां यद्यपि विद्वान्विक्षिप्तधीः पुनः॥ अतंद्रितो मनो युंजन्दोषदृष्टिर्न सज्जते॥१२॥ अप्रमत्तोऽनुयुंजीत मनो मय्यर्पयञ्छनैः॥ अनिर्विण्णो यथाकालं जितश्वासो जितासनः॥१३॥ एतावान्योग आदिष्टो मच्छिष्यैः सनकादिभिः॥ सर्वतो मन आकृष्य मय्यद्धाविश्यते मनः॥१४॥ उ व वा यदा त्वं सनकादिभ्यो येन रूपेण केशव॥ योगमादिष्टवानेतद्रूपमिच्छामि वेदितुं॥१५॥

निरुंधन्न सज्जते॥१२॥ विषयदोषदृष्ट्यापि मनो निरोधासक्तौ सत्यां दुःखं न तन्निरोधोपायमाह अप्रमत्त इति॥ अनिर्विण्णः अनलसः यथाकालं त्रिषवणं मयि परानंदरूपे अर्पयन् समदध्यात्॥१३॥ विषयैः संग्रथितस्य मनसस्तद्वियोगेन अस्य निष्ठत्वसंभावितं मन्यमानं प्रतिनिरूपणायेति हासमुपह्निय तिएतावानिति॥ यथावन्मय्याविश्यते उपायेतावानित्यर्थः॥१४॥ मच्छिष्यैरित्युक्ते स्तोषम इति ज्यायसां अनैश्वर्येण रूपेण निरूपणासंभवादाह यदेति॥ तं कालं तदेतद्रूपं च वेदितुमिच्छामि तत्कथयेति॥१५॥ राम

राम ५२

५५

मानसाः पुत्राः सूक्ष्मां दुर्ज्ञेयां एकांतिकीं गतिं परां काष्ठां ॥१६॥ तदेवाह गुणेष्विति ॥ विषयेषु स्वभावतो रागादिवशाच्चेतः प्रविशति
ते चास्य ता विषया वासनारूपेण चेतसि प्रविशंति अतितितीर्षुर्विषयानतिक्रमितुमिच्छोः ॥१७॥ महान्देवोपि स्वयंभूरपि भूतानां
स्रष्टापि ध्यायमानो विचारयन्नपि प्रश्नस्य बीजं यदज्ञानादयं प्रश्नः तन्नाविंदत यतः कर्मविक्षिप्तधीः ॥१८॥ प्रश्नस्य पारं तत्त्वमभि
प्रायोपि तस्य तितीर्षया जिज्ञासया हंसरूपेणेति यथा हंसो नीरं क्षीरं च पृथक्कर्तुं शक्तः एवमहं गुणांस्तत्त्वं चेति द्योतयितुं हंसरूपे

श्री भ उ व पुत्रा हिरण्यगर्भस्य मानसाः सनकादयः ॥ पप्रच्छुः पितरं सूक्ष्मां योगस्यैकांतिकीं गतिं ॥१६॥ स का
य ॥ ऊचुः गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रभो ॥ कथमन्योन्यसंत्यागो मुमुक्षोरतितितीर्षोः ॥१७॥ श्री भ उ
व ॥ एवं पृष्टो महादेवः स्वयंभूर्भूतभावनः ॥ ध्यायमानः प्रश्नबीजं नाभ्यपद्यत कर्मधीः ॥१८॥ स मामचिंतयद्देवः प्रश्न
पारतितीर्षया ॥ तस्याहं हंसरूपेण सकाशमगमं तदा ॥१९॥ दृष्ट्वा मां त उपव्रज्य कृत्वा पादाभिवंदनं ब्रह्माणमग्रतः
कृत्वा पप्रच्छुः को भवानिति ॥२०॥ इत्यहं मुनिभिः पृष्टस्तत्त्वजिज्ञासुभिस्तदा ॥ यदवोचमहं तेभ्यस्तदुद्धव निबोध मे ॥२१॥
वस्तुनो यद्यनानात्वमात्मनः प्रश्न ईदृशः ॥ कथं घटेत वो विप्रा वक्तुर्वा मे क आश्रयः ॥२२॥ ॥राम॥

णागतोस्मीति ॥२०॥ इत्यहं मुनिभिः पृष्ट इति पृथग्वाक्यं यदवोचमिति च पृथक् अतोस्मच्छब्दावृत्तिर्न दोषः तेभ्यो यदवोचं तन्ममैव वचनं नि
बोध ॥२१॥ देहादिविविक्तात्मज्ञाने सति तन्निष्ठस्य रागाद्यसंभवात् ॥ स्वयमेव विषयचेतसोर्विश्लेषो भवतीति वक्तुं प्रश्नखंडनमिषेणैव
तावदात्मानात्मविवेकमाह वस्तुत इति त्रिभिः ॥ किमात्मविषयोयं प्रश्नः तदुपाधेर्वा तत्संघस्य वा यद्यात्मनः तर्हि तस्य वस्तुतः पर
मात्मरूपस्य अनानात्वे सति हे विप्राः वः युष्माभिः कृत ईदृशः प्रश्नः वक्तुश्च निर्धारणमस्य कथं घटेत वक्तुः उत्तरदातुर्वा मम क आश्रयः
अविशेषे आत्मनि कं जातिगुणविशेषमाश्रित्य उत्तरं वक्ष्यामीत्यर्थः ॥२२॥

भूतसंज्ञविषयत्वेपि अयं वः प्रश्नः वाचारंभः वाङ्मात्रेणारब्धः यतोनर्थकः कुतः भूतेषु देवमनुष्यादिदेहेषु पंचभूतात्मकेषु अतः समानेषु अभिन्नेषु पुनश्च वस्तुतः परमकारणात्मना अभिन्नेषु वाचारंभविकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतेः ॥२३॥ ननु पंचभूतात्मकत्व पृथक्त्वादिसिद्धमेवेति परमकारणाभेदमिदमेवोपपादयति मनसेति मनआदिभिरिंद्रियैर्यद्गृह्यते तत्तदहमेवेत्यर्थः ॥ अंजसा तत्त्वविचारेणैवेतेनैव सर्वात्मकोहमित्यंजसाप्युत्तरस्तत्त्वेभवति ॥२४॥ एवं प्रश्नखंडनमिषेणैवात्मस्वरूपं सामान्यतो निरूप्य ब्रह्मणोपि पृष्टमिदं यत्तदुत्तरमाह गुणेष्वित्यादिना अध्यायसमाप्तिः ॥ अयमभिप्रायः यदि कर्तृत्वभोक्तृत्वादिरूपतया विषयैः संग्रथितं चित्तं

पंचात्मकेषु भूतेषु समानेषु च वस्तुतः ॥ को भवानिति वः प्रश्नो वाचारंभो ह्यनर्थकः ॥२३॥ मनसा वचसा दृष्ट्या गृह्यतेन्यै रपींद्रियैः ॥ अहमेव न मत्तोन्यदिति बुध्यध्वमंजसा ॥२४॥ गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रजाः ॥ जीवस्य देह उभयं गुणाश्चेतो मदात्मनः ॥२५॥ गुणेषु चाविशच्चित्तमभीक्ष्णं गुणसेवया ॥ गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेत ॥२६॥

गुणा आविशंत्येवाच्यमेव जीवस्य स्वरूपं भवेत् ततस्तद्वियोगो न घटेत तस्य तु स्वरूपमहं ब्रह्मैव चित्ताध्यासेन तु तत्तद्भावनया विषयैः संग्रथनं अतस्तस्य जीवस्य ब्रह्मत्वभावनया विषयाणां च मिथ्यात्वानुसंधानेन स चेतो निर्विषयं भगवंतं भजेत ॥ भवत्येवं परिग्रहणेन स्वरूपावस्थानमिति ॥ हे प्रजाः पुत्रकाः सत्त्वं गुणेषु चेत आविशति गुणाश्च चेतसि एवं गुणाश्चेतश्चोभयं ग्रथितं मदात्मनो ब्रह्मस्वरूपस्य जीवस्य देहः उपाधिस्ततः उपाधिर्न तु स्वरूपं ॥२५॥ तस्मादभीक्ष्णं पुनः पुनश्च गुणसेवया तत्संस्कारेण गुणेष्वाविशच्चित्तं ते च गुणाः पुनर्वासनारूपेण चित्तप्रकर्षेण भवंतीति तथा ते चित्तगुणाश्च पंचत्वयद्भयं तन्मद्रूपः सन्नुपजेत ॥२६॥

ननु जाग्रदाद्यवस्थावतः कुत ऐक्यं ब्रह्मस्वरूपता वा तत्राह ॥ जाग्रदिति जागरः सुषुप्तं चेति बुद्धेर्वृत्तयः न तु जीवस्य ता न स्वाभाविक्यः किं-
तु ॥ सत्त्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत् ॥ प्रस्वापं तमसा जंतोस्तुरीयं त्रिषु संततमिति ॥ वक्ष्यमाणक्रमेण गुणत एव जीवस्तु
विलक्षणः तदवस्थारहित एव विनिश्चितः कुतः तासां साक्षित्वेन ॥ २७ ॥ ननु तर्हि कथमहं जागर्मीत्यादिप्रतीतिस्तत्राह ॥ यर्हीति यस्मात्
सम्यक्संसृतिः सरणमनयेति संसृतिर्बुद्धिः तया बंधोयमात्मनो गुणवृत्तीर्ददाति ॥ यस्मान्मयि तुर्ये स्थितः सन् जीवः संसृतिबंधं जह्या-
त् तत्तदा चेतसा गुणेभ्यः गुणानां चेतसश्च अन्योन्यं त्यागो भवति ॥ २८ ॥ कथं संसृत्या बंधः कथं तं जह्यात्तदाह ॥ अहंकारेण कृतं बंधनं आ-

जाग्रत्स्वप्नसुषुप्तं च गुणतो बुद्धिवृत्तयः ॥ तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः ॥ २७ ॥ यर्हि संसृतिबंधोय-
मात्मनो गुणवृत्तिदः ॥ मयि तुर्ये स्थितो जह्यात्त्यागस्तद्गुणचेतसां ॥ २८ ॥ अहंकारकृतं बंधमात्मनोर्थविपर्ययं ॥ वि-
द्वान्निर्विद्य संसारचिंतां तुर्ये स्थितस्त्यजेत् ॥ २९ ॥ यावन्नानार्थधीः पुंसो न निवर्तेत युक्तिभिः ॥ जागर्त्यपि स्वपन्नज्ञः स्व-
प्ने जागरणं यथा ॥ ३० ॥ असत्वादात्मनोन्येषां भावानां तत्कृता भिदा ॥ गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा ॥ ३१ ॥

त्मनोर्थविपर्ययं आनंदाद्यावरणेनानर्थदं विद्वान् जानन्सन् निर्विद्य दुःखमेतदिति ज्ञात्वा तुर्ये स्थितो भूत्वा संसारे बुद्धिः तस्मिंश्चिंतामभिमानं
न कृतं भोगचिंतां च त्यजेदिति ॥ २९ ॥ यावदिदं न त्यजेत्तावत्तस्य कर्मज्ञानादिसर्वं व्यर्थमित्याह यावदिति ॥ यद्यपि जागर्ति कर्मादिषु तथापि स्वपन्
स्वप्नं पश्यन्निव भवति यतोऽज्ञः न सम्यग्दर्शी अत्र जागरत्वस्य स्वप्ने दृष्टांतः स्वप्नेति ॥ ३० ॥ ननु कथं वेदप्रतिपादितं वर्णाश्रमकर्मादिना नाधीः नि-
वर्तेत न अदृष्टमसदिति ॥ भावानां देहादीनां तत्कृता भिदा वर्णाश्रमादिरूपा गतयः स्वर्गादिफलहेतवः कर्माणि चास्यात्मनो मृषा अविद्यावद्विषयो
वेदस्त्विति भावः ॥ ३१ ॥

श्री
भा॰टी॰
ए
५४
५८

युक्तिमित्युक्तं तत्र एव युक्तीराह यदिति ॥ अर्थान्स्थूलान्देहादीन्समस्तकरणैस्तु जागरादिभिर्भुङ्क्ते कथंभूतान् अनुलक्षणधर्मिणः क्षणिकबाल्यतारुण्यादिधर्मवतः यश्च स्वप्ने हृदि जागरदृष्टसदृशान्वासनामयान्भुङ्क्ते यश्च सुषुप्ते तान्सर्वानुपसंहरति स एकः कुतः त्रिगुणवृत्तिद्रष्टृकस्य वदस्यात्रय इत्यत्र ॥ ननु जाग्रदवस्थायां सर्वेन्द्रियाणि पश्यंति स्वप्ने मनः सुषुप्तौ तत्संस्कारशेषा बुद्धिः कः ॥ [illegible] तत्राह इंद्रियेशः ननु इंद्रियेशा अपि विश्वतैजसप्राज्ञा भिन्नाः तत्कुतः स्मृत्या प्रतिसंधानेन सर्वावस्थास्वन्वयात् ॥ यः स्वप्नमद्राक्षं यश्चाने

योजागरे बहिरनुलक्षणधर्मिणोर्थान्भुङ्क्ते समस्तकरणैर्हृदि तत्सदृक्षान् ॥ स्वप्ने सुषुप्त उपसंहरते स एकः स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिंद्रियेशः ॥३२॥ एवं विमृश्य गुणतो मनसस्त्र्यवस्था मन्मायया मयि कृता इति निश्चितार्थाः ॥ संछिद्य हार्दमनुमानसदुक्तितीक्ष्णज्ञानासिना भजत माखिलसंशयाधिं ॥३३॥ ईक्षेत विभ्रममिदं मनसो विलासं दृष्टं विनष्टमतिलोलमलातचक्रं ॥ विज्ञानमेकमुरुधेव विभाति माया स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः ॥३४॥

तरं न किंचिदवेदिषं स एव तर्हि जागर्मीति उपाधिभेदेन विश्वादिव्यवहार इति भावः एतेन बालयुवाद्यवस्थास्वपि प्रतिसंधानेनात्मैक्यं द्रष्टव्यं ॥३२॥ ततः किमत आह एवमिति गुणतो या एता मनसस्त्र्यवस्थास्ता मदविद्यया मयि कृता न तत्त्वतः संतीति निश्चित आत्मरूपोऽर्थो यैः ते यूयं अखिलसंशयानामाधिं आधीयंते अस्मिन्निति आधिरहंकारः तं संछिद्य हार्दं हृदिस्थितं मां भजत केन विज्ञानदात्रा अनुमानैः सदुक्तिभिः सतामुपदेशैः श्रुतिभिश्च तीक्ष्णेन ज्ञानखड्गेन ॥३३॥ अनुमानं तावद्दर्शयति ईक्षेतेति ॥ इदं जगद्विभ्रममीक्षेत तत्र हेतवः मनोविजृंभितत्वात् दृष्टत्वात् विनाशित्वाच्च स्वप्नवत् अतिचंचलत्वाच्च अलातचक्रवत् ॥ ननु भ्रमोऽपि निर्विषयः कथं स्यात्तत्राह विज्ञानमिति निगमनं तस्मात्त्रिधा योऽयं गुणपरिणामकृतो विकल्पः

॥३२॥ [illegible]

राम
५४
५८

तस्मात् ततो दृश्यात् दृष्टिं प्रतिनिवर्त्य निजसुखानुभवो भवति तन्नैश्चल्यार्थं च निवृत्ततृष्णः सन् तूष्णीं निरीहश्च भवेत् मनोवाक्कायव्यापाररहित
इत्यर्थः ॥ ननु देहवतः सर्वथा देहे दृष्टिं प्रतिनिवर्तनायोगात् पुनः संसारः स्यात् तत्राह संदृश्यत इति क्वचिदाहारादिषु यद्यपीदं संदृश्य
तेन तथापि पूर्वमवस्तुबुद्ध्या त्यक्तं तत् पुनर्मोहाय न भवेदेव किं तु देहपातपर्यन्तं स्मृतिरेव स्मृतिः संस्कारमात्रेणावभासो भवेदित्यर्थः
३५ ॥ एतदेवोपपादयति देहमिति ॥ आसनादुत्थितं उत्थाय तत्रैव स्थितं ततः क्वचिदपेतं निर्गतं पुनस्तत्रैवोपेतं देहमपि नानुसंधत्ते अतो

दृष्टिं ततः प्रतिनिवर्त्य निवृत्ततृष्णस्तूष्णीं भवेन्निजसुखानुभवो निरीहः ॥ संदृश्यते क्व च यदीदमवस्तुबुद्ध्या त्यक्तं भ्र
मायनं भवेत्स्मृतिरानिपातात् ॥३५॥ देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपं ॥ दै
वादुपेतमथ दैववशादपेतं ॥ वासो यथा परिकृतं मदिरामदांधः ॥३६॥ देहोपि दैववशगः खलु कर्म यावत् स्वारंभकं
प्रतिसमीक्षत एव सासुः ॥ तं सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ॥३७॥ राम

न्यतस्य ततः येन देहेन स्वरूपमध्यगमत् ज्ञातवान् न देहं यतः कारणात् दिनवापरिहितं परिहितं वा स्रस्तं गतं स्थितं वा यथा न वेत्ति तद्वत् ॥३६॥ ननु
यः परिपाल्यमानोपि स्वयं तिष्ठति तं च न पश्यति तर्हि पतेद्देवेनेत्याह देहइति ॥ देहोपि दैववशेन गच्छन् स्वारंभकं कर्म यावदस्ति तावत्पर्यंतं
प्रतिसमीक्षत एव सासुः प्राणेंद्रियसहितः ॥ ननु तर्हि तस्मिन् कदाचिदासज्जेतापि नेत्याह तमिति ॥ स्वाप्नं स्वप्नतुल्यमधिरूढः प्राप्तः स
माधिपर्यन्तो योगो येन अत एव प्रतिबुद्धं ज्ञातं परमार्थवस्तु येन सः ॥ तथा च श्रुतिः ॥ तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति
॥३७॥

श्री
भा॰ टी॰
ए॰
५५
५८

उक्तार्थे तेषां विश्वासार्थं स्वरूपमाह मयेति ॥ सांख्यमात्मानात्मविवेकः योगोऽष्टांगः तयोर्गुह्यं रहस्यं यत् तं विप्रा युष्मद्धर्मविवक्षयेत्यनेन धर्मोऽप्युपदिष्ट इति ज्ञेयं ॥ ३८ ॥ अतएवाऽयमनेन रूपेणाऽपि ब्रह्मणेन्तोऽर्थात् स माधवैतन्न वादो भविष्यतीति ॥ ऋतं प्रतीयमानो धर्मः सत्यमनुष्ठीयमानो धर्मः तेजः प्रभावः एतेषां परमयनं ॥ ३९ ॥ किंच कथंभूता अगुणा गुणाः परिणामरूपा भवंति किं तु नित्या इत्यर्थः ॥ ४० ॥ अगृणत नमाम तुष्टुवुः मेमया ॥ ४१ ॥ प्रत्येयाय प्रतिगतोऽस्मि ॥ ४२ ॥ इ श्री ग ते का श ध यो श्री यः ॥ १२ ॥ चतुर्दशेऽपरं श्रेयो भ

मयैतदुक्तं वो विप्रा गुह्यं यत्सांख्ययोगयोः ॥ जानीत मागतं यज्ञं युष्मद्धर्मविवक्षया ॥ ३५ ॥ अहं सांख्यस्य योगस्य सत्यस्यर्तस्य तेजसः ॥ परायणं द्विजश्रेष्ठाः श्रियः कीर्तेर्दमस्य च ॥ ३६ ॥ मां भजंति गुणाः सर्वे निर्गुणं चानपेक्षकं ॥ सुहृदं प्रियमात्मानं साम्यासंगादयोऽगुणाः ॥ ४० ॥ इति मे छिन्नसंदेहा मुनयः सनकादयः ॥ सभाजयित्वा परया भक्त्यागृणत संस्तवैः ॥ ४१ ॥ तैरहं पूजितः सम्यक् संस्तुतः परमर्षिभिः ॥ प्रत्येयाय स्वकं धाम पश्यतः परमेष्ठिनः ॥ ४२ ॥ इ श्री ग ते का ॥ श ध भगवदुद्धवसंवादे ॥ यो श्री यः ॥ १३ ॥ उ उ वा वदंति कृष्ण श्रेयांसि बहूनि ब्रह्मवादिनः तेषां विकल्पप्राधान्यमुताहो एकमुख्यता ॥ १ ॥ भवतोदाहृतः स्वामिन्भक्तियोगोऽनपेक्षितः ॥ निरस्य सर्वतः संगं येन त्व

य्याविशेन्मनः ॥ इत्येतदुक्तं ध्यानयोग एव सदा साधनैः ॥ एवं तावद्भगवतो भक्तियोगो दत्तस्तत्र अन्ये त्वन्यानि साधनानि वदंति तत्र विशेषनिर्धारणाय पृच्छति ॥ श्रेयांसि श्रेयःसाधनानि किं विकल्पेन प्राधान्यमुताहो किं वा एकस्यैव मुख्यता ॥ १ ॥ पृच्छतोऽस्याने का अंगं भवेदिति ॥ अनपेक्षितं न अपेक्षा यस्मिन् सः अहेतुकः अयमर्थः भवता योऽभक्तियोग उक्तः अन्ये च यानि श्रेयःसाधनानि वदंति तेषां किं साक्षात्फलसाधनत्वेन प्राधान्यमेव सर्वेषामुतांगांगित्वं प्राधान्येऽपि किं विकल्पेन सर्वेषां तुल्यफलत्वं यद्वा कश्चिदस्ति विशेष इति ॥ २ ॥ राम

राम
५५
५८

नत्र भक्तिरेव महाफलत्वेन मुख्या अन्यानि तु स्वस्वप्रकृत्यनुसारेण पुष्पस्थानीयस्वर्गादिकफलबुद्धिभिः प्राणिभिः प्राधान्येन परिकल्पि
तानि तुच्छकफलानीति विवेकं प्रकृत्यनुसारेण बहुधा वेदार्थप्रतिपत्तिप्रमादं कालेनेति सप्तभिः ॥ मदात्मकः मय्येवात्मा चित्तं येन सः ॥ ३ ॥ भृगु
मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः ॥ इत्येते सप्त ब्रह्माणः प्रजापतयः ते च ते महर्षयश्च ॥ ४ ॥ किंदेवाः कुमत्त्वे देवोगंधर्वादिरक्षितो

श्री ग गु व ॥ कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता ॥ मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ॥ ३ ॥ तेन प्रो
क्ता च पुत्राय मनवे पूर्वजाय सा ॥ ततो भृग्वादयोऽगृह्णन्सप्त ब्रह्ममहर्षयः ॥ ४ ॥ तेभ्यः पितृभ्यस्तत्पुत्रा देवदानवगुह्यकाः
मनुष्याः सिद्धगंधर्वाः सविद्याधरचारणाः ॥ ५ ॥ किंदेवाः किन्नरा नागा रक्षःकिंपुरुषादयः ॥ बह्व्यस्तेषां प्रकृतयो रजः
सत्त्वतमोभुवः ॥ ६ ॥ याभिर्भूतानि भिद्यंते भूतानां मतयस्तथा ॥ यथाप्रकृति सर्वेषां चित्रा वाचः स्रवंति हि ॥ ७ ॥ एवं प्रकृ
तिवैचित्र्याद्भिद्यंते मतयो नृणां ॥ पारंपर्येण केषांचित्पाषंडमतयोऽपरे ॥ ८ ॥ मन्मायामोहितधियः पुरुषाः पुरु
षर्षभ ॥ श्रेयो वदंत्यनेकांतं यथाकर्म यथारुचि ॥ ९ ॥ राम राम राम

न किंदेवा मनुष्या वेति संदेहास्पदं द्वीपांतरमनुष्या एव ॥ एवं किन्नराः किंचिन्नरा इव मुखतः शरीरतो वा किंपुरुषाः किंचित्पुरुषा इव वानरादयः प्र
कृतयः वासना वा ताः कुतः रजःसत्त्वतमोभ्यो भवः जन्म स्थानं यासां ताः ॥ ६ ॥ भूतानि देवासुरमनुष्यादीनि चित्रा वाचः वेदार्थविज्ञानविषयाः
७ ॥ एवमित्युक्तोपसंहारः केषांचिदध्ययनादिशून्यानामप्युपदेशपरंपरया अपरे पाषंडमतयो वेदविरुद्धार्थमतयस्तत्प्रकृतीनां मायागुणमूल

धैन हर्ष

तदेवाहसाधेन ॥ धर्ममेकेमीमांसकाःतदर्थमोक्षार्थेनप्रवर्तेनततत्रकाम्यनिषिद्धंयोनित्यनैमित्तिकेकुर्यात्प्रत्यवायजिहासयेत्यादिय
शःकाव्यालंकारहृतं॥ यथाहुः॥ यावत्कीर्तिर्मनुष्यस्यपुण्यलोकेषुगीयते॥ तावद्वर्षसहस्राणिस्वर्गलोकेमहीयतेइति॥ कामंवात्स्या
यनादयः॥ सत्यंशमंदमंचयोगशास्त्रज्ञाः अन्येबृहस्पत्यर्थवादिनोदंडनीतिविदःअतःवैषमिद्धमैश्वर्यमेवस्वार्थंपुरुषार्थंवदंतिअतःसमाधु
पायएवश्रेयःसाधनमितितेषांमततत्थैवत्यागंभोजनंचलोकायतिकाःबौधायज्ञंतपोदानंयज्ञोदेवतानांपूजनंतपश्चदानंच॥ ९॥ तेषांतु

धर्ममेकेयशश्चान्येकामंसत्यंशमंदमं॥ अन्येवदंतिस्वार्थंवैऐश्वर्यंत्यागभोजनं॥ ९॥ केचिद्यज्ञंतपोदानंव्रतानि
नियमान्यमान्॥ १०॥ आद्यंतवंतएवैषांलोकाःकर्मविनिर्मिताः॥ दुःखोदर्कास्तमोनिष्ठाःक्षुद्रानंदाःशुचार्पिताः॥ ११॥
मय्यर्पितात्मनःसत्यनिरपेक्षस्यसर्वतः॥ मयात्मनासुखंयत्तत्कुतःस्याद्विषयात्मनां॥ १२॥ अकिंचनस्यदांतस्यशांत
स्यसमचेतसः॥ मयासंतुष्टमनसःसर्वाःसुखमयादिशः॥ १३॥ नपारमेष्ठ्यंनमहेंद्रधिष्ण्यंनसार्वभौमंनरसाधि
पत्यं॥ नयोगसिद्धीरपुनर्भवंवामय्यर्पितात्मेच्छतिमद्विनान्यत्॥ १४ राम राम

क्षुद्रफलत्वमित्याह आद्यंतवंतइति॥ तेषांलोकाएतैःसाध्यानिफलानितमोनिष्ठामोहावसानाःभोगकालेप्यसूयादिभिःशुचार्पिताःव्या
प्ताः॥ ११॥ भक्तेःसुखंत्वमादृयावत्समाप्तिमयीति॥ हेसत्यमयापरमानंदरूपेणआत्मनःस्वरूपत्वेनस्फुरता॥ किंचअन्येषांतत्रलोकादिप
रिक्षिवंसुखंतत्तुभक्तस्यतुपरिपूर्णमित्याह अकिंचनस्येति॥ १३॥ परिपूर्णतामेवाहनपारमेष्ठ्यमिति॥ रसाधिपत्यंपातालाधिस्वाम्यंअपुन
र्भवंमोक्षमपिमद्विनामांहित्वाअन्यन्नेच्छतिअहमेवतस्यप्रेष्टइत्यर्थः॥ १४॥ राम राम

राम ५६ ५५

ममापि सएव प्रेष्ठ इत्यादनन्तरश्लोकेनाह न तथेति द्वाभ्यां ॥ आत्मयोनिर्ब्रह्मा पुत्रोऽपि शंकरो मत्स्वरूपोऽपि सन् तोपि संकर्षणो भ्रातापि श्रीर्भार्यापि आत्मा मूर्तिरपि यथा भक्त उद्धवस्त्वं तथा नेति रूपेण प्रेमास्पदं भवानिति ॥ १५ ॥ प्रियेयमदं तर्वर्तिं नुलांडानि पवित्री कर्यामिति भावेनेत्यर्थः ॥ १६ ॥ किंच मद्भक्तानां सुखमेतावदेव मत्तमिति वाक्यादन्तं समर्थः यतः तत्सुखसंदेशं निरूपमित्याह ॥ महान्तो निरहंमानाः अनालब्धधियः अस्पृष्टचित्ताः ॥ निष्किंचनत्वादीनां यथेष्टं देहमङ्गावः ॥ एवंभूता मद्भक्ता नाममदीयाय सुखं जुषन्ति सेवन्ते न तत्सुखं त एव विदुः नान्ये अतः नैरपेक्ष्यंना

न तथा मे प्रियतम आत्मयोनिर्न शंकरः ॥ न च संकर्षणो न श्रीर्नैवात्मा च यथा भवान् ॥ १५ ॥ निरपेक्षं मुनिं शांतं निर्वैरं समदर्शनं ॥ अनुव्रजाम्यहं नित्यं पूयेयेत्यंघ्रिरेणुभिः ॥ १६ ॥ निष्किंचना मय्यनुरक्तचेतसः शांता महांतोऽखिलजीववत्सलाः ॥ कामैरनालब्धधियो जुषंति यत्तन्नैरपेक्ष्यं न विदुः सुखं मम ॥ १७ ॥ बाध्यमानोऽपि मद्भक्तो विषयैरजितेंद्रियः ॥ प्रायः प्रगल्भया भक्त्या विषयैर्नाभिभूयते ॥ १८ ॥ यथाग्निः सुसमिद्धार्चिः करोत्येधांसि भस्मसात् ॥ तथा मद्विषया भक्तिरुद्धवैनांसि कृत्स्नशः ॥ १९ ॥ न साधयति मां योगो न सांख्यं धर्म उद्धव ॥ न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ॥ २० ॥

स्त्वपेक्षणीयं येषां ते निरपेक्षाः नैरपेक्ष्यं न तु मोक्षापेक्षैरपीत्यर्थः ॥ यद्वा एवंभूताः संतो येन ममासीत्यर्थः जुषंति प्रीणंति त एव यन्नैरपेक्ष्यं सुखं तद्विदुः नान्य इत्यन्वयः ॥ १७ ॥ अपि च आस्तां तावदुत्तमभक्तकथा यतः प्राकृतोपि भक्तः कृतार्थ एवेत्याह बाध्यमान इति द्वाभ्यां ॥ विषयैराकृष्यमाणोऽपि प्रगल्भया समर्थया ॥ १८ ॥ पाकार्थं प्रज्वालितोऽप्यग्निः यथा काष्ठानि भस्मीकरोति तथा रागादिनापि कथंचिन्मद्विषया सती भक्तिः समस्तपापानीति ॥ भगवानपि स्वभक्तिमहिमाश्चर्येण संबोधयति अहो उद्धव विस्मयं शृणु इति ॥ १९ ॥ अत एवंभूतं श्रेयो नान्यदस्तीत्याह न साधयतीति द्वाभ्यां ॥ २० ॥

श्रद्धयाया भक्तिस्तया संभवाज्जातिदोषादपीत्यर्थः ॥२१॥ भक्त्यभावेन्यत्साधनं व्यर्थमित्याह धर्म इति ॥२२॥ रोमहर्षादिकं विना कथं भक्तिर्गम्यते भक्त्या च विना कथमाशयः शुद्ध्येदिति किंच भक्तिः स्वाश्रयं शोधयतीति किं वक्तव्यं ॥२३॥ यतो वाग्गद्गदेत्यादिलक्षणो मद्भक्तियुतो लोकं सर्वं पुनातीत्याह वागिति ॥२४॥ अपि च भक्त्यैवात्मशुद्धिर्नान्यैरिति सदृष्टांतमाह यथेति ॥ यथाग्निना ध्मातं तापितमेव हेम सुवर्णं त्यक्तमलं जहाति न क्षालनादिभिः स्वं निजं रूपं च भजते कर्मानुशयं कर्मवासनां भजनेन मद्रूपतामापद्यते ॥२५॥ ननु बुद्ध्या विदाज्ञाति

भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सतां ॥ भक्तिः पुनाति मन्निष्ठा श्वपाकानपि संभवात् ॥२१॥ धर्मः सत्यदयोपेतो विद्या वा तपसान्विता ॥ मद्भक्त्यापेतमात्मानं न सम्यक् प्रपुनाति हि ॥२२॥ कथं विना रोमहर्षं द्रवता चेतसा विना ॥ विनानंदाश्रुकलया शुद्ध्येद्भक्त्या विनाशयः ॥२३॥ वाग्गद्गदा द्रवते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च ॥ विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति ॥२४॥ यथाग्निना हेम मलं जहाति ध्मातं पुनः स्वं भजते च रूपं ॥ आत्मा च कर्मानुशयं विधूय मद्भक्तियोगेन भजत्यथो मां ॥२५॥ यथा यथात्मा परिमृज्यतेसौ मत्पुण्यगाथाश्रवणाभिधानैः ॥ तथा तथा पश्यति सूक्ष्मतत्त्वं चक्षुर्यथैवांजनसंप्रयुक्तं ॥२६॥ विषयान्ध्यायतश्चित्तं विषयेषु विषज्जते ॥ मामनुस्मरतश्चि-

परं तमेव विदित्वातिमृत्युमेतीत्यादिश्रुतिभ्यो ज्ञानादेवाविद्यानिवृत्त्या तत्प्राप्तिरवगम्यते अतो भक्तियोगेनेत्ययुक्तं तत्राह यथा यथेति आत्मा चित्तं परिमृज्यते शोध्यते मत्पुण्यगाथानां श्रवणैरभिधानैश्च भक्तेरेवांतरव्यापारो ज्ञानं न पृथगित्यर्थः ॥२६॥ किंच ज्ञानं नाम चित्तस्य मदाकारपरिणामः स च मां भजतः स्वभावत एव भवति ॥ न तु यत्नांतरमपेक्षत इति सदृष्टांतमाह विषयानिति ॥२७॥

यस्मादन्यत्साधनं तत्फलं च स्वप्नमनोरथवदसदभिध्यानमात्रं तस्मान्नद्धित्वा मय्येव मनः समाधत्स्वेत्याह तदिति प्रकरणार्थमुपसंहरति तस्मा
दिति ॥ मद्भावभावितं मच्चिन्तनेन मद्भजनेनैव भावितं शोधितं ॥२८॥ विशेषतो वात्स्यायनाद्युक्तकाममार्गैः पवित्याज्यपाद्युत्पादस्त्रीलालि
ति ॥ आत्मवान् धीरः सन् क्षेमे निर्भये देशे विविक्ते विजने ॥२९॥ एतदुपपादयति न तथेति ॥ अस्य पुंसो यथा तत्संगिसंगतः क्लेशो
भवेत् ॥ यथा च बंधो योषित्संगतः तथान्यप्रसंगतो न भवेदिति ॥३०॥ मां चिंतयेदित्युक्तं तत्प्रकारं पृच्छति यथेति ॥ ध्यानांगप्रश्नः या

तस्मादसदभिध्यानं यथा स्वप्नमनोरथं ॥ हित्वा मयि समाधत्स्व मनो मद्भावभावितं ॥२८॥ स्त्रीणां तत्संगिनां संगं त्यक्त्वा
दूरत आत्मवान् ॥ क्षेमे विविक्त आसीनश्चिंतयेन्मामतंद्रितः ॥२९॥ न तथास्य भवेत्क्लेशो बंधश्चान्यप्रसंगतः ॥ योषित्संगा
द्यथा पुंसस्तथा तत्संगिसंगतः ॥३०॥ उ॰ उ व वा यथा त्वामरविंदाक्ष यादृशं वा यदात्मकं ॥ ध्यायेन्मुमुक्षुरेतन्मे ध्यानं
त्वं वक्तुमर्हसि ॥३१॥ श्री ग उ च समआसन आसीनः समकायो यथासुखं ॥ हस्तावुत्संग आधाय स्वनासाग्राव
लोकनः ॥३२॥

दृशमिति ध्येयविशेषणप्रश्नः यदात्मकमिति यस्य तानि विशेषणानि तेन स्वरूपप्रश्नः एतद्ध्यानमेव वक्तुमर्हसीति यावदत्रायमर्थः ॥ मुमुक्षु
स्त्वां यथा ध्यायेत्तन्मे वक्तुमर्हसि जिज्ञासोः कथनाय पुनरेतत् त्वदास्यमेव पुरुषार्थः न तु ध्यानेन कृत्यमस्तीति ॥ तदुक्तं त्वयोपभुक्तस्रग्गं
धेत्यादि त्वं वक्तुमर्हसीति पाठः सुगमः ॥३१॥ तत्र ध्यानांगत्वेनासनप्राणायामप्रकारमाह समइति चतुर्भिः ॥ समेनात्युच्छ्रितेनातिनीचे आस
नेकंबलादौ समकायः समवपुः यथासुखमासीनः इति नातिस्वस्तिकादिनियमः इत्युक्तं नासाग्रनिरीक्षणं च चित्तस्थैर्याय अंतर्लक्ष्यो बहिर्दृष्टिः

स्थिरचित्तः दृष्टिसंयतत्तइनियोगाभ्यासोक्तिः ॥३२

श्री
भाही
ए
५८
ध१

विपर्ययेण रेचकपूरककुंभकेनापि यद्वा वामनाड्यापूरितं दक्षिणया त्यजेत् तया वा पूरितं वामया त्यजेदिदं विपर्ययेण यथोक्तं योगशास्त्रे इडया पूरयेद्वायुं त्यजेत् पिंगलया ततः इति निर्जितेंद्रिय इति प्रत्याहारः उक्तः ॥३३॥ प्राणायामो द्विविधः सगर्भोऽगर्भश्चेति ततः श्रेष्ठत्वात् सगर्भमाह हृदीति द्वाभ्यां ॥ मूलाधारादारभ्य ब्रह्मविच्छिन्नं संततं घंटानादतुल्यमोंकारं हृदिस्थं प्राणेन उदीर्य ऊर्ध्वं द्वादशांतपर्यंतं नीत्वा कथं बिसोर्णवत् कमलनालतंतुवत् ॥ ततः मात्रातीतेन स्वरं पंचदशं बिंदुं संवेशयेत् अथ पुनरित्यस्यार्थः तं च बिंदुं शिरस्कं कुर्यादित्यर्थः

पूर्णं स्पशोधयेन्मार्गं पूरकुंभकरेचकैः ॥ विपर्ययेण पिशनैरभ्यसेन्नियतेंद्रियः ॥३३॥ हृद्यविच्छिन्नमोंकारं घंटानादं बिसोर्णवत् ॥ प्राणेनोदीर्य तत्राथ पुनः संवेशयेत् स्वरं ॥३४॥ एवं प्रणवसंयुक्तं प्राणसंधानमभ्यसेत् ॥ दशाहत्वा विषयं वर्णं मासादर्वाग्जितानिलः ॥३५॥ हृत्पुंडरीकमध्यस्थमूर्ध्वनालमधोमुखं ॥ ध्यात्वोर्ध्वमुखमुत्फुल्लमष्टपत्रं सकर्णिकं ॥३६॥ कर्णिकायां न्यसेत् सूर्यसोमाग्नीनुत्तरोत्तरं ॥ वह्निमध्ये स्मरेद्रूपं ममैतद्ध्यानमंगलं ॥३७॥ समं प्रशांतं सुमुखं दीर्घचारुचतुर्भुजं ॥ सुचारुसुंदरग्रीवं सुकपोलं शुचिस्मितं ॥३८॥

राम

यद्वा मूलाधारादारभ्य मूर्धांतपर्यंतं बिसतंतुवत् सूक्ष्मम् अविच्छिन्नं संततं हृदि प्राणेनोदीर्य अभ्यस्य अथ पुनस्तत्र तमोंकारं घंटानादतुल्यं स्वरं उदात्तेन नादेन स्थिरीकुर्यादिति ॥३४॥ मासादर्वाग्जितानिलो भवति ॥३५॥ एवं ध्यानांगमुक्त्वा यादृशमित्यस्योत्तरं वदन् ध्येयपीठमाह हृत्पुंडरीकमिति सार्धेन ॥ मध्यस्थं देहांतर्वर्ति ऊर्ध्वनालमधोमुखमुकुलितं कदलीपुष्पसंकाशं यदस्ति तद्विपरीतं ध्यात्वेत्यर्थः ॥३६॥ न्यसेच्चिंतयेत् सविशेषणं ध्यानमाह वह्निमध्य इति षड्भिः ध्यानमंगलं ध्यानस्य शुभविषयं ॥३७॥ समं समानरूपावयवं दीर्घौ बाहवः चत्वारो भुजा यस्य तं
तत्सुचारुग्रीवमिति सुगमं ॥३८॥

त

राम
५८
ध१

समानयोः कर्णयोर्विन्यस्ते स्फुरंती मकराकारे कुंडले यस्मिं स्तत् श्रीवत्सः श्रियो निकेतनं वक्षसि दक्षिणवामतः ताभ्यां युक्तमित्यर्थः ३९ द्युम
द्भिः किरीटादिभिः समंतात् युतमलंकृतं प्रसादेन शोभनं मुखमीक्षणं च यस्मिं स्तत् ४१ सुकुमारं अतिकोमलं ४२ सविशेषणं ध्यान
मुपसंहरति इंद्रियाणीति प्रकर्षेण नयेत् सर्वतः सर्वांगयुक्ते ४३ यादृशमित्यस्योत्तरत्वेन सविशेषणमुक्त्वा यदात्मकमित्यस्योत्तरतयाश

समानकर्णविन्यस्तस्फुरन्मकरकुंडलं ॥ हेमांबरं घनश्यामं श्रीवत्सश्रीनिकेतनं ॥ ३९ ॥ शंखचक्रगदापद्मवनमालाविभूषि
तं ॥ नूपुरैर्विलसत्पादं कौस्तुभप्रभयायुतं ॥ ४० ॥ द्युमत्किरीटकटककटिसूत्रांगदायुतं ॥ सर्वांगसुंदरं हृद्यं प्रसादसुमुखे
क्षणं ॥ ४१ ॥ सुकुमारमभिध्यायेत्सर्वांगेषु मनो दधत् ॥ एवं मद्ध्यानसंयुक्तो योगी भवति मानवः ॥ ४२ ॥ इंद्रियाणींद्रियार्थे
भ्यो मनसाकृष्य तन्मनः ॥ बुद्ध्या सारथिना धीरः प्रणयेन्मयि सर्वतः ॥ ४३ ॥ तत्सर्वव्यापकं चित्तमाकृष्यैकत्र धारयेत्
नान्यानि चिंतयेद्भूयः सुस्मितं भावयेन्मुखं ॥ ४४ ॥ तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत् ॥ तच्च त्यक्त्वा मदारोहो न किं
चिदपि चिंतयेत् ॥ ४५ ॥ एवं समाहितमतिर्मामेवात्मानमात्मनि ॥ विचष्टे मयि सर्वात्मज्योतिर्ज्योतिषि संयुतं ॥ ४६ ॥

नैर्विशेषणत्यागेन ध्यानमेव समाधिपर्यंतमाह तदिति त्रिभिः ॥ एकत्रांगे अन्यानि अंगानि न चिंतयेत् एकत्रेति यदुक्तं तदेवांगं दर्शयति सुस्मि
तमिति ॥ ४४ ॥ व्योम्नि सर्वकारणरूपे तच्च कारणत्वमपि त्यक्त्वा मदारोहः मयि शुद्धब्रह्मण्यारूढः सन् न किंचित् ध्यातृध्येयविभागमपि न चिं
तयेत् ॥ ४५ ॥ मामेवात्मनि विचष्टे आत्मानं च सर्वात्मनि मयि संयुतं विचष्टे ज्योतिषि संयुतमेवेत्यन्वयः ॥ ४६ ॥ ॥ राम ॥

श्री
भाटी
ए
५९
६२

एवंभूतसमाधिपर्यंतध्यानस्य फलमाह ध्यानेनेति ॥ मनो युंजतः समादधतः द्रव्यज्ञानक्रियाभ्रमः अधिभूताधिदैवाध्यात्मरूपः इष्टप्रदर्शनरूपो वा भ्रमः निर्वाणं शांतिं सम्यगुपास्यतीति ॥४७॥ ३ श्री ग ते का श धे तु शो यः ॥१४॥ ततः पंचदशे प्रोक्ताः सिद्धयो धारणानुगाः ॥ श्रीविष्णुपदसंप्राप्त्यावंतरायतया मताः ॥ एवं मनो युंजतो योगिनोंऽतराविर्भवंत्याः सिद्धयोप्यंतरायप्राया एव अतस्ताः परिहृत्य परमेश्वरपर एव भवेदिति वक्तुं सिद्धीराह ॥ युक्तस्य स्थिरचित्तस्य ॥ १ ॥ स्विदिति वितर्के कास्वित् किंनामा कथं स्वित् कीदृशी वा कतीति

ध्यानेनेत्थं सुतीव्रेण युंजतो योगिनो मनः ॥ संयास्यत्याशु निर्वाणं द्रव्यज्ञानक्रियाभ्रमः ॥४७॥ ३ श्री ग ते का श धे भगवदुद्धवसंवादे तु शो यः ॥१४॥ श्री ग उ च जितेंद्रियस्य युक्तस्य जितश्वासस्य योगिनः ॥ मयि धारयतश्चेत उपतिष्ठंति सिद्धयः १ ३ उ वा कया धारणया कास्वित्कथं वा सिद्धिरच्युत ॥ कति वा सिद्धयो ब्रूहि योगिनां सिद्धिदो भवान् ॥२॥ श्री ग उ च सिद्धयोऽष्टादश प्रोक्ता धारणा योगपारगैः ॥ तासामष्टौ मत्प्रधाना दशैव गुणहेतवः ॥३॥

प्रश्नांतरे वाशब्दः एवमेवैतज्ज्ञानासि नान्यस्त्याशयेनाह योगिनामिति ॥२॥ धारणाश्चाष्टादशेत्यनुषंगः योगपारगैर्विनि त्रिकालज्ञानादिरू
द्र
पु सिद्धीरन्येपि जानंतीति भावः अष्टौ मेव प्रधानं मुख्याः स्वभावत आश्रयीयासां तामकोस्त्यप्राप्तिषु किंचिन्न्यूना भवंतीति भावः ॥ गुणहे
तवः सत्त्वोत्कर्षहेतुकाः ॥३॥ राम ॥ राम राम राम राम

एम
५९
६२

ताः स्वरूपेणोपदिशति अणिमेति सार्धैः पंचभिः ॥ अणिमा महिमा लघिमा मूर्तेः देहस्य तिस्रः सिद्धयः प्राप्तिर्नाम सिद्धिः सर्वप्राणिना
मिंद्रियैः सह तत्तदधिष्ठातृदेवतारूपेण संबंध इत्यर्थः ॥ श्रुतेषु पारलौकिकेषु दृष्टेषु दर्शनयोग्येषु अपि सर्वेषु भुवि विलयादि विदितेष्वपि भो
गदर्शनसामर्थ्यं सिद्धिः ॥ शक्तीनां मायातत्कार्यांशभूतानां प्रेरणं तत्त्वेश्वरे मायायाः अन्येषु तदंशानां प्रेरणमीशिता नाम सिद्धिः ॥ ४ ॥ विष
यभोगेष्वसंगो वशिता सिद्धिः यत्कामः यत्सुखं कामयते तत्तदवस्यति तत्सुखसीमानं प्राप्नोतीति सिद्धिः औत्पत्तिकीः स्वाभाविक्यः निरति

अणिमा महिमा मूर्तेर्लघिमा प्राप्तिरिंद्रियैः ॥ प्राकाम्यं श्रुतदृष्टेषु शक्तिप्रेरणमीशिता ॥ ४ ॥ गुणेष्वसंगो वशिता य
त्कामस्तदवस्यति ॥ एता मे सिद्धयः सौम्य अष्टावौत्पत्तिकीर्मताः ॥ ५ ॥ अनूर्मिमत्वं देहेस्मिन्दूरेश्रवणदर्शनं ॥ मनो
जवः कामरूपं परकायप्रवेशनं ॥ ६ ॥ स्वच्छंदमृत्युर्देवानां सहक्रीडानुदर्शनं ॥ यथासंकल्पसंसिद्धिराज्ञाप्रति
हतागतिः ॥ ७ ॥ त्रिकालज्ञत्वमद्वंद्वं परचित्ताद्यभिज्ञता ॥ अग्न्यर्कांबुविषादीनां प्रतिष्टंभोऽपराजयः ॥ ८ ॥ एता
श्चोद्देशतः प्रोक्ता योगधारणसिद्धयः ॥ यया धारणया या स्याद्यथा वा स्यान्निबोध मे ॥ ९ ॥ ॥ राम ॥

शया इत्यर्थः ॥ ५ ॥ गुणहेतुः सिद्धीरित्याह ॥ अनूर्मिमत्वं क्षुत्पिपासादिरहितत्वं दूरे श्रवणं दर्शनं चेति द्वे सिद्धी मनोवेगेन देहस्य गतिः
कामितरूपप्राप्तिः परकायप्रवेशः ॥ ६ ॥ स्वेच्छामृत्युः अप्सरोभिः सह देवानां याः क्रीडाः तासामनुदर्शनं प्राप्तिः संकल्पानुरूपप्राप्तिः अप्रति
हताज्ञा समंताद्गतिः यस्याः साऽऽज्ञा ज्ञावेत्येता दश ॥ ७ ॥ क्षुद्रसिद्धीः पंचाह ॥ अद्वंद्वं शीतोष्णाद्यनभिभवः अग्न्यादीनां स्तंभनं ॥ ८ ॥ तत्तद्धा
रणादिभिः सह विशेषतो निरूपयति ययेति यावत्समाप्तिः ॥ ९ ॥ राम राम राम

श्री भाटी ११ १५

६३

भूतसूक्ष्मोपाधौ मयि मनो धारयन् तन्मात्रं भूतसूक्ष्माकारं स तन्मात्रोपासकः मम मदीयमणिमानं प्राप्नोतीत्यर्थः ॥१०॥ ज्ञानशक्तिम-
हत्तत्त्वोपाधौ मयि यथासंस्थं महत्तत्त्वाकारं भूतानां चेत्याकाशादिभूतोपाधौ च मयि मनो धारयन् तत्तद्भूतमहिमानं प्राप्नोतीत्यर्थः
॥११॥ वाय्वादिभूतानां ये परमाणवः तन्मये तदुपाधौ चित्तं मयि रंजयन् योगी कालसूक्ष्मार्थतां कालपरिमाणोपाधिरूपतामिति लघु-
त्वविवरणं ॥ तदुक्तं ॥ स कालः परमाणुर्वै यो भुंक्ते परमाणुतामिति ॥१२॥ वैकारिकाहंकारोपाधौ मयि अखिलमेकाग्रमात्मत्वप्रापकं॥

भूतसूक्ष्मात्मनि मयि तन्मात्रं धारयेन्मनः ॥ अणिमानमवाप्नोति तन्मात्रोपासको मम ॥१०॥ महत्यात्मनि मयि परे
यथासंस्थं मनो दधत् ॥ महिमानमवाप्नोति भूतानां च पृथक्पृथक् ॥११॥ परमाणुमये चित्तं भूतानां मयि रंजयन्
कालसूक्ष्मतां योगी लघिमानमवाप्नुयात् ॥१२॥ धारयन्मय्यहंतत्त्वे मनो वैकारिकेऽखिलं ॥ सर्वेंद्रियाणामात्म-
त्वप्राप्तिं प्राप्नोति मन्मनाः ॥१३॥ महत्यात्मनि यः सूत्रे धारयेन्मयि मानसं ॥ प्राकाम्यं पारमेष्ठ्यं मे विंदतेऽव्यक्त-
जन्मनः ॥१४॥ विष्णौ त्र्यधीश्वरे चित्तं धारयेत्कालविग्रहे ॥ स ईशत्वमवाप्नोति क्षेत्रज्ञः क्षेत्रनोदनां ॥१५॥

अत्र

स्वधिष्ठातृत्वं देहः मन्मनाः मयि मनोधारणाप्रभावादेवं भवति नात्रातीव हेतुरस्तु संधेय इति भावः ॥ एवं मत्स्मरणानुभावेन मद्योग-
बलमाश्रय इत्यादिषु द्रष्टव्यं ॥१३॥ क्रियाशक्तिप्रधानं महत्तत्त्वं तदुपाधौ मयि समे पारमेष्ठ्यं सर्वोत्कृष्टं प्राकाम्यं विंदते कथंभूतस्य
मे अव्यक्तं जन्म यस्य तस्य तदुपाधेर्ममेत्यर्थः ॥१४॥ त्र्यधीश्वरे त्रिगुणमायानियंतरि अत एव कालविग्रहे आकलयितृरूपे अंतर्या-
मिनि ईशत्वं विशिनष्टि क्षेत्रज्ञानां जीवानां च नोदनां प्रेरणामित्यर्थः ॥ नतु विश्वसृष्ट्यादिकर्तृत्वलक्षणमित्यर्थः ॥१५॥ राम

क्षेत्राणां तदुपाधीनां १

राम ६०

६३

तुरीयाख्ये विराड्ढिरण्यगर्भसूत्रकारणं चेत्युपाधयः ॥ ईशस्य च त्रिभिर्हीनं तुरीयं तत्पदं विदुरिति ॥ एवं तल्लक्षणे ॥ ऐश्वर्यस्य समग्रस्य धर्मस्य य-
शसः श्रियः ॥ वैराग्यस्याथ मोक्षस्य षण्णां भग इतीरितः तद्वति भगवति भगवच्छब्दशब्दिते ॥ १६ ॥ यत्र परमानंदरूपे सर्वोऽपि कामस्तदंशत्वा-
न्नावसीयते समाप्यते ॥ १७ ॥ अतः परं गुणहेतुकाः ॥ शुद्धे सत्त्वात्मके श्वेततां शुद्धरूपतां ॥ १८ ॥ आकाशात्मनि मयि प्राणैः समष्टिरूपः
तद्रूपे मयि मनसा घोषं च नादं चिंतयन् अत्र सोऽहं सो जीवः तत्राकाशे उपलब्धा नानासत्त्वस्यादि विचित्रा वाचः शृणोति ॥ यद्वा तत्राकाशे उपल-

नारायणे तुरीयाख्ये भगवच्छब्दशब्दिते ॥ मनो मय्यादधद्योगी मद्धर्मा वशितामियात् ॥ १६ ॥ निर्गुणे ब्रह्मणि मयि धारयन्विश-
दं मनः ॥ परमानंदमाप्नोति यत्र कामोऽवसीयते ॥ १७ ॥ श्वेतद्वीपपतौ चित्तं शुद्धे ब्रह्ममये मयि ॥ धारयञ्छ्वेततां याति षडू-
र्मिरहितो नरः ॥ १८ ॥ मय्याकाशात्मनि प्राणे मनसा घोषमुद्वहन् ॥ तत्रोपलब्धा भूतानां हंसो वाचः शृणोत्यसौ ॥ १९ ॥ च-
क्षुस्त्वष्टरि संयोज्य त्वष्टारमपि चक्षुषि ॥ मां तत्र मनसा ध्यायन्विश्वं पश्यति सूक्ष्मदृक् ॥ २० ॥ मनो मयि सुसंयोज्य
देहं तदनुवायुना ॥ मद्धारणानुभावेन तत्रात्मा यत्र वै मनः ॥ २१ ॥ राम राम

ब्धाया अभिव्यक्ताया भूतानां वाचः तस्या दूरतः शृणोतीति ॥ १९ ॥ दूरश्रवणमुक्त्वा दूरदर्शनमाह ॥ त्वष्टा आदित्यः तस्मिन् च परिच्छिन्ने चक्षुः संयो-
ज्य तं चक्षुषि संयोज्य तत्रोभयसंयोगे मां ध्यायन् विश्वं दूरतः पश्यति ॥ २० ॥ मनो देहं च तदनुवर्तिना वायुना सह मयि संयोज्य या मद्धारणा
क्रियते तस्याः प्रभावेन यत्र मनो याति तत्रात्मा देहो यातीत्यर्थः ॥ यद्वा मनः कर्तृ आत्मानं वायुना सह देहं च मयि सुसंयोज्य यत्र याति तद-
नु तत्र देहो यातीति ॥ २१ ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम

श्री भागवत ६१ ६४

मनउपादायउपादानकारणंकृत्वायद्यद्देवादिरूपंभवितुमिच्छति॥ तत्तन्मनोरूपंमनसोभीष्टंरूपंयोगीभवेत्॥ कुतोयतोमद्योगबलं
योऽस्मचिंत्यशक्तिर्नानाकारः तस्मिन्मयिमनसोयोगधारणातस्यबलंप्रभावःसएवाश्रयःकारणं॥२२॥ यत्रप्रविविक्षतितत्रात्मानं
चिंतयेत् अतःस्वदेहंपिंडंहित्वाप्राणःप्रधानलिंगशरीरोपाधिःवायुभूतःबाह्यवायोर्भूतःप्रविशेत्तेनमार्गेणेत्यर्थः षडंघ्रिवत्॥ भृंगो
यथापुष्पात्पुष्पांतरमनायासेनप्रविशतितद्वत्पिंडंहित्वेत्युक्तेतत्प्रकारंकथयत्॥ ॥ स्वच्छंदमृत्युमाह॥ पार्ष्ण्यापार्ष्णिनागुदंनि

नू २३

यद्धामनउपादाययद्यद्रूपंबुभूषति॥ तत्तद्भवेन्मनोरूपंमद्योगबलमाश्रितः॥२२॥ परकायंविशन्सिद्धआत्मानं
तत्रधारयन्॥ पिंडंहित्वाविशेत्प्राणोवायुभूतःषडंघ्रिवत्॥२३॥ पार्ष्ण्यापीड्यगुदंप्राणंहृदुरःकंठमूर्धसु॥ आ
रोप्यब्रह्मरंध्रेणब्रह्मनीत्वोत्सृजेत्तनुं॥२४॥ विहरिष्यन्सुराक्रीडेमत्स्थंसत्त्वंविचारयेत्॥ विमानेनोपतिष्ठं
तिसत्त्ववृत्तीःसुरस्त्रियः॥२५॥ यदासंकल्पयेद्बुद्ध्याययावामत्परःपुमान्॥ मयिसत्येमनोयुंजंस्तथातत्समु
पाश्नुते॥२६॥ योवैमद्भावमापन्नईशितुर्वशितुःपुमान्॥ नकुतश्चिद्विहन्येततस्यचाज्ञायथामम॥२७॥

रुध्यप्राणंहृदुरःकंठमूर्धसुआरोप्यब्रह्मरंध्रेणनीत्वाप्राणंप्राणोपाधिमात्मानंब्रह्मरंध्रेणमूर्धद्वारेणब्रह्मोपलक्षणंब्रह्मवाअन्य
द्वाअपेक्षितंस्थानंमनसानीत्वेत्यर्थः॥२४॥ मत्स्थंमन्मूर्तिरूपंशुद्धंचिंतयेत् तदासत्त्ववृत्तयःसत्त्वांशभूताः॥२५॥ यदावेत्यत्रकाले
पियथावेतिपाठेयथावायेनापिप्रकारेणबुद्ध्यासंकल्पयेत् तत्तथावस्थाप्नोतीत्यर्थः॥ यद्बुद्ध्यायथासंकल्पयेत् ययावामत्परमःमयि
विश्वासत्वान्भवतितथातदनुरूपंसर्वंप्राप्नोतीत्यर्थः किंचवर्तन्सत्येसत्यसंकल्पेमयिमनोयुंजन्॥२६॥ मद्भिनिष्ठयकपदंममेत्यर्थः ईशि
तुःवशितुःसर्वनियंतुःस्वतंत्रस्यममभावंस्वभावंप्राप्तःएतानुपाहतेनवःअतःपरस्वेच्छाः॥ ॥ राम राम

राम ६१ ६४

धारणाविदः इति त्रिकालज्ञेश्वरधारणास्थितानां त्रैकालिकी त्रिकालवस्तुविषया स्वजन्ममृत्युभ्यामुपबृंहिता तत्सहिता अनयैव परचित्ताद्य-
भिज्ञता व्याख्यातेत्यर्थः ॥२५॥ अग्न्यादिभिर्न हन्येत मुनेर्योगमयं वपुः नाभिभूयते अत्र हेतुर्मद्योगेति ॥ यादसामुदकं
यथा भिन्नात कं न भवति तथा तस्य वपुषो व्याप्यादयः इत्यर्थः अनयैवाद्वंद्वो नापि व्याख्याता ॥२६॥ मद्विभूतीर्ममावतारान्ध्वजादिभिः सह

२७

मद्भक्त्या शुद्धसत्त्वस्य योगिनो धारणाविदः ॥ तत्र त्रैकालिकी बुद्धिर्जन्ममृत्यूपबृंहिता ॥२८॥ उदासीने मयि परे स्पृशतेर्गु-
णेषु ॥ चिन्मये धारयेच्चेतो द्वंद्वैर्नैवाभिभूयते ॥२९॥ सर्वभूतहृदिस्थं मे मामात्मानं सर्वसाक्षिणं ॥ ध्यायेदात्मतया
चित्ते परेषां परिपश्यति ॥३०॥ अग्न्यादिभिर्न हन्येत मुनेर्योगमयं वपुः ॥ मद्योगशांतचित्तस्य यादसामुदकं यथा ॥३१॥
मद्विभूतीरनुध्यायञ्छ्रीवत्सास्त्रविभूषिताः ॥ ध्वजातपत्रव्यजनैः स भवेदपराजितः ॥३२॥ उपासकस्य मामेवं योगधा-
रणया मुनेः ॥ सिद्धयः पूर्वकथिता उपतिष्ठंत्यशेषतः ॥३३॥ जितेंद्रियस्य दांतस्य जितश्वासात्मनो मुनेः ॥ मद्धारणां धार-
यतः का सा सिद्धिः सुदुर्लभा ॥३४॥ अंतरायान्वदंत्येता युंजतो योगमुत्तमं ॥ मया संपद्यमानस्य कालक्षपणहेतवः ॥३५॥

उपसंहरति उपासकस्येति ॥ एवंरूपाभिर्धारणाभिः ॥३५॥ यद्वा किं धारणाप्रयासेन एकतरेण वा सर्वाः सिद्धयो भवंतीत्याह जितेंद्रियस्येति ॥ मद्धारणां
नारायणे तुरीयाख्ये इत्यत्रोक्तां यां सुदुर्लभां जानंति स का न काचित्सिद्धिरित्यर्थः ॥३६॥ यद्यप्येवं तथापि न प्रार्थ्या इत्याह अंतरायानिति ॥३५॥

राम ९

श्री
भा टी
११
६२
६५

तस्माद्देहैकदेशीयमेकधारणा कार्या नान्याः कार्या इत्याह जन्मेति ॥ जन्मनैव काश्चित्सिद्धयो भवन्ति यथा देवानां यथा च यादसामुदक-
स्तम्भः पक्ष्यादीनां खेचरत्वादि ॥ तदुक्तं पातञ्जले जन्मौषधितपोमन्त्रयोगजाः सिद्धय इति ॥ योगेन मद्धारणाभिस्तु केन योगगतिं मत्सालो-
क्यादिरूपां ॥ ३४ ॥ अतदुत्पत्त्याह सर्वासामित्यर्धेन ॥ प्रभुस्तेषामुपपादकं हेतुः कारणं पतिः पालयिता चेति किंच न केवलं सिद्धीनामेव प्र-
भुत्वं अपितु मोक्षादीनामपीत्याह अहमिति योगो मोक्षः सांख्यं तत्साधनं ज्ञानं धर्मस्य तदुपदेष्टॄणां ब्रह्मवादिनां च ॥ ३५ ॥ अन्तर्ब-

जन्मौषधितपोमन्त्रैर्यावतीरिह सिद्धयः ॥ योगेनाप्नोति ताः सर्वा अन्यैर्योगगतिं व्रजेत् ॥ ३४ ॥ सर्वासामपि सिद्धीनां हेतुः
पतिरहं प्रभुः ॥ अहं योगस्य सांख्यस्य धर्मस्य ब्रह्मवादिनां ॥ ३५ ॥ अहमात्मान्तरो बाह्योऽनावृतः सर्वदेहिनां ॥ यथा भू-
तानि भूतेषु बहिरन्तः स्वयं तथा ॥ ३६ ॥ इति श्री ग ते का श धे भगवदुद्धवसंवादे च शो यः ॥ १५ ॥

त्याह अहमिति ॥ सर्वदेहिनां जीवानामात्मा यतः अन्तरः अन्तर्यामी एष ते आत्मान्तर्याम्यमृत इति श्रुतेः ॥ तर्हि किमन्तर्वर्तित्वात्परिच्छिन्नः
बहिर्नेत्याह बाह्यः व्यापक इति तर्हि देहवत् आवृतः अनावृतः एतत्सदृष्टान्तमाह ॥ भूतेषु चराचरेषु महाभूतानि यथा बहिरन्तश्च भवन्ति स्वय-
मपि तानि तस्य तथेति तात्पर्यार्थः ॥ ३६ ॥ इ श्री ग ते का श धे च शो यः ॥ १५ ॥ राम

राम
६२
६५

षोडशे द्वात्रिंशे तथा संयुक्ताः स्थिततयः ॥ ज्ञानवीर्यप्रभावादि विशेषेणोपवर्ण्यते ॥ इति तदेव प्रकटयति ॥ अंत ग्रिन्थेन यज्ञानेन शब्दप्रसृ
तात्मना ॥ अन्तस्तयोगना ग्राह्यो विभूत्यादि निरूपणं ॥ एवं तावन्नवाध्याये अष्टौ प्रश्ना निरूपिताः ॥ प्रथमतः षडध्यायान्विहाय पंचदशाध्या
यपर्यंतं नवाध्याया भवंति ॥ ब्रह्मत्वसंभवे तावत्सप्तमे दिचतुष्टये ॥ बंधमुक्त्योस्तु निर्धारे मउक्तोष्टतनः परे ॥ द्वादशे नंतरं कर्मेश्वरात्याग
अवस्थितौ ॥ द्वेति त्रिदास तोयोगनिष्ठायां च त्रयोदशे ॥ श्रेयः साधन निर्धारे ध्याने चैव चतुर्दशे ॥ धारणासिद्धिभेदे च प्रसंगेन निरंतरे ॥ उ
द्धवप्रश्ने तदनन्तरं दृश्यते इति ॥ षोडशे भूतिविस्तारे द्वयोर्वर्णाश्रमवृत्ते ॥ ज्ञानादि निर्णये चास्तेयमादीनां च निर्णये ॥ योगत्रयाधिकारे तु विं
शे च तदनंतरे ॥ तत्त्वसंख्याविवादे च स्वप्रकृतौ विवेचने ॥ जन्ममृत्युप्रकारेण द्वाविंशे तदनन्तरं ॥ परापवादसहिते च त्रिंशे तदनंतरं ॥ सप्त

उ द्धा ॥ तं ब्रह्म परमं साक्षादनाद्यंतमपावृतं ॥ सर्वेषामपि भावानां त्राणस्थित्यप्ययोद्भवः ॥ १ ॥ उच्चावचेषु भू
तेषु दुर्ज्ञेयमकृतात्मभिः ॥ उपासते त्वां भगवन्याथातथ्येन ब्राह्मणाः ॥ २ ॥ राम राम

विंशे क्रियायोगप्रश्ने तदुपवर्णनं ॥ अष्टाविंशे ततः प्रोक्ता ज्ञानयोगोपसंहृतिः ॥ संसारसंभवप्रश्ने तन्मध्ये तदनन्तरं नेदशनपाः पुनः प्रश्नेभ
क्तियोगोपसंहृतिः ॥ एवं प्रश्नोत्तरालापक्रमेणैतानि विंशतिः ॥ अस्मात्मांत रोवाक्योनावृतः सर्वदेहिनां ॥ यथाभूतानि भूतेषु बहिरंतः
स्वयं न थेत्युक्तं नत्र भूतानि यथा कश्चित्केन चिद्गुणविशेषेणाक्तो निवर्तते ॥ क्वचित्सामान्यरूपेण नथात्वमपि कुकार्यं वर्तसे इति विस्तीर्णः
प्रश्नः प्रथमं तावदुक्तमेव सदात्मकत्वमुपपादयन्ननुवदति तं ब्रह्मेति ॥ अपावृतं निरावरणं स्वतंत्रं च अत एव सर्वेषामपि त्राणं रक्षणं स्थितिः
जीवनं त्राणस्थितिः सहितानां च प्ययो द्भवो यस्मात्स त्वमुपादानकारणमित्यर्थः ॥ १ ॥ न त्वस्मदाचारप्रमाणमात्र च ॥ याथातथ्येन यथार्थत्वे
न सर्वभूतकारणं त्वां ब्राह्मणा वेदतात्पर्यविदः ॥ २ ॥ राम राम राम

श्री
भा०
ए
६३
९९

एवं कारणत्वेन सर्वात्मत्वमनूद्य विभूतीः पृच्छति येष्विति ॥ उपासीनाः सेवमानाः संतः ॥ २ ॥ दुर्ज्ञेयत्वमेवाह गूढ इति । अस्फुटः भूतानां प्राणिनां
मध्ये श्चरेद तु भूतानामंतर्यामीत्यर्थः ॥ तत्रापि हेतुः हे भूतभावनेति ते त्वया ॥ ३ ॥ एतदेव साकल्येन पृच्छति ॥ हे महाविभूते याः काश्च भूम्या
दिषु ते विभूतयः रसायां रसातले अनुभाविताः त्वयैव केनचिद्विशेषेण संयोजिताः तीर्थानां पदं चरणद्वंद्वं चरणपद्मं च ॥ ४ ॥ नरावतारभूतार्जु
न प्रश्नसंवादित्वान्न वायं प्रश्नः साधीयानिति तावदस्य मोदते एवमिति त्रिभिः ॥ प्रश्नः पृष्टव्यः सपत्नैर्योद्धुमिच्छुना विनशने कुरुक्षेत्रे ॥ ५ ॥

येषु येषु च भावेषु भक्त्या त्वां परमर्षयः ॥ उपासीनाः प्रपद्यंते संसिद्धिं तद्वदस्व मे ॥ २ ॥ गूढश्चरसि भूतात्मा भूतानां भूतभावन ॥ न त्वां पश्यंति भूतानि पश्यंतं मोहितानि ते ॥ ३ ॥ याः काश्च भूमौ दिवि वै रसायां विभूतयो दिक्षु महाविभूते ॥ ता मह्यमाख्याह्यनुभाविताः ते नमामि ते तीर्थपदांघ्रियुग्मं ॥ ४ ॥ श्री ग उ च ॥ एवमेतदहं पृष्टः प्रश्नं प्रश्नविदांवर ॥ युयुत्सुना विनशने सपत्नैरर्जुनेन वै ॥ ५ ॥ ज्ञात्वा ज्ञातिवधं गर्ह्यमधर्मं राज्यहेतुकं ॥ ततो निवृत्तो हंताहं हतोयमिति लौकिकः ॥ ६ ॥ स तदा पुरुषव्याघ्रो युक्त्या मे प्रतिबोधितः ॥ अभ्यभाषत मामेवं यथा त्वं रणमूर्धनि ॥ ७ ॥ अहमात्मोद्धवामीषां भूतानां सुहृदीश्वरः ॥ अहं सर्वाणि भूतानि तेषां स्थित्युद्भवाप्ययः ॥ ८ ॥ राम राम

युयुत्सोः प्रश्ने कः प्रसंगस्तत्राह ज्ञात्वेति ॥ लौकिकः प्राकृतमतिः सन् ॥ ६ ॥ स च यदा ततो ज्ञातिवधान्निवृत्तः तदा मया प्रतिबोधितः सन् यथा त्व
मभिभाषसे एवं संप्रश्नमुक्तवान् मामभ्यभाषत तदेव तुभ्यं कथयिष्यामीति भावः ॥ ७ ॥ तत्र विभूतीः कथयति अहमिति ॥ अस्मत्कृतसमन्वाधि
कारणाः प्रथमांताः द्वितीयांताश्चेति सर्वा विभूतयः ताश्चोपासनार्थं कथ्यंते ॥ षष्ठी च निर्धारणे संबंधे च क्वचिद्यथायोग्यं द्रष्टव्या ततश्चामी
षां भूतानामात्मेति सुहृदिति ईश्वर इति च सामान्येनाहमुपास्य इत्यर्थः ॥ एवं सर्वत्र तेषां स्थित्युद्भवाप्ययास्तद्धेतुरित्यर्थः ॥ ८ ॥

राम
६३
९९

विशेषतो विभ्रतीराऽहं ॥ कलयतां वशीकुर्वतां मध्ये गुणानां सत्त्वादीनां साम्यमव्याकृतं गुणिनि धर्मिणि औत्पत्तिकः स्वाभाविको यो गुणः सोऽहं
मित्यर्थः ॥१०॥ सूत्रं प्रथमकार्यं महान्महत्तत्त्वं सूक्ष्मोपाधित्वात् दुर्ज्ञेयत्वाच्च जीवस्य सूक्ष्मत्वं ॥११॥ बुद्धेर्गुणेनात्मगुणेनैवं मात्रोऽपि ह्य
परोऽपि दृष्ट इति श्रुतेः ॥ वेदानां संबंधी तेषामध्यापकः पदानि त्रिपदा गायत्रीत्यर्थः ॥१२॥ हविर्धानी कामधेनुः ॥१४॥ नक्षत्रौषधीनां प्रभुं

आराग्र २

श्री

वेदा २

अहं गतिर्गतिमतां कालः कलयतामहं ॥ गुणानामप्यहं साम्यं गुणिन्यौत्पत्तिको गुणः ॥१०॥ गुणिनामप्यहं सूत्रं महतां
च महानहं ॥ सूक्ष्माणामप्यहं जीवो दुर्जयानामहं मनः ॥११॥ हिरण्यगर्भो वेदानां मन्त्राणां प्रणवस्त्रिवृत् ॥ अक्षरा
पदानि
णामकारोऽस्मि गायत्री छंदसामहं ॥१२॥ इंद्रोऽहं सर्वदेवानां वसूनामस्मि हव्यवाट् ॥ आदित्यानामहं विष्णू रुद्राणां नील
लोहितः ॥१३॥ महर्षीणां भृगुरहं राजर्षीणामहं मनुः ॥ देवर्षीणां नारदोऽहं हविर्धान्यस्मि धेनुषु ॥१४॥ सिद्धेश्वराणां
कपिलः सुपर्णोऽहं पतत्रिणां ॥ प्रजापतीनां दक्षोऽहं पितृणामहमर्यमा ॥१५॥ मां विद्ध्युद्धव दैत्यानां प्रह्लादमसुरेश्वरं
सोमं नक्षत्रौषधीनां धनेशं यक्षरक्षसां ॥१६॥ ऐरावतं गजेंद्राणां वरुणं यादसां प्रभुं ॥ तपतां द्युमतां सूर्यं मनुष्याणां च
भूमिपं ॥१७॥ उच्चैःश्रवास्तुरंगाणां धातूनामस्मि कांचनं ॥ यमः संयमतां चाहं सर्पाणामस्मि वासुकिः ॥१८॥ नागें
द्राणामनंतोऽहं मृगेंद्रः शृंगिदंष्ट्रिणां ॥ आश्रमाणामहं तुर्यो वर्णानां प्रथमोऽनघ ॥१९॥ तीर्थानां स्रोतसां गंगा समु
द्रः सरसामहं ॥ आयुधानां धनुरहं त्रिपुरघ्नो धनुष्मतां ॥२०॥ ॥राम॥ राम ॥ राम

सोमं यक्षरक्षसां प्रभुमित्यर्थः ॥१६॥ यादसां प्रभुं तपतां प्रतापवतां दीप्तिमतां च मध्ये तेषां प्रभुं वा ॥१७॥ संयमतां दंडयतामित्यर्थः ॥१८॥
शृंगिणां दंष्ट्रिणां च मध्ये प्रभुः ॥ तुर्यः संन्यासः प्रथमो ब्राह्मणः अनघेति संबोधनं ॥१९॥ स्रोतसां प्रवाहानां मध्ये सरसां च स्थिरोदकाश
तेषां
यानां ॥२०॥

धिष्ण्यानां निवासस्थानानां गहनानां दुर्गमाणां ॥ २१ ॥ ब्रह्मिष्ठानां वेदार्थनिष्ठानां ॥ [illegible] चमूपतीनां अग्रण्यां सन्मार्गप्रवर्तकानामजः ब्रह्मा ॥ २२ ॥ शुचीनां शोधकानामपि मार्जनलक्षणं च घर्षणादीनां मध्ये वाय्वादिरूपः शोधको[illegible]त्यर्थः ॥ २३ ॥ योगानां योगांगानामष्टानां मध्ये आत्मसंरोधः समाधिरहं मंत्रो नीतिः कौशलानां विवेकादिनिपुणानां मध्ये आन्वीक्षिकी आत्मानात्मविवेकोस्मीत्यर्थः ख्यात्यख्यात्यन्यथाख्यात्यसत्ख्यात्यनिर्वचनीयाख्यातिवादिनामिदमेवं चेति उक्तो विकल्पः सोहमेव ॥ २४ ॥ कुमारः सनत्कुमारः ॥ २५ ॥ संन्या

धिष्ण्यानामस्म्यहं मेरुर्गहनानां हिमालयः ॥ वनस्पतीनामश्वत्थ ओषधीनामहं यवः ॥ २१ ॥ पुरोधसां वसिष्ठोहं ब्रह्मिष्ठानां बृहस्पतिः ॥ स्कंदोहं सर्वसेन्यानामग्रण्यो भगवानजः ॥ २२ ॥ यज्ञानां ब्रह्मयज्ञोहं व्रतानामविहिंसनं ॥ वाय्वग्न्यर्कांबुवागात्मा शुचीनामप्यहं शुचिः ॥ २३ ॥ योगानामात्मसंरोधो मंत्रोस्मि विजिगीषतां ॥ आन्वीक्षिकी कौशलानां विकल्पः ख्यातिवादिनां ॥ २४ ॥ स्त्रीणां तु शतरूपाहं पुंसां स्वायंभुवो मनुः ॥ नारायणो मुनीनां च कुमारो ब्रह्मचारिणां ॥ २५ ॥ धर्माणामस्मि संन्यासः क्षेमाणामबहिर्मतिः ॥ गुह्यानां सूनृतं मौनं मिथुनानामजस्त्वहं ॥ २६ ॥ संवत्सरोस्म्यनिमिषामृतूनां मधुमाधवौ ॥ मासानां मार्गशीर्षोहं नक्षत्राणां तथाभिजित् ॥ २७ ॥

सोस्त्वभयदानं क्षेमाणामभयस्थानानां मध्ये अबहिर्मतिः अंतर्निष्ठा सूनृतं प्रियवचनं मौनं तु न किंचिदप्रियभाषणं मौने च प्रसंगस्याभिप्रायो ज्ञायते अजः प्रजापतिः यस्य देहार्धाभ्यां मिथुनमभूत् स एव मुख्यं मिथुनं अर्धांगरूपत्वात् एष आत्मनो यत्पत्नीति श्रुतेः ॥ २६ ॥ अनिमिषाणामृतूनां मधुमाधवौ वसंतऋतुरित्यर्थः अभिजित् उत्तराषाढाचतुर्थपादः तथा च स्मृतिः ॥ अभिजिन्नाम नक्षत्रमुपरिष्टादाषाढानामधस्तात् श्रवणस्य इत्यादि ॥ २७ ॥

श्री भा टी ६४ ९८

विवेक ३ न्यथा ३

राम ६४ ९८

ऋतं कृतयुगमित्यर्थः देवलः असितश्च व्यासानां वेदविभागकारकाणां व्यासोऽस्मि कवीनां विदुषां मध्ये काव्यः शुक्र इत्यर्थः ॥ २८ ॥ भगवतां उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ॥ वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥ २९ ॥ सुपेशसां सुंदराणां दर्भजातीनां काशकुशादीनां हविःषु च पुरोडाशादिषु घृतेषु वा ॥ ३० ॥ लक्ष्मीर्धनादिसंपत् ॥ ३१ ॥ बलवतामोजः सहश्च सात्वतां भागवतानां भक्त्याकृतं कर्माहमित्यर्थः

युगानां च कृतं धीराणां देवलोऽसितः ॥ द्वैपायनोऽस्मि व्यासानां कवीनां काव्य आत्मवान् ॥ २८ ॥ वासुदेवो भगवतां त्वं तु भागवतेष्वहं ॥ किंपुरुषाणां हनुमान्विद्याध्राणां सुदर्शनः ॥ २९ ॥ रत्नानां पद्मरागोऽस्मि पद्मकोशः सुपेशसां ॥ कुशोऽस्मि दर्भजातीनां गव्यमाज्यं हविःष्वहं ॥ ३० ॥ व्यवसायिनामहं लक्ष्मीः कितवानां छलग्रहः ॥ तितिक्षास्मि तितिक्षूणां सत्त्वं सत्त्ववतामहं ॥ ३१ ॥ ओजः सहो बलवतां कर्माहं विद्धि सात्वतां ॥ सात्वतां नवमूर्तीनामादिमूर्तिरहं परा ॥ ३२ ॥ विश्वावसुः पूर्वचित्तिर्गंधर्वाप्सरसामहं ॥ भूधराणामहं स्थैर्यं गंधमात्रं तथा भुवः ॥ ३३ ॥ अपां रसश्च परमस्तेजिष्ठानां विभावसुः ॥ प्रभा सूर्येंदुताराणां शब्दोऽहं नभसः परः ॥ ३४ ॥ ब्रह्मण्यानां बलिरहं वीराणामहमर्जुनः ॥ भूतानां स्थितिरुत्पत्तिरहं वै प्रतिसंक्रमः ॥ ३५ ॥ गत्युक्त्युत्सर्गोपादानमानंदस्पर्शलक्षणं ॥ आस्वादश्रुत्यवघ्राणमहं सर्वेंद्रियेंद्रियं ३६

तेषामेकनवव्यूहार्चनेन वासुदेवसंकर्षणप्रद्युम्नानिरुद्धनारायणहयग्रीववराहनृसिंहब्राह्मणा इति या नवमूर्तयस्तासां मध्ये वासुदेवाख्या ॥ ३२ ॥ गंधर्वाणां विश्वावसुः अप्सरसां पूर्वचित्तिः गंधमात्रमविकृतं ॥ ३३ ॥ परमः मधुरः परा व्योमः शब्दः ॥ ३४ ॥ अर्जुनः पार्थः भूतानां प्राणिनां प्रतिसंक्रमः प्रलयः ॥ ३५ ॥ गत्यादयः पंचकर्मेंद्रियव्यापाराः स्पर्शादयो ज्ञानेंद्रियव्यापाराः तत्र लक्षणं दर्शनं सर्वेंद्रियाणामिंद्रियं तत्तदर्थग्रहणशक्तिरूपमहं ॥ ३६ ॥

श्री
भा॰टी॰
९५
९८

तदेवं तत्र तत्र निर्धारणेन तत्संबंधेन च विशेषतो विभूतीर्निरूप्येदानीं सामान्यतः सर्वा अपि निरूपयति पृथिवीति सार्धद्वयेन॥ पृथिव्यादि
शब्दैः तन्मात्राणि विवक्षितानि अहं अहंकारः महान्महत्तत्त्वं एताः सप्त प्रकृतिविकृतयः विकाराः पंचमहाभूतानि एकादशेंद्रियाणि चेत्येवं षो
डशसंख्याकः पुरुषो जीवः अव्यक्तं प्रकृतिः एवं पंचविंशति तत्त्वानि॥ ननूक्तं मूलप्रकृतिरविकृतिः महदाद्याः प्रकृतिविकृतयः सप्त षोडश
कस्तु विकारो न प्रकृतिर्न च विकृतिः पुरुष इति किंच रजः सत्त्वं तम इति प्रकृतेर्गुणास्तु परं ब्रह्म च॥ किंच तदेतत्सर्वमहमेव किंच एतत्संख्या
नमेतेषां परिगणनमेतेषां लक्षणतो ज्ञानं च तत्फलं तत्त्वविनिश्चयश्च स्वरूपमेव॥३६॥ तदेवं संक्षिप्याहमयेति॥ जीवेश्वरभूतो द्विविधो भावः

पृथिवी वायुराकाशमापो ज्योतिरहं महान्॥ विकारः पुरुषोऽव्यक्तं रजः सत्त्वं तमः परं॥ अहमेतत्प्रसंख्यानं ज्ञानं तत्त्ववि
निश्चयः॥३७॥ मयेश्वरेण जीवेन गुणेन गुणिना विना॥ सर्वात्मनापि सर्वेण न भावो विद्यते क्वचित्॥३८॥ संख्यानं पर
माणूनां कालेन क्रियते मया॥ न तथा मे विभूतीनां सृजतोऽण्डानि कोटिशः॥३९॥ तेजः श्रीः कीर्तिरैश्वर्यं ह्रीस्त्यागः सौभगं
भगः॥ वीर्यं तितिक्षा विज्ञानं यत्र यत्र स मेंऽशकः॥४०॥

यस्तु गुणगुणिरूपः यस्तु क्षेत्रज्ञः क्षेत्ररूपः स सर्वोऽपि मया विना मद्व्यतिरेकेण नास्ति अतो अहमेव सर्वमित्यर्थः॥३८॥ ननु सामान्यतः किमेवं सं
क्षिप्य कथयसि पूर्ववन्निर्धारणसंबंधाभ्यां विशेषतः सर्वान्कथयेति चेत्तत्राह॥ संख्यानं पृथिव्यादिपरमाणूनां कालेन महता तदपि मयैव
क्रियते इति शक्यं बालकैः शक्यते न तथा मे विभूतीनां संख्यानं कल्पैरपि न शक्यते कुतः उत्पादकस्य सृजतोऽण्डानीति॥ यदहमयोरुत्पन्नानामण्डानामेव ता
वत्संख्या नास्ति किं च कुतस्तद्गुणानां विभूतीनां संख्येत्यर्थः॥३९॥ तथापि विशेषतः एव सर्वा अपि संक्षेपतः कथयामीत्याह॥ तेजः प्रभावः श्रीः सं
पत् सौभगं मनोनयनाह्लादकं भगः भाग्यं वीर्यं बलं यत्र मदंशकः विभूतिः॥४०॥ राम राम राम

राम
५५
९८

उपसंहरन्निपतताइति ॥ एतेच विभूतिभेदा मयि चित्तावतारा य कथिताः अतो मार्त्ते वाभिनिवेशः कर्त्तव्यइत्याह ॥ मनोविकारा एव नतु पर मार्थतः यथा किंचित्सुखादिवाङ्मात्रेणाभिधीयते तत्तुल्याः ५१ तस्माद्रागादीनियच्छ आत्मानं बुद्धिमात्मना सत्वसंपन्नैर्ये वयच्छ ॥ अध्ध्व ने संसारमार्गायनकल्पसे तात्पर्यार्थः ॥ ५२ ॥ असंयमने दोषमाह यइति ॥ असंयच्छन्नसंयच्छतीत्यर्थः ॥ ५३ ॥ परिसमाप्यते इत्यतः तत्त्वोम वतीत्यर्थः ॥ ५४ ॥ ३ श्री का ग धे ३ ध्या ॥ १६ ॥ ततः सप्तदशेऽध्याये स्वधर्मे भक्तिलक्षणे ॥ हंसोक्तं धर्ममन्वाह ब्रह्मचारि

एतास्ते कीर्त्तिताः सर्वाः संक्षेपेण विभूतयः ॥ मनोविकारा एवैते यथा वाचाभिधीयते ॥ ५१ ॥ वाचं यच्छ मनो यच्छ प्राणान्यच्छेन्द्रियाणि च ॥ आत्मानमात्मना यच्छ न भूयः कल्पसेऽध्वने ॥ ५२ ॥ यो वै वाङ्मनसी सम्यगसंयच्छन्धिया यतिः ॥ तस्य व्रतं तपो दानं स्रवत्यामघटाम्बुवत् ॥ ५३ ॥ तस्माद्वचो मनः प्राणान्नियच्छेन्मत्परायणः ॥ मद्भक्तियुक्तया बुद्ध्या ततः परिसमाप्यते ॥ ५४ ॥ ३ श्री ग ते ह्या सा ए द स्कं ॥ विभूतिवर्णनं ॥ म ३ ध्या ॥ १६ ॥ राम ॥ राम
३ उ वा ॥ यस्त्वयाभिहितः पूर्वं धर्मस्त्वद्भक्तिलक्षणः ॥ वर्णाश्रमाचारवतां सर्वेषां द्विपदामपि ॥ १ ॥ यथानुष्ठीयमानेन त्वयि भक्तिर्नृणां भवेत् ॥ स्वधर्मेणारविंदाक्ष तन्समाख्यातुमर्हसि ॥ २ ॥ ॥ राम ॥ राम

गृहस्थयो विविनिरूपयति ॥ कर्मादृंविद्धि सात्त्विकतामित्यत्र भक्तयाकृतं कर्म मोक्षसाधनं मद्विभूतिषित्युक्तं भक्तिसाधनत्वंच कर्मणां ॥ मयोदिते ष्ववहितः स्वधर्मेष्वित्यादिना तत्र तत्रोक्तं नच कर्मानुष्ठानेणांनियमेन भक्तिर्दृश्यते अतः परं पृच्छति यस्त्वयाभिहित इति सप्तभिः ॥ पूर्वं कल्पादौ त्वद्भक्तिलक्षणः त्वद्भक्त्यापकः तत्साधनमित्यर्थः ॥ वर्णाश्रमादीनां नाममपि द्विपदां नराणामित्यर्थः ॥ १ ॥ यथा येन प्रकारेणानुष्ठीयमानेन स्वधर्मे
ण ॥ २

श्री
भा॰टी॰
११
६६
६५

नकेवलंस्रष्टा दादावेव ज्ञातस्त्वसे किंपुनर्वर्णनेन तत्राह पुरेति ॥ परमकं परमश्रेष्ठं सौकं सत्सुखरूपस्य श्रुतं यत्र यद्धंसरूपेणधर्मोप्युक्तस्त एव न तु ये गमाकं
जानीतमागतं यज्ञं युष्माकं इमे विवक्षय इत्युक्तवान् ॥ ३ ॥ प्रागनुशासितोऽपि न भविता न भविष्यति ॥ ४ ॥ अवेदत्वमाह वक्तेति द्वाभ्यां ॥ तेन तत्रोन्याः
कलावेदाद्याः ॥ ५ ॥ तत्तस्मान्नः अस्माकं मनुष्याणां मध्ये यस्य यथा विधीयते तथा वर्णयेति भावः ॥ ७ ॥ धर्म्यो धर्मानपेतः अतो नैःश्रेयसकरः

पुरा किल महाबाहो धर्मं परमकं प्रभो ॥ यत्तेन हंसरूपेण ब्रह्मणेभ्यात्थ माधव ॥ ३ ॥ स इदानीं सुमहता कालेनामित्र
कर्षण ॥ न प्रायो भविता मर्त्यलोके प्रागनुशासितः ॥ ४ ॥ वक्ता कर्तावितानान्यो धर्मस्याच्युत ते भुवि ॥ सभायामपि वै
रिंच्यां यत्र मूर्तिधराः कलाः ॥ ५ ॥ कर्त्रावित्रा प्रवक्त्रा च भवता मधुसूदन ॥ त्यक्ते महीतले देव विनष्टं कः प्रवक्ष्यति ॥ ६ ॥
तत्त्वं नः सर्वधर्मज्ञ धर्मस्त्वद्भक्तिलक्षणः ॥ यथा यस्य विधीयेत तथा वर्णय नः प्रभो ॥ ७ ॥ श्री शु वा ॥ इत्थं स्व
भृत्यमुख्येन पृष्टः स भगवान् हरिः ॥ प्रीतः क्षेमाय मर्त्यानां धर्मानाह सनातनान् ॥ ८ ॥ श्री भ उ च ॥ धर्म्य एष
तव प्रश्नो नैःश्रेयसकरो नृणां ॥ वर्णाश्रमाचारवतां तमुद्धव निबोध मे ॥ ९ ॥ आदौ कृतयुगे वर्णो नृणां हंस इति स्मृ
तः ॥ कृतकृत्याः प्रजा जात्या तस्मात्कृतयुगं विदुः ॥ १० ॥ राम राम राम

भक्तिजनकः अतो मे मत्तः तं धर्मं निबोध ॥ ९ ॥ तत्रादौ मदुपासनालक्षण एव मुख्यो धर्म आसीत् आचारलक्षणस्तु पश्चात्प्रवृत्तः स
वै कमनुष्ठितो भक्तिहेतुरिति वर्णयितुमाह आदाविति ॥ कल्पादौ यत्कृतयुगं तस्मिंस्तेच तदा मामुपासत ॥ एवं केवलं नान्यत्कुर्वन्तीति वक्तुं
कृतयुगनाम निरुक्तिमाह कृतकृत्या इति जात्या जन्मनैव ॥ १० ॥ राम राम राम

राम
६६
६५

किंचविधायकाभावादपितदानींनान्यत्कर्मास्तीत्याहवेदइति ॥ धर्मोऽहंमनोविषयोऽहमेववृषरूपधृक्चतुष्पात् नक्रियाविषयोज्ञानादिः श्रुतः तपोनिष्ठाः मनसश्चेंद्रियाणांचस्वैकाग्र्यंपरमंतपइतिवचनात् एकाग्रतयाहंसंशुद्धंमांध्यायंतीत्यर्थः ॥ ११ ॥ पश्चात्त्रेतायुगप्रवेशेमेवै राजरूपस्यप्राणात्त्रिभिन्नाद्धृदयात्सकाशात् तस्यास्त्रय्याःसकाशात्होत्राध्वर्यवौद्गात्रैःत्रिवृत्त्रिरूपःयज्ञोवैविष्णुरितिश्रुतेः ॥ १२ ॥ वर्णा

वेदःप्रणवएवाग्रेधर्मोऽहंवृषरूपधृक् ॥ उपासतेतपोनिष्ठाहंसंमांमुक्तकिल्बिषाः ॥ ११ ॥ त्रेतामुखेमहाभागप्राणान्मेहृदयात्त्रयी ॥ विद्याप्रादुरभूत्तस्याअहमासीत्त्रिवृन्मखः ॥ १२ ॥ विप्रक्षत्रियविट्शूद्रामुखबाहूरुपादजाः ॥ वैराजात्पुरुषाज्जाताय आत्माचारलक्षणाः ॥ १३ ॥ गृहाश्रमोजघनतोब्रह्मचर्यंहृदोमम ॥ वक्षःस्थलाद्वनेवासोन्यासःशीर्षणिसंस्थितः ॥ १४ ॥ वर्णानामाश्रमाणांचजन्मभूम्यनुसारिणीः ॥ आसन्प्रकृतयोनृणांनीचैर्नीचोत्तमोत्तमाः ॥ १५ ॥ शमोदमस्तपःशौचंसंतोषःक्षांतिरार्जवं ॥ मद्भक्तिश्चदयासत्यंब्रह्मप्रकृतयस्त्विमाः ॥ १६ ॥ आस्तिक्यंदाननिष्ठाचअदंभोविप्रसेवनं अतुष्टिरर्थोपचयैर्वैश्यप्रकृतयस्त्विमाः ॥ १८ ॥ तेजोबलंधृतिःशौर्यंतितिक्षौदार्यमुद्यमः ॥ स्थैर्यंब्रह्मण्यमैश्वर्यंक्षत्रप्रकृतयस्त्विमाः ॥ १७ ॥ शुश्रूषणंद्विजगवांदेवानांचाप्यमायया ॥ तत्रलब्धेनसंतोषःशूद्रप्रकृतयस्त्विमाः ॥ १९ ॥ ॥

नामाश्रमाणांचधर्मान्वक्तुंतेषामुत्पत्तिमाहविप्रेतिद्वाभ्यां ॥ आत्माचारःस्वधर्मएवलक्षणंज्ञापकोयेषां ॥ १३ ॥ममवैराजरूपस्यहृदःवक्षसोऽधःस्थलात् ब्रह्मचर्यमितिनैष्ठिकाभिप्रायं ॥ १४ ॥ तेषामधिकारविशेषेणस्वभावानाहवर्णानामितिपंचभिः ॥ जन्मस्थानानुसारिणीःनीचैरित्यत्रायमर्थः मंदाभिर्जन्मभूमिभिर्नीचाःउत्तमाभिरुत्तमाश्चेति ॥ १५ ॥ तपआलोचनं ॥ १६ ॥ तेजःप्रतापः एतेएवाश्रमस्वभावाअपिज्ञेयाः ॥ १७ ॥ १८ ॥ १९ ॥

श्री भारी ० ६८ ८.

तद्ब्राह्मणानां स्वभावानादृश्यशौचमिति ॥ शुद्धविग्रहः निर्मलकलेवरः तेषां तु स्नेत्यर्थः ॥ १९ ॥ ते च तावत्सर्वसाधारणं धर्ममाह अहिंसेति वर्णाश्रमाणामुपलक्षणार्थं वर्णधर्मोन्नृपस्य प्रकरणेवक्ष्यति ॥ २१ ॥ प्रथमं तावद्ब्राह्मणेषु ब्रह्मचारिणो धर्मो वर्ण्यते स च द्विविधः उपकुर्वाणो नैष्ठिकश्च ॥ तत्राद्यस्य धर्मानाह द्वितीयमिति न वर्मिः ॥ द्विजस्त्रैवर्णिकः आनुपूर्व्याद्गर्भाधानादिसंस्कारक्रमेण द्वितीयमुपनयनाख्यं जन्म प्राप्याचार्येण ब्रह्मवेदमधीयेत न च कारणान्तरं च विचारयेत् ॥ २२ ॥ किं च मेखलादीन्दण्डश्चाशुरधत्त अत्रा दशशब्देनाक्षमालाकथं

अशौचमहतं स्तेयं नास्तिक्यं शुद्धविग्रहः ॥ कामः क्रोधश्च तेषां च स्वभावो नैव सायिनां ॥ १९ ॥ अहिंसासत्यमस्तेयमकामक्रोधलोभता ॥ भूतप्रियहितेहा च धर्मोयं सार्ववर्णिकः ॥ २१ ॥ द्वितीयं प्राप्यानुपूर्व्याज्जन्मोपनयनं द्विजः वसन्गुरुकुले दान्तो ब्रह्माधीयीत वाग्यतः ॥ २२ ॥ मेखलाजिनदंडाक्षब्रह्मसूत्रकमंडलून् ॥ जटिलो धौतदद्वासोरक्तपीठः कुशान्दधत् ॥ २३ ॥ स्नानभोजनहोमेषु जपोच्चारे च वाग्यतः ॥ नोछिंद्यान्नखरोमाणि कक्षोपस्थगतान्यपि ॥ २४ ॥ रेतो नावकिरेज्जातु ब्रह्मव्रतधरः स्वयं ॥ अवकीर्णेवगाह्याप्सु द्दितासुस्त्रिपदीं जपेत् ॥ २५ ॥ राम

यतो जटिलः अनभ्यंगादिना जातजटः तथा अधौतदद्वासः दंतान्नु वासांसि च दद्वासांसि न धौतानि यस्य सः तथा अरक्तपीठः न कौसुंभादिना रक्तं पीठं यस्य सः ॥ २३ ॥ जपश्च उच्चारो मूत्रपुरीषोत्सर्गश्च जपोच्चारं च तस्मिन्वाग्यतः मौनी भवेदित्यर्थः ॥ २४ ॥ रेतो बुद्धिपूर्वकं नावकिरेन्नोत्सृजेत् ब्रह्मव्रतधरः अगृहस्थः स्वयमेव कथं चिदवकीर्णे अवगाह्य स्नात्वा यजितासुः कृतप्राणायामः त्रिपदीं गायत्रीमयुतं जपेदिति ॥ २५ ॥

राम ६८ ८.

संध्ये च द्वे यतवाक् जपन्नुपासीत ॥ मध्याह्ने संध्यानिमित्तं मौनं नास्तीति द्विवचनं ॥ २६ ॥ अन्यदपि संज्ञाप्तं तन्निवेदये तेनेनानुज्ञातं तु संयतः सन्नुपभुंजीतेत्यर्थः ॥ २८ ॥ यानशय्यासनस्थानैः यानं पृष्ठतो यानेन निर्दिष्टमप्रमत्ततया समीपशयनेन विश्रान्तं पादसंवाहनादिभिः समीपासनेनासीनं कृतांजलिर्नियोगप्रतीक्षया नातिदूरे स्थानेनेत्यर्थः ॥ २९ ॥ एवंभूतेह त्तं यस्य सः ॥ ३० ॥ एवमुपकुर्वाणस्य धर्मानुक्त्वा नैष्ठिकस्य विशेषधर्मानाह यदीति षड्भिः ॥ असौ ब्रह्मचारी यदि छंदसां लोकं महर्लोकं तनो ब्रह्मलोकं चारुरुक्षुः आरोढुमि

अग्न्यर्काचार्यगोविप्रगुरुवृद्धसुराञ्छुचिः ॥ समाहित उपासीत संध्ये च यतवाग्जपन् ॥ २६ ॥ आचार्यं मां विजानीयान्नावमन्येत कर्हिचित् ॥ न मर्त्यबुद्ध्यासूयेत सर्वदेवमयो गुरुः ॥ २७ ॥ सायं प्रातरुपानीय भैक्ष्यं तस्मै निवेदयेत् ॥ यच्चान्यदप्यनुज्ञातमुपभुंजीत संयतः ॥ २८ ॥ शुश्रूषमाण आचार्यं सदोपासीत नीचवत् ॥ यानशय्यासनस्थानैर्नातिदूरे कृतांजलिः ॥ २९ ॥ एवंवृत्तो गुरुकुले वसेद्भोगविवर्जितः ॥ विद्या समाप्यते यावद्बिभ्रद्व्रतमखंडितं ॥ ३० ॥ यद्यसौ छंदसां लोकमारोक्ष्यन्ब्रह्मविष्टपं ॥ गुरवे विन्यसेद्देहं स्वाध्यायार्थं बृहद्व्रतः ॥ ३१ ॥ अग्नौ गुरावात्मनि च सर्वभूतेषु मां परं ॥ अपृथग्धीरुपासीत ब्रह्मवर्चस्यकल्मषः ॥ ३२ ॥

च्छतीत्यर्थः ॥ यद्वा छंदसां लोकमिति ब्रह्मलोकविशेषणं यत्र मूर्तिधराः कलाशून्युक्तत्वात् तन दिदृक्षु बृहद्व्रतः सन् बृहन्नैष्ठिकं व्रतं यस्य सः विन्यसेत् समर्पयेदित्यर्थः ॥ अधिकस्वाध्यायार्थं वा अधीतनिवृत्त्यर्थं वा ॥ ३१ ॥ ननु सर्वत्रेश्वरोपासनं ब्रह्मचारिणः कर्तव्यमेवेत्यत आह अग्नाविति ब्रह्मवर्चः वेदाभ्यासजं तेजः तद्वान् ॥ ३२ ॥ ॥ राम ॥ राम राम राम राम राम

श्री
भा टी
ए
६८
७१

तस्यैव वचनस्य यतिसाधारणान्धर्मानाह ॥ निरीक्षणं भावगर्वं क्ष्वेलनं परिहासः एवमादि संत्यजेत् मिथुनीभूतानगृहस्थो गुर्वन्तं त्यजेत्
न पृच्छेदित्यर्थः ॥ ३२ ॥ तस्यैव वर्णाश्रमसाधारणधर्ममाह शौचमिति द्वाभ्यां ॥ ३४ ॥ ३५ ॥ निष्क्रमनैष्ठिकस्य नैष्ठिकफलमाह एवं वृमिति ॥ अ
मलो निष्कामस्त्वेवं दग्धकर्माशयोंतःकरणोऽयथाभूतः सन्ब्रह्मभक्तो भवति ॥ ३६ ॥ उपकुर्वाणस्य समावर्तनप्रकारमाह अथेत्येति ॥ अनेन
स्वत १

स्त्रीणां निरीक्षणस्पर्शसंलापक्ष्वेलनादिकं ॥ प्राणिनो मिथुनीभूतानगृहस्थो गुर्वन्तं त्यजेत् ॥ ३३ ॥ शौचमाचमनं स्ना
नं संध्योपासनमार्जनं ॥ तीर्थसेवा जपोऽस्पृश्याभक्ष्यासंभाष्यवर्जनं ॥ ३४ ॥ सर्वाश्रमप्रयुक्तोऽयं नियमः कुलनंदन
मद्भावः सर्वभूतेषु मनोवाक्कायसंयमः ॥ ३५ ॥ एवं वृहद्व्रतधरो ब्राह्मणोऽग्निरिव ज्वलन् ॥ मद्भक्तस्तीव्रतपसा दग्धक
र्माशयोऽमलः ॥ ३६ ॥ अथानंतरमावेक्ष्यन्यथा जिज्ञासितागमः ॥ गुरवे दक्षिणां दत्वा स्नायाद्गुर्वनुमोदितः ॥ ३७ ॥
राम
गृहं वनं वोपविशेत्प्रव्रजेद्वा द्विजोत्तमः ॥ आश्रमादाश्रमं गच्छेन्नान्यथामत्परश्चरेत् ॥ ३८ ॥

रं द्वितीयाश्रममावेक्ष्यन्पूर्ववेद्गृहमिच्छन्यथायथावद्विचारितविविधवेदार्थः स्नायादभ्यंगादिकं समावर्तनं नेत्यर्थः ॥ तस्याधिकारानुरूप
माश्रमविकल्पसमुच्चयावाह गृहमिति ॥ सकामश्चेत् गृहं गच्छेत् अंतःकरणशुद्ध्यादिकामश्चेद्वनं प्रविशेत् शुद्धांतःकरणश्चेद्द्वि
जोत्तमस्तु केः क्षत्रियवैश्ययोः प्रव्रज्याधिकारं सूचयति ॥ ब्राह्मणश्चेत्प्रव्रजेदित्यर्थः यद्वा आश्रमादाश्रमांतरं गच्छेत् अन्यथा अनाश्र
मी प्रतिलोमं च नाचरेदित्यर्थः अमत्पर इति वा छेदः स्वभक्तस्याश्रमनियमाभावस्य वक्ष्यमाणत्वात् ॥ ३८ ॥

राम
६८
७१

राम

विवाहनियमपूर्वकं वर्णधर्मैः सह गृहस्थधर्मानाह ॥ सदृशीमजुगुप्सितां सवर्णां कुलतो लक्षणतश्च ख्यातिं दितां कामतस्तु यामन्यामुद्व
हेत् तां सवर्णामत्र तस्याश्च अनंतरं तत्रापि वर्णक्रमेणोद्वहेदित्यर्थः ॥ उक्तं च ॥ तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमं ॥ ब्राह्मणक्षत्रिय
विशां भार्याः स्वा शूद्रजन्मनः इति स्मृतेः ॥ शूद्रस्य भार्या शूद्रैव सा च स्वा च विशः स्मृते ॥ ते चैव स्वा च राज्ञश्च ताश्च स्वा चाग्रजन्मनः इति मनुः
३१ ॥ इज्यादयः त्रैवर्णिकानामावश्यका धर्माः प्रतिग्रहादित्रयं वृत्तिः सा च ब्राह्मणस्यैव ॥ ४० ॥ तत्रापि मुख्यत्वेनमं चान्यांहृत्तिमा

गृहस्थोऽथ सदृशीं भार्यामुद्वहेदजुगुप्सितां ॥ यवीयसीं तु वयसा यां सवर्णामनुक्रमात् ॥ ३९ ॥ इज्याध्ययनदानानि
सर्वेषां च द्विजन्मनां ॥ प्रतिग्रहोऽध्यापनं च ब्राह्मणस्यैव याजनं ॥ ४० ॥ प्रतिग्रहं मन्यमानस्तपस्तेजोयशोनुदं ॥ अन्या
भ्यामेव जीवेत शिलैर्वा दोषदृष्टयोः ॥ ४१ ॥ ब्राह्मणस्य हि देहोऽयं क्षुद्रकामाय नेष्यते ॥ कृच्छ्राय तपसे चेह प्रेत्यानंत
सुखाय च ॥ ४२ ॥ शिलोंछवृत्त्यापि तद्विप्रो धर्ममर्जं विसर्जनुपाणः ॥ मध्यपितान्मा गृह्णेद्वनिष्ठत्वातिप्रसक्तः समु
पैति शांतिं ॥ ४३ ॥

रु प्रतिग्रहमिति ॥ तयोर्याजनाध्यापनयोरपि कार्पण्यादिदोषं च पश्यन् शिलैः स्वामित्यक्तैः क्षेत्रपतितैः कणिशैः ॥ ४१ ॥ एवं च वृत्तिकार्श्यं
ब्राह्मणेन सोढव्यमित्याह ब्राह्मणस्येति ॥ ४२ ॥ उंछवृत्तिर्नाम विपणादिपतितकणोपादानं ते शिलावृत्त्यैकीकृत्य ॥ ४२ ॥ तयानुष्ठितविप्रस्य
श्रेष्ठफलमाह ॥ शिलोंछेति मद्दांतमातिथ्यादिलक्षणं विसर्जं निष्कामं सेवमानः गृहस्थवर्गस्थाश्रम एव नातिप्रसक्तः अतिशयेन विराग
मत्तोर्ध्वं शांतिं समुपैति मुख्याधिकारी भवति ॥ ४३ ॥ राम राम राम

एवमधनस्य मद्भक्तस्य धनानामपाद्विभिः ॥ समुद्धरंति दारिद्र्याद्गुन्नारयंति विप्रमित्युपलक्षणं मत्परायणमेकमपि ॥४४
राजस्त्वावश्यकमेतदित्याह सर्वाइति ॥४५॥ सर्वेषामापद्गतौ राह्लसीदन्निति त्रिभिः ॥ पण्यैः विक्रयार्थैः न तु स्तुत्यालवणाद्यैः तत्रापद
क्रांतस्त्रस्तः खड्गेन क्षत्रियवृत्त्या वापदं तरेत् यद्यपि गोन मोनं नतरां पापीयसी शुद्धिं नातिष्ठेदिति स्मरन् खड्गधारणं पुण्यात्कृष्टं मन्यनेतथापि
हिंसानो वणिग्वृत्तिरेव श्रेष्ठा इति भगवतो मतं नत्वस्पृहन्यानीचसेवयानीचानामाद्रेसरः ॥४७॥ तथापि आपदि मृगयया विप्ररूपेण वा

समुद्धरंति ये विप्रं सीदंतं मत्परायणं ॥ तानुद्धरिष्येऽहं न चिरादापद्भ्यो नौरिवार्णवात् ॥४४॥ सर्वाः समुद्धरेद्राजा
पितेव व्यसनात्प्रजाः ॥ आत्मानं चात्मनाधीरो यथा गजपतिर्गजं ॥४५॥ एवं विधो नरपतिर्विमानेनार्कवर्चसा
विस्पयेदा स्वर्भं हकु मिंद्रेण सह मोदते ॥४६॥ सीदन्विप्रो वणिग्वृत्त्यापद्येरेवापदं तरेत् ॥ खड्गेन चापदाक्रांतो न
स्पृहन्याकर्षणं च न ॥४७॥ वैश्यवृत्त्या तु राजन्यो जीवन्मृगयया पदि । चरेद्वा विप्ररूपेण न स्पृहन्याकर्षणं च न ॥४८॥
शूद्रवृत्तिं भजेद्वैश्यः शूद्रः कारुकुटक्रियां ॥ उत्कृष्टस्त्वेनगर्हेणवृत्तिं लिप्सेत कर्मणा ॥४९॥ वेदाध्ययं स्व
धास्वाहाद्यल्पत्रायैर्यथोदयं ॥ देवर्षिपितृभूतानि मद्रूपाण्यन्वहं यजेत् ॥५०॥ सम

अध्यापनादिनेत्यर्थः ॥४८॥ कारवः प्रतिलोमजविशेषाः कुरुडादयः तेषां वृत्तिं कटक्रियां आपद्गतीर्णस्तु नानुकल्पेन निवर्तेत द्वृत्या
दुष्कृत्यादिति ॥४९॥ न देवं दृत्तिस्थ वस्यामुक्त्वा पुनर्गृहस्थस्यावश्यकान्यं च यज्ञानाह ॥ वेदाध्ययनं ब्रह्मयज्ञः तेन ऋषीन् स्वधाकारेण
पितृन् स्वाहाकारेण देवान् बलिहरणेन भूतानि अन्नाद्यैरनोदकादिभिर्मनुष्यानिति ज्ञानवांश्च यथोदयं विभवानुसारतः नेष्ठीश्वरदृष्टिं वि
धत्ते मद्रूपाणीति ॥५०॥

आवश्यकं धर्ममुक्त्वा शक्त्यनुसारं धर्ममाह ॥ यदृच्छयेत्यधमं विनोपार्जितेन वा शुक्लेन स्वव्रत्त्यालब्धेन धनेन वाऽभृत्यान्योर्द्धन् ॥ ५१ ॥ गृहस्थस्यापि निवृत्ति निष्ठामेवाह कुटुंबेष्विति त्रिभिः ॥ न प्रमाद्येत् कुटुंबनिष्ठायां प्रमत्तो न भवेत् ॥ ननु दृष्टादृष्टकर्मसक्तस्य कथमप्रमादः विद्यावैराग्याभ्यामित्याह विपश्चिदिति ॥ ५२ ॥ नश्वरत्वादृष्टस्य शक्तेरधिकत्वाच्छेषेणानश्वरत्वं प्रपंचयति ॥ पुत्रादीनामेकत्र संगमः पांथानां प्रपायां संगम इव ॥ तत्र हेतुः अनुदेहं प्रतिदेहमेते वियंति निश्यंति निद्रानुवर्ती स्वप्नो निद्रापाये यथेति ॥ ५३ ॥ अतिथिवदुदासीनो पि न पुत्रदारादिषु प्र

यदृच्छयोपपन्नेन शुक्लेनोपार्जितेन वा ॥ धनेनापीडयन्भृत्यान्न्यायेनैवाहरेत्क्रतून् ॥ ५१ ॥ कुटुंबेषु न सज्जेत न प्रमाद्येत्कुटुंब्यपि ॥ विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् ॥ ५२ ॥ पुत्रदाराप्तबंधूनां संगमः पांथसंगमः ॥ अनुदेहं वियंत्येते स्वप्नो निद्रानुगो यथा ॥ ५३ ॥ इत्थं परिमृशन्मुक्तो गृहेष्वतिथिवद्वसन् ॥ न गृहैरनुबध्येत निर्ममो निरहंकृतः ॥ ५४ ॥ कर्मभिर्गृहमेधीयैरिष्ट्वा मामेव भक्तिमान् ॥ तिष्ठेद्वनं चोपविशेत्प्रजावान्वा परिव्रजेत् ॥ ५५ ॥ यस्त्वासक्तमतिर्गेहे पुत्रवित्तैषणातुरः ॥ स्त्रैणः कृपणधीर्मूढो ममाहमिति बध्यते ॥ ५६ ॥ अहो मे पितरौ वृद्धौ भार्या बालात्मजात्मजाः ॥ अनाथा मामृते दीनाः कथं जीवंति दुःखिताः ॥ ५७ ॥ राम ॥ राम ॥

सक्तः ॥ ५४ ॥ आश्रमान्तरविकल्पमाह कर्मभिरिति ॥ गृहाश्रम एव तिष्ठेत् गृहाश्रमोक्तैः कर्मभिर्मामेव यजन् वनं प्रविशेत् यदि प्रजावांस्तर्हि प्रव्रजेद्वा ॥ ५५ ॥ गृहासक्तस्य संगदोषमाह यस्त्विति त्रिभिः ॥ ५६ ॥ बंधमेवाभिनयेन दर्शयति अहो इति ॥ बाला आत्मजा यस्याः सा आत्मजाश्च मां विना नाथाः संतः कथं जीविष्यंतीति एवं गृहाशयाक्षिप्तहृदयः रुद्धमतिरपि सन्नममाहमिति वचनैः एतेमम स्वरूपमेवामिति अतृप्तमनाः

६२

श्री भा टी ११ ८३

गृहेयः आशयोवासनातयासर्वतः आक्षिप्तंहृदयंयस्यसः एवंचमूढधीः अंधंतमःनामसंसीयोनिंविशतीत्यर्थः ॥ ५८ ॥ ३ श्री ग
ते का श ये प्र शो यः ॥ १७ ॥ अष्टादशेवदत्येवंवनस्थयतिगोचरं ॥ अधिकारविशेषेणविशेषंवापितद्गतमितिप्रकटयति
अधुनाक्रमप्राप्तान्वानप्रस्थधर्मान्संप्रपंचंसविशेषंसकलधर्मोत्तरंनिर्णयंप्रकटयन्नाहवनमिति ॥ आयुषस्तृतीयंभागंपंचस

एवंगृहाशयाक्षिप्तहृदयोमूढधीरयं ॥ अतृप्तस्तान्ननुध्यायन्मृतोंधंविशतेतमः ॥ ५८ ॥ ३ श्री ग ते का
श ए द स्कं ॥ भगवदुद्धवसंवादे ॥ प्र शो यः ॥ १७ ॥ श्री ग तु च ॥ वनंविविक्षुःपुत्रेषुभार्यांन्यस्य
सहैववा ॥ वनएववसेच्छांतस्तृतीयंभागमायुषः ॥ १ ॥ कंदमूलफलैर्वन्यैर्मेध्यैर्वृत्तिंप्रकल्पयेत् ॥ वसीतव
ल्कलंवासस्तृणपर्णाजिनानिवा ॥ २ ॥ केशलोमनखश्मश्रुमलानिबिभृयाद्दतः ॥ नधावेदप्सुमज्जेतत्रिका
लंस्थंडिलेशयः ॥ ३ ॥ ग्रीष्मेतप्येतपंचाग्नीन्वर्षास्वासारषाड्जले ॥ आकंठमग्नःशिशिरएवंवृत्तस्तपश्चरेत् ॥ ४ ॥
अग्निपक्वंसमश्नीयात्कालपक्वमथापिवा ॥ उलूखलाश्मकुट्टोवादंतोलूखलएववा ॥ ५ ॥ राम

प्रतिपर्यंतंनततःपरंक्षीणेंद्रियस्यविरागेपिसंन्यासाधिकारःस्यादितिभावः ॥ १ ॥ वसीतपरिदधीतेत्यर्थः ॥ २ ॥ दतःदंतान्नधावेतन
शोधयेदितित्रिकालमप्सुमज्जेतमुसलवन्नस्नायादितिस्थंडिलेशयःभूमिशायीत्यर्थः ॥ ३ ॥ पंचाग्नीन्सूर्येणसहचतुर्दिक्षुअग्नीन्निधाया
त्मानंतापयेदित्यर्थः आसारषाट्धारासंपातंसहतेइतितथा अभ्रावकाशंनामव्रतंचरेत् जलेआकंठमग्नःउदकवासंनामव्रतंचरेत् ॥ ४ ॥
उलूखलेनअश्मनावाकुट्टयतिखंडयतीतितथादंताएवोलूखलंयस्यसतथा ॥ ५ ॥ राम राम

राम ११ ८३

संचिंत्य यादृद्देहेत अन्यदा कालांतरे आह तं नैचादीतनाम्नीयादित्यर्थः कथमिति लब्धं नेव नवेन्नाद्येपुराणं तु परित्यजेदिति नारदोक्तेः
१ ॥ कालेनोदितान् आग्रायणादीन् ॥ ७ ॥ किंच अग्निहोत्रमिति ॥ मुनेश्च नैगमैः वेदवादिभिः कथितानि ॥ ८ ॥ अस्य निष्कामस्य फलमाह
एवमिति ॥ दमनिसंततः शांतरूपः अथवा धमनिभिः सिराभिः संततः व्याप्तः यावज्जीवं हि तेन तपसा मुष्कमांसरुधिरत्यर्थः आ त्रिलोका
न्महर्लोकादिक्रमेण अयं भावः अंतः करणशुद्धिमकिंदासनैव तावन्मुच्येत ॥ इति बंधकबाहुल्ये तु अनेन क्रमेण मुच्यते इति ४

स्वयं संचिंत्य यात्सर्वमात्मनेवाहृन्निकारणं ॥ देशकालबलाभिज्ञो नैचादीनान्यदाहृतं ॥ ६ ॥ वन्यैश्चरुपुरोडाशैर्निर्व
पेत्कालनोदितान् ॥ नत्वश्रौतेन पशुना मां यजेत वनाश्रमी ॥ ७ ॥ अग्निहोत्रं च दर्शश्च पूर्णमासं च पूर्ववत् ॥ चातु
र्मास्यानि च मुनेराम्नातानि च नैगमैः ॥ ८ ॥ एवं चीर्णेन तपसा मुनिर्धमनिसंततः ॥ मां तपोमयमाराध्य ऋषिलो
कादुपैति मां ॥ ९ ॥ यस्त्वेतत्कृच्छ्रतश्चीर्णं तपो निःश्रेयसं महत् ॥ कामायाल्पीयसे युंज्याद्बालिशः कोपरस्ततः ॥ १० ॥
यदासौ नियमेकल्पो जरया जातवेपथुः ॥ आत्मन्यग्नीन्समारोप्य मच्चित्तोग्निं समाविशेत् ॥ ११ ॥ यदा कर्मवि
पाकेषु लोकेषु निरयात्मसु ॥ विरागो जायते सम्यग्न्यस्ताग्निः प्रव्रजेत्ततः ॥ १२ ॥ ॥ राम ॥

तं सकामं निंदति ॥ निःश्रेयसं मोक्षफलं अल्पीयसे आविरिंचात् अन्यल्पमेव तस्मै ॥ १० ॥ एवं यावज्जीवं वर्तमानस्य मोक्षः तृतीयभागाव
साने त्वमंदविरागे संन्यासाधिकारः यदि तु तन्मध्ये रोगेण स्वधर्माशक्तो भवेत्तदपि सम्यग्विरक्तो विरक्तो मनत्रा विरक्तस्य प्रत्यमाह यदेति
जातो वेपथुः कंपो देहे यस्य सः ॥ ११ ॥ अधुना विरक्तस्य त्वाह यदेति लोकेषु ब्रह्मलोकपर्यंतेषु निरयात्मसु सुखदुःखोदर्केषु न्यस्ताग्निः
तोऽइति अग्निस्त्यागः कर्मणः वर्णाश्रमाद्वा ॥ १२

तत्रादौ कृत्यमाह ऊर्द्ध्वेति ॥ यथोपदिष्टं अग्न्याद्यष्टकापूर्वकं प्राजापत्येष्ट्यंमात्मनि इष्ट्वा स्वप्राणमात्मनि ॥ १३ ॥ संन्यासे विघ्नं भवंतीतिता नविगणय्य संन्यसेदेवेत्याशयेनाह विघ्नस्येति ॥ केनाभिप्रायेण उर्द्ध्वं तित्यमाह यमिति परं ब्रह्म ॥ १४ ॥ प्रव्रजितस्य धर्मानाह बिभ्यादि ति ॥ परं कौपीनाद्न्यद्वासो यदि धारयितुमिच्छति तर्हि कौपीनमाच्छादयते ॥ यावता तावन्मात्रमेव धारयेदित्यर्थः ॥ त्यक्तं पैपोच्छ्वासान्

इष्ट्वाय थोपदेशं मां दत्वा सर्वस्वमृत्विजे ॥ अग्नीन्स्वप्राणमावेश्य निरपेक्षः परिव्रजेत् ॥ १३ ॥ विप्रस्यैव संन्यस नो देवादासादिरूपिणः ॥ विघ्नं कुर्वंत्ययं त्वस्मान्नाक्रम्य मामियात्परं ॥ १४ ॥ बिभ्याच्चेन्मुनिर्वासः कौपीनाच्छा दनं परं ॥ त्यक्तं न दंडपात्राभ्यामन्यत्किंचिदनापदि ॥ १५ ॥ दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ॥ सत्यपूतं व देह्रा कंच मनः पूतं समाचरेत् ॥ १६ ॥ मौनानीहानिलायामा दंडा वाग्देहचेतसां ॥ न ह्येते यस्य संत्यंग वेणुभि र्न भवेद्यतिः ॥ १७ ॥ भिक्षां चतुर्षु वर्णेषु विगर्ह्यान्वर्जयंश्चरेत् ॥ सप्तागारानसंक्लृप्तांस्तुष्येल्लब्धेन तावता १८

ईमेव ज्ञानोन्यत्किंचिदपि न बिभ्यात् दंडपात्राभ्यामित्यावश्यक जलपात्र वस्त्रादेरुपलक्षणं ॥ १५ ॥ परमहंसस्य विधिनिषेधागोच रत्वाद्बहूदकानामपि इत्यं भगवान्धर्मानाह मनः पूतं मनसा सम्यग्विचार्य यत्कुशलं तदाचरेत् न साहसिको भवेत् ॥ १६ ॥ मौनं वाचो दंडः अ नीहा काम्यकर्मत्यागः देहस्य प्राणायामश्चेतसः एतेत्रयो दंडाः यस्य न संति अंग हे उद्धव वेणुभिर्वैणवैर्दंडैर्यतिर्न भवेत् ॥ १७ ॥ च तुर्ष्विति ॥ ब्राह्मणेष्वेवेत्यनिभेदेन चतुर्विधेषु सर्वस्य संभवे वा विगर्ह्यानभिशस्तपतितानसंक्लृप्तान् अत्रायं लाभो भविष्यतीति पूर्व मनुद्दिष्टान् ॥ १८

बहिर्ग्रामात् पावितं प्रोक्षणादिभिः शोधितं विभज्य विष्णुब्रह्मार्कादिभ्यः अशेषमित्यधिकादरणं निरस्तं याचितमिति पाठे ॥ माधुकरेणया
चितमन्नं चेन्न हि भुंजीत न त्वयाचितादिभेदः चतुष्टये इत्यर्थः ॥ माधुकरेति नैवेद्यं भेदेनान्येषु क्रियते ॥ नैवेद्यकं क्षिपेदप्सु तत्तृतीयं गो
तिकं यदि विति स्मृतेः ॥ यद्वा तदानीं केनापि याचितं चेत्तन्मध्ये तस्मै किंचिद्विभज्य दद्यादित्यर्थः ॥ १९ ॥ किंच एकश्चरेदिति ॥ आत्मन्येव क्री
डा कौतुकं यस्य सः आत्मन्येव रतः संतुष्टः आत्मवान् धीरः ॥ २० ॥ विविक्तं विजनं क्षेमं निर्भयं शरणं स्थानं यस्य सः मद्भावेन विमल

बहिर्जलाशयं गत्वा तत्रोपस्पृश्य वाग्यतः ॥ विभज्य पावितं शेषं भुंजीताशेषमाहृतं ॥ १९ ॥ एकश्चरेन्महीमेतां निःसं
गः संयतेंद्रियः ॥ आत्मक्रीड आत्मरत आत्मवान् समदर्शनः ॥ २० ॥ विविक्तक्षेमशरणो मद्भावविमलाशयः ॥ आत्मा
नं चिंतयेदेकं अभेदेन मया मुनिः ॥ २१ ॥ अन्वीक्षेतात्मनो बंधं मोक्षं च ज्ञाननिष्ठया ॥ बंध इंद्रियविक्षेपो मोक्ष ए
षां च संयमः ॥ २२ ॥ तस्मान्नियम्य षड्वर्गं मद्भावेन चरेन्मुनिः ॥ विरक्तः क्षुद्रकामेभ्यो लब्ध्वात्मनि सुखं महत् ॥ २३ ॥
पुरग्रामव्रजान्सार्थान् भिक्षार्थं प्रविशंश्चरेत् ॥ पुण्यदेशसरिच्छैलवनाश्रमवतीं महीं ॥ २४ ॥ वानप्रस्थाश्रम
पदेष्वभीक्ष्णं भैक्ष्यमाचरेत् ॥ संसिद्ध्यत्याश्वसंमोहः शुद्धसत्वः शिलांधसा ॥ २५ ॥ ॥ श्रीः ॥

आशयो यस्य सः ॥ २१ ॥ बंधं मोक्षं च केन बंधः केन मोक्ष इति तावाह बंध इति ॥ विषयाभिलाषो बंधः तदृतितं वं मोक्ष इति एषामिंद्रि
याणां च ... त्मस्मरणेन ॥ २२ ॥ यस्मादेवंभूतौ बंधमोक्षौ तस्मात् मद्भावेन मां स्मरन् पुरादिकं च विशन् महीं चरेदित्यर्थः ॥ २३ ॥ पुराणि
दुर्गाणि ग्रामाः ... व्रजा गोष्ठानि तान् सार्थान् यात्रिकजनसमूहान् ॥ २४ ॥ यतः शिलैः ... तदीयेनांधसान्नेन शुद्धसत्वः सन्
निर्मोहः संसिद्ध्यति विमुच्यते ॥ २५ ॥

श्री
भा॰टी॰
११
७२
७५

ननुभिक्षान्नंविमुच्यकथंशिलान्नेनतृप्तिःस्यात्तत्राहनैतदितिएतत्दृश्यमानंभिक्षान्नादिवस्तुतयानपश्येद्यतोविनश्यति॥ अतइहामुत्रच
लोकेअसक्तचित्तःसन्चिकीर्षितान्नरदेहइत्यादिविरमेत्॥२६॥ ननुतथापियावद्विनाशंस्तवदेहत्वान्नचिंतातततःकुतोविरागःस्यात्तत्राह
यदेतदिति॥ एतज्जगन्ममतास्पदंमनोवाक्प्राणैःसंहतंअहंकारास्पदंशरीरंचसर्वंतज्जन्यैस्तवदेहंच॥ आत्मनिमायामात्रमितितर्केण
स्वप्नादिदृष्टांतेनत्यक्त्वास्वस्थःआत्मनिष्ठःसन्पुनर्नैतत्स्मरेत्नचिंतयेत्॥२७॥ एवंबहूदकादिधर्मानुक्त्वापरमहंसधर्मानाहसार्धै
देशभिः॥ विरक्तोमुमुक्षुःसन्योज्ञाननिष्ठोवामोक्षेप्यनपेक्षोमद्भक्तोवासलिंगांस्त्रिदंडादिसहितानाश्रमधर्मांस्त्यक्त्वा

नैतद्वस्तुतयापश्येद्दृश्यमानंविनश्यति॥ असक्तचित्तोविरमेदिहामुत्रचिकीर्षितात्॥२६॥ यदेतदात्मनिजग
न्मनोवाक्प्राणसंहतं॥ सर्वंमायेतितर्केणस्वस्थस्त्यक्त्वानतत्स्मरेत्॥२७॥ ज्ञाननिष्ठोविरक्तोवामद्भक्तोवा
नपेक्षकः॥ सलिंगानाश्रमांस्त्यक्त्वाचरेदविधिगोचरः॥२८॥ बुधोबालकवत्क्रीडेत्कुशलोजडवच्चरेत्॥
वदेदुन्मत्तवद्विद्वान्गोचर्यांनैगमश्चरेत्॥२९॥ राम राम राम

तदासक्तिंचत्यक्त्वायथाविधितंधर्मंचरेदित्यर्थः॥ नपुनरस्यनत्यागएवविवक्षितःपुनरधर्मविधानात्अविक्रियत्वस्यात्राध्यायेव
क्ष्यमाणत्वाच्चनतर्हिपूर्वस्मात्कोविशेषःतमाह अविधिगोचरःविधिःकिंकरोनस्यादिति॥ एतदेवस्फुटीकरिष्यति॥ शौचमाचमनंस्ना
नंनतुचोदनयाचरेदित्यादिना॥२८॥ तर्हिकथंचरेत्तत्राह॥ बुधोविवेकवानपिबालवन्मानापमानविवेकशून्यःकुशलःनिपुणो
पिजडवत्फलानुसंधानाभावेनविद्वान्पंडितोप्युन्मत्तवल्लौकिकंजनाभावेननैगमोवेदार्थनिष्ठोपिगोचर्यामनियताचारमिवचरेदिति
॥२९॥

भा

राम
७२
७५

वेदवादरतः कर्मकांडव्याख्यानादिनिष्ठः पाषंडी श्रुतिस्मृतिविरुद्धाचारस्थो हैतुकः केवलतर्कनिष्ठः शुष्कवादे निष्प्रयोजने महाजल्पे यो
विवादस्तस्मिंश्च ॥२९॥ अतिवादानुजनस्य परुषोक्तानि ॥३०॥ आत्मनः स्थानात्व द्वैरूप्यं नास्तीत्युक्तमेकएवेति देहस्थस्यापि नास्तीत्याह
भूतानि देहाद्युपिकल्पमाणस्वरूपेणैकात्मकानि ॥३१॥ दैवतंत्रितं दैवाधीनं यतः न तु सर्वदैव तंत्रितादैवतंत्रितं जन्ममरणयोरपि दैवतंत्रितत्वात्
॥३२॥ अलब्ध्वा विषादे प्राप्य तत्वे नापि तत्वाद् ॥ आहारमात्रार्थं समीहेत वयं तत्तस्य प्राणधारणं युक्तं सम्यक्कथं तेन प्राणधारणेन तत्त्वं विचा

वेदवादरतो न स्यान्न पाषंडी न हैतुकः ॥ शुष्कवादविवादे न कंचित्पक्षं समाश्रयेत् ॥३०॥ नोद्विजेत जनाद्धीरो जनं चो
द्वेजयेन्न तु ॥ अतिवादांस्तितिक्षेत नावमन्येत कंचन ॥३१॥ देहमुद्दिश्य पशुवद्वैरं कुर्यान्न केनचित ॥ एक एव परो ह्या
त्मा भूतेष्वात्मन्यवस्थितः ॥ यथेंदुरुदपात्रेषु भूतान्येकात्मकानि च ॥३२॥ अलब्ध्वा न विषीदेत काले कालेऽशनं
क्वचित ॥३३॥ लब्ध्वा न हृष्येद्धृतिमानुभयं दैवतंत्रितं ॥३४॥ आहारार्थं समीहेत युक्तं तत्प्राणधारणं ॥ तत्त्वं विमृ
श्यते येन तद्विज्ञाय विमुच्यते ॥३५॥ यदृच्छयोपपन्नान्नमद्याच्छ्रेष्ठमुतापरं तथा वासस्तथा शय्यां प्राप्तं प्राप्तं भजेन्मु
निः ॥३६॥ शौचमाचमनं स्नानं न तु चोदनया चरेत् अन्यांश्च नियमाञ्ज्ञानी यथाहं लीलया चरेत् ३७ न हि तस्य वि
कल्पाख्या या च मद्वीक्षया हता ॥ आदेहांतात्क्वचित्ख्यातिस्ततः संपद्यते मया ॥३८

राम

र्यते ॥३४॥ किं तेनापि तदाह न तद्विज्ञायेति ॥३५॥ न तद्विशिष्टान्नादिकमग्राह्यमेव केचनैवमुक्तं उत्पादयदृच्छयेति ३६ यथाहमीश्वरो लीलया
चरामि तथा ज्ञानी ज्ञाननिष्ठः अनासक्तः कुर्यात्तन्न तु विधिकिंकरत्वेन तस्य ज्ञाननिष्ठाविरोधादित्यर्थः ॥३७॥ ज्ञानी विधिकिंकरो भावस्तस्य त
त्वारुनेतीति ॥ अन्यांश्च नियमान्यथा ज्ञानी चरेत् न हि तस्य विकल्पाख्या भेदप्रतीतिः न त्वस्तिस्ता ॥ सत्यं या भातीत्याप्रिमद्वीक्षया ज्ञानेन हता
न तु नष्टा पुनरुद्भूयमानत्वादत एवाह ॥ आदेहांतात्क्वचित्कदाचिद्बाधितैवाख्यातिर्भवति ॥३८॥ ॥ राम ॥

तदेवं विरक्तस्य परोक्षज्ञानवतः संन्यासं तद्धर्मांश्चोक्त्वा केवलं वैराग्यवंतं विविदिषुं प्रत्याह दुःखोदर्केष्विति । न जिज्ञासितो मद्धर्मः मत्प्राप्तिसाधनं येन सः ॥ ३९ ॥ मामेव मद्दृष्ट्या गुरुं परिचरेत् न ततः परमेकः गुरुरेव इत्यादि धर्मं चरेन्नेति भावः ॥ ४० ॥ अनधिकारिणः संन्यासं निंदति द्वाभ्यां यस्त्विति । प्रचंडो उत्पातसमर्थ इंद्रियरूपः सारथिः बुद्धिर्यस्य सः ॥ ४१ ॥ सुरान् यज्ञाद्यभावेन आत्मानं च आत्मस्थं मां च निह्नुते वंचता

दुःखोदर्केषु कामेषु जातनिर्वेद आत्मवान् ॥ अजिज्ञासितमद्धर्मो गुरुं मुनिमुपव्रजेत् ॥ ३९ ॥ तावत्परिचरेद्भक्तः श्रद्धावाननसूयकः ॥ यावद्ब्रह्म विजानीयान्मामेव गुरुमादृतः ॥ ४० ॥ यस्त्वसंयतषड्वर्गः प्रचंडेंद्रियसारथिः ॥ ज्ञानवैराग्यरहितस्त्रिदंडमुपजीवति ॥ ४१ ॥ सुरानात्मानमात्मस्थं निह्नुते मां च धर्महा ॥ अविपक्वकषायोऽस्मादमुष्माच्च विहीयते ॥ ४२ ॥ भिक्षोर्धर्मः शमोऽहिंसा तप ईक्षा वनौकसः ॥ गृहिणो भूतरक्षेज्या द्विजस्याचार्यसेवनं ॥ ४३ ॥ ब्रह्मचर्यं तपः शौचं संतोषो भूतसौहृदं ॥ गृहस्थस्याप्यृतौ गंतुः सर्वेषां मदुपासनं ॥ ४४ ॥ इति मां यः स्वधर्मेण भजेन्नित्यमनन्यभाक् ॥ सर्वभूतेषु मद्भावो मद्भक्तिं विंदते चिरात् ॥ ४५ ॥ भक्त्योद्धवानपायिन्या सर्वलोकमहेश्वरं ॥ सर्वोत्पत्त्यप्ययं ब्रह्म कारणं मोपयाति सः ॥ ४६ ॥

रयति । निष्फलत्वमाह अस्मादिति ॥ ४२ ॥ चतुर्णां प्रधानधर्मानाह भिक्षोरिति ॥ ४३ ॥ अन्यधर्मांश्च केषांचिद्गृहस्थेष्वतिदिशति ब्रह्मचर्यमिति । शौचं स्नानादि आदिर्यस्य गृहस्थस्य च ब्रह्मचर्यप्रकारमाह ऋतौ गंतुरिति ॥ ४४ ॥ एवंभूतवर्णाश्रमधर्मफलमाह इति मामिति ॥ दृढां भक्तिं विंदते ॥ ४५ ॥ ततः किं तत्राह भक्त्येति ॥ महेश्वरत्वे हेतुः सर्वोत्पत्त्यप्ययं सर्वस्योत्पत्त्यप्ययौ यस्मात् तत एव तत्कारणं मां ब्रह्म सर्वहृदि वैकुंठनिवासिनं ॥ यद्वा ब्रह्मणो वेदस्य कारणं मामुपयाति सामीप्येन प्राप्नोतीति ॥ ४६ ॥ राम राम

ततस्तस्मान्मुक्त एवेत्यादृश इतीति ॥ एवंभूतेन स्वधर्मेण निर्लिप्तं शुद्धं सत्त्वं यस्य सः अत एव निर्ज्ञाता मम गतिर्मैश्वर्यं येन ॥ ४७ ॥ उक्तमर्थं
संक्षिप्याह ॥ य एष आचारलक्षणः पितृलोकप्राप्तिफलः मद्भक्तियुतः मदर्पणेन कृतः ॥ ४८ ॥ प्रकरणार्थमुपसंहरति ॥ एतच्चेति सिद्धि
तं युद्धाभक्तो स्मृत्वा मां परमं प्राप्नुयादिति ॥ ४८ ॥ इ श्री ग ते का श्रु धु श्री शो यः ॥ १८ ॥ ज्ञानादेर्निर्णयः पूर्वं कृतो
घ
 स्वाश्रमधर्मतः ॥ एकोनविंशतितमे ज्ञानादेस्त्याग उच्यते ॥ तदेवं तर्केणाबाधितेऽपि देहादिप्रपंचे यावदपरोक्षानुभावेन दिङ्मो

इति स्वधर्मनिर्लिप्तसत्त्वो निर्ज्ञातमद्गतिः ॥ ज्ञानविज्ञानसंपन्नो विरक्तः समुपैति माम् ॥ ४७ ॥ वर्णाश्रमवतां धर्म एष
आचारलक्षणः ॥ स एव मद्भक्तियुतो निःश्रेयसकरः परः ॥ ४८ ॥ एतत्तेऽभिहितं साधो भवान्पृच्छति यच्च माम् ॥ यथा
स्वधर्मसंयुक्तो भक्तो मां समियात्परम् ॥ ४८ ॥ इ श्री ग ते दा ष ० द स्कं ॥ भगवदुद्धवसंवादे द्वादशोऽध्या
यः ॥ १८ ॥ श्री ग उ च ॥ यो विद्याश्रुतसंपन्न आत्मवान्नानुमानिकः ॥ मायामात्रमिदं ज्ञात्वा ज्ञानं च मयि संन्यसेत् ॥ १ ॥

हविव नलीयते ॥ नावज्ज्ञानाभ्यासः ततो मुक्तिरित्युक्तं ॥ आदेहान्ताच्च विद्यातिस्ततः संपद्यते मयेत्यादिना यस्यत्वपरोक्षानुभावेन प्र
पंचो लीनप्रायस्तस्य न किंचित्कृत्यमस्तीति प्रकटयंस्तदेव कथयति य इति ॥ विद्यानुभवः तात्पर्यं तेन श्रुतेन संपन्नः अत एवात्मवान्
प्राप्तात्मतत्त्वः नानुमानिकः केवलपरोक्षज्ञानवान्न भवति ॥ अन्न कारपाठे प्राक् श्रुत्यनुकूलेन तर्केणो निर्णीतार्थ इत्यर्थः ॥ सद्गुरं
है तेन तन्निष्ठ निसाधनं च मयि मायामात्रमिति ज्ञात्वा ज्ञानं च तत्साधनं संन्यसेत् अयमेव विद्वत्संन्यासो नाम ॥ १ ॥ राम

कृतं न

श्री
भाटी
ए
७४
७८

अत्र हेतुमाह ज्ञानिनस्त्विति ॥ यस्मादहमेव तस्येष्टः अनपेक्षितः स्वार्थः फलं हेतुः न तत्साधनं च संमतः स्वर्गोभ्युदयश्चापवर्गः संसारनिवृत्तिश्च अतस्तस्य नन्यात्प्रियं किंचिदस्तीत्यर्थः ॥ २ ॥ अत्र विद्वदनुभवं प्रमाणयति ज्ञानेति ॥ यथोक्तं ज्ञानमभिनंदति ज्ञानीति ॥ यतोसौ मां ज्ञानेन धारयति ॥ ३ ॥ तस्य ज्ञानं स्तौति तप इति ॥ अलं कुर्वंति अत्यर्थं ज्ञानस्य कलया लेशेन ॥ ४ ॥ उपसंहरति ॥ ज्ञानेन च सहितं तत्त्वं यथा तत्त्वं यथा भवति तथा स्वात्मानं ज्ञात्वा ज्ञानसंपन्नः सन्मामेव भज अन्यत्सर्वं त्यजेत्यर्थः ॥ ५ ॥ तस्य प्रशस्त्यार्थं पूर्वेषां वृत्तमाह ज्ञानेति ॥ मामे

ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च संमतः ॥ स्वर्गश्चैवापवर्गश्च नान्योर्थो मदृते प्रियः ॥ २ ॥ ज्ञानविज्ञानसंसिद्धाः पदं श्रेष्ठं विदुर्मम ॥ ज्ञानी प्रियतमोतो मे ज्ञानेनासौ बिभर्ति मां ॥ ३ ॥ तपस्तीर्थं जपो दानं पवित्राणीतराणि च ॥ नालं कुर्वंति तां सिद्धिं या ज्ञानकलया कृता ॥ ४ ॥ तस्माज्ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव ॥ ज्ञानविज्ञानसंपन्नो भज मां भक्तिभावितः ॥ ५ ॥ ज्ञानविज्ञानयज्ञेन मामिष्ट्वात्मानमात्मनि ॥ सर्वयज्ञपतिं मां वै संसिद्धिं मुनयोगमन् ॥ ६ ॥ त्वय्युद्धवाश्रयति यस्त्रिविधो विकारो मायांतरापतति नाद्यपवर्गयोर्यत् ॥ जन्मादयोस्य यदमी तव तस्य किं स्युराद्यंतयोर्यद

वसंसिद्धिं प्राप्ताः ॥ ६ ॥ नदेव ज्ञानं संक्षेपेन उपदिशति त्वयीति ॥ त्रिविधः आध्यात्मिकादिर्विकारः देहादिः सा मायान तु परमार्थः ॥ यस्मादंतरा मध्ये च वापतति रज्जौ सर्पमालादिवत् नाद्यपवर्गयोः नत्वादावंते चास्ति अ नो यद्यदा अस्य विकारस्य मी जन्मादयः स्युः तदा तस्य तदधिष्ठानभूतस्य किं न किंचिदस्तीत्यर्थः तस्यापि वस्तुतो न संति तस्यादेहत्वादित्यादि आद्यंतयोरिति ॥ असतः सर्पादेराद्यंतयो र्यदस्ति रज्ज्वादि तदेव मध्येपि न तु सर्पादि तद्वद्विकारो नास्तीत्यर्थः यद्वा आद्यंतयोर्यदस्ति तन्मध्येप्यस्त्येव न तस्य जन्मादयः संति ॥ ७ ॥

रा

राम
७७
७८

अतस्त्वं निर्विकारं ब्रूहीति ज्ञानादेर्विशेषजिज्ञासुः पृच्छति ज्ञानमिति ॥ विशुद्धमेतत् ज्ञानं विपुलं निश्चितं यथा भवति तथा कथयेति ॥ महद्भिर्बुद्ध्यादिभिर्विमृग्यं ॥ ४ ॥ महद्भिर्मृग्यत्वमभिनयेनाह ॥ तापत्रयेणाभिहतस्यांतः संतप्यमानस्यांघ्रिद्वंद्वमेवातपत्रं तस्मात् नन्त्वेकं केवलमातपत्रात् किं न सूतममितो वर्षति यन्तस्मात् ॥ ५ ॥ पतितस्याप्युत्थापयन्नाह दष्टमिति ॥ अस्मिन्बिले संसारकूपे पतितं तत्र च कालाहिना

मूलम्: ज्ञानं विशुद्धं विमलं यदेतद्वैराग्यविज्ञानयुतं पुराणं ॥ आख्याहि विश्वेश्वर विश्वमूर्ते त्वद्भक्तियोगं च महद्विमृग्यं ॥ ४ ॥
तापत्रयेणाभिहतस्य घोरे संतप्यमानस्य भवाध्वनीश ॥ पश्यामि नान्यच्छरणं तवांघ्रिद्वंद्वातपत्रादमृताभिवर्षात् ॥ ५ ॥
दष्टं जनं संपतितं बिलेऽस्मिन्कालाहिना क्षुद्रसुखोरुतर्षं ॥ समुद्धरैनं कृपयापवर्ग्यैर्वचोभिरासिंच महानुभाव ॥ ६ ॥
श्री शुक उवाच ॥ इति स्थितोऽस्मद्बुद्धिः पुराणपुरुषोऽव्ययः ॥ उद्धवं प्रत्युवाचेदं वचनं स्वं तमाह नः ॥ ११ ॥ श्री ग नु
च ॥ इत्थमेतत्पुरा राजा भीष्मं धर्मभृतां वरं ॥ अजातशत्रुः पप्रच्छ सर्वेषां नोऽनुशृण्वतां ॥ १२ ॥ निवृत्ते भारते युद्धे
सुहृन्निधनविह्वलः ॥ श्रुत्वा धर्मान्बहून्पश्चान्मोक्षधर्मानपृच्छत ॥ १३ ॥ तानहं तेऽभिधास्यामि देवव्रतमुखाच्छ्रुतान् ॥ ज्ञानविज्ञानवैराग्यश्रद्धाभक्त्युपबृंहितान् ॥ १४ ॥ राम राम

दष्टमपि क्षुद्रसुखेष्वेवोरुः तर्षः तृष्णा यस्य तं दश्यमानः कथं समुद्धरणीय इति चेत्तत्राह ॥ आपवर्ग्यैरपवर्गबोधकैर्वागमृतैरासिंचेति ॥ ६ ॥ तद्धि शास्त्रार्थं विहृत्य भीष्माभ्यां निर्णीतमहं तव कथयामीत्याह ॥ श्रीपुराणपुरुषः इत्थमेतदिति श्लोकैरुत्तरमवदद्भगवान् नः भूतभविष्यवर्तमानज्ञः अव्ययत्वाद्भूतानि पंच महद्भूतानि प्रकृतिपुरुषादिसहितानि तन्मात्राणि च जानातीति स भगवान् ॥ ११ ॥ इत्थं ज्ञानादिभिरुपबृंहितान् सहितानित्यर्थः ॥ १४ ॥

तत्र च ज्ञानं कथयति नवेति ॥ प्रकृतिपुरुषमहदहंकाराः पंचतन्मात्राणि एकादशेंद्रियाणि पंच महाभूतानि त्रयो गुणाः एतान्भावानष्टावि
शतितत्त्वानि भूतेषु ब्रह्मादिस्थावरांतेषु कार्येष्वनुगतानि येन ज्ञानेनेक्षेत ॥ अथ एष्वपि भावेषु एकं परमात्मतत्त्वमनुगतं येनेक्षेत तत्का
र्यकारणात्मकं जगत्पश्यंस्तु परमकारणात्मकमेवेक्षेत ॥ न तु ततः पृथगिति येन पश्येत्तु तज्ज्ञानमित्यर्थः ॥१४॥ विज्ञानमाह एतदेवेति
श्लोकार्धेन ॥ यत्र यदा येन एकेनानुगतानानेकात्मकान्भावान्पश्येत् एवमेवेक्षेत तान्नतु तथापि सर्वं ब्रह्मेक्षेत किंतु तदेकं परमकारणं ब्रह्मै
वेति तदेव विज्ञानमुच्यते ॥ एतदुक्तं भवति परोक्षज्ञानेनापरोक्षं यस्य दिष्ट्या दृष्टिरेव निरूढा भवति तदात्मकं जगत्पश्यंस्तु स्वात्म
नः पृथक्त्वादिति मन्यते अपरोक्षज्ञानेनु बाधितमेव जीवन्मुक्तः संस्कारशेषं प्रपश्यति न ततः परं न प्रपश्यतीति ॥ अतः परोक्षापरोक्षज्ञा

नवैकादशपंचत्रीन्भावान्भूतेषु येन वै ॥ ईक्षेताथैकमप्येषु तज्ज्ञानं मम निश्चितं ॥१४॥ एतदेव हि विज्ञानं न तथैकेन येन यत् ॥
स्थित्युत्पत्त्यप्ययान्पश्येद्भावानां त्रिगुणात्मनां ॥१५॥ आदावंते च मध्ये च सृज्यात्सृज्यं यदन्वियात् ॥ पुन
स्तत्प्रतिसंक्रामे यच्छिष्येत तदेव सत् ॥१६॥ राम राम राम

ने ज्ञानविज्ञानशब्दाभ्यामुच्येते इति ॥ एकेन सर्वकार्याणामनुगतं कार्याणां च कारणात्पृथक्सत्त्वं चोपपादयति सार्धेन तत्र यदि न कदा
चिदनीदृशं जगदित्याह स्थितेति तेषां भावानामुत्पत्त्यादयो न स्युः न हि कारणस्यैकस्याभावादेकात्मतामिथ्यात्वं च न स्यात् ॥ अतस्तेषा
मुत्पत्त्यादीन्साधयति स्थितीति ॥ त्रिगुणात्मकानां सावयवानामित्यर्थः ॥ विमता भावा उत्पत्त्यादिमंतः सावयवत्वात् घटादिवत्पश्येत्
॥१५॥ न तस्मादावुत्पत्तेः अंते परिणामांतरापत्तौ च कारणत्वेन मध्ये चाश्रयत्वेन सृज्यात्सृज्यं कार्यात्कार्यांतरं प्रति यदन्वियात् अनुगच्छे
त् तत्प्रतिसंक्रामे तेषां प्रलये च यच्छिष्येत तदेव सदिति परपरित्यर्थः ॥१६॥ राम राम

वैराग्यमाह श्रुतिरिति द्वाभ्यां ॥ श्रुतिः नेह नानास्ति किंचनेत्यादि प्रत्यक्षं घटपटादिकार्यं तंत्वादिव्यतिरेकेण न दृश्यते चैतन्यव्यतिरेकेण च न
किंचिद्दृश्यत इति ऐतिह्यं महाजनप्रसिद्धिः वेदेऽहं मायिकी इति एक एव हि भूतात्मा भूते भूते व्यवस्थित इति पर्यायः ॥ अनुमानं विमतं विवा
दास्पदं विश्वं मिथ्या दृश्यत्वात् शुक्तिरजतवदित्यादि ॥ एवं प्रमाणचतुष्टयं तेष्वनवस्थानात् एतैः प्रबाधितत्वात् ॥ सर्वं सर्वानुगामि
सत्यमात्मतत्त्वं प्रपश्यन् विकल्पस्य च मिथ्यात्वात् ततो विरज्यते विरक्तो भवतीत्यर्थः ॥१८॥ एवं वैराग्ये मिथ्यास्तानाज्ञाने सज्ज्ञाने भक्ति
रेव प्रकटीकरोति न च वेदोक्तस्वर्गादिसुखाशयेन विरज्येतेत्याह कर्मणामिति ॥ आविरिंच्याद्ब्रह्मलोकपर्यंतमदृष्टमपि सर्वं अमंग

श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयं ॥ प्रमाणेष्वनवस्थानाद्विकल्पात्स विरज्यते ॥१८॥ कर्मणां परिणामित्वादावि
रिंच्यादमंगलं ॥ विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् ॥१९॥ भक्तियोगः पुरैवोक्तः प्रीयमाणाय तेऽनघ ॥ पुनश्च क
थयिष्यामि मद्भक्तेः कारणं परं ॥२०॥ श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तनं ॥ परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम ॥२१॥
आदरः परिचर्यायां सर्वांगैरभिवंदनं ॥ मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः ॥२२॥ मदर्थेष्वंगचेष्टा च वचसा मद्गुणेरणं
मय्यर्पणं च मनसः सर्वकामविवर्जनं ॥२३॥ मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च ॥ इष्टं दत्तं हुतं जप्तं मदर्थं यद्व्रतं तपः ॥२४॥

लं दुःखरूपं नश्वरं च पश्येत् ॥१९॥ भक्तियोगं सकारणमाह ॥ भक्तियोगः पूर्वमुक्त एव तथापि तस्मिन् प्रीतिं प्राप्नुवते तुभ्यं पुनः कथयि
ष्यामीति ॥२०॥ श्रद्धा श्रवणादरः शश्वदिति सर्वत्रानुषज्यते ॥ मदनुकीर्तनं श्रवणानंतरं मत्कथाव्याख्यानमित्यर्थः ॥२१॥ अंगचेष्टा लौकि
की क्रिया वचसा लौकिकेनापि मद्गुणानामीरणं कथनमित्यर्थः ॥२३॥ मदर्थे मद्भजनार्थे तद्विरोधिनोऽर्थस्य परित्यागः भोगस्य तत्सा
धनस्य चंदनादेः सुखस्य पुत्रोपलालनादेः इष्टादि वैदिकं यत्कर्म तदपि मदर्थं कृतं भक्तेः कारणमित्यर्थः ॥२४॥ राम

श्रीभाग ए० १५८

भक्तिः क्षेमलक्षणा संजायते अस्य भक्तस्यान्यः कोर्थः साधनरूपः साध्यरूपो वावशिष्यते सर्वोपि स्वतएव भवतीत्यर्थः किं बहुना ॥ २५ ॥ वि
त्तमेकांततत्त्वदृष्टिनिष्ठमर्थानर्थयोः कारणं तदेवाह यदात्मनीति द्वाभ्यां ॥ यदात्मनि मय्यीश्वरे चित्तमर्पितं तदा पुमान्धर्मादीन्प्राप्नोत्येव ॥ २६ ॥ एतदे
व्यतिरेकेणाह यदीति ॥ यद्यदा तच्चित्तं विकल्पे देहगृहादावर्पितं स तद्विषयैः परिधावति न राधिकं रजस्वलमसन्निष्ठं च भवति ॥ तेन पुंविपर्य

एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनां ॥ मयि संजायते भक्तिः कोन्योर्थोस्यावशिष्यते ॥ २५ ॥ यदात्मन्यर्पितं चित्तं शांतं
सत्वोपबृंहितं ॥ धर्मं ज्ञानं सवैराग्यमैश्वर्यं चाभिपद्यते ॥ २६ ॥ यदर्पितं तद्विकल्पे इंद्रियैः परिधावति ॥ रजस्वलं चा
सन्निष्ठं चित्तं विद्धि विपर्ययं ॥ २७ ॥ धर्मो मद्भक्तिकृत्प्रोक्तो ज्ञानं चैकात्म्यदर्शनं ॥ गुणेष्वसंगो वैराग्यमैश्वर्यं चाणिमा
दयः ॥ २८ ॥ ७ व श ॥ यमः कतिविधः प्रोक्तो नियमो वारिकर्षण ॥ कः शमः को दमः कृष्ण का तितिक्षा धृतिः प्रभो
२९ ॥ किं दानं किं तपः शौर्यं किं सत्यमृतमुच्यते ॥ कस्त्यागः किं धनं चेष्टं को यज्ञः का च दक्षिणा ॥ ३० ॥ पुंसः किंस्विद्ब
लं श्रीमन्भगो लाभश्च केशव ॥ का विद्या ह्रीः परा का श्रीः किं सुखं दुःखमेव च ॥ ३१ ॥
राम

यमधर्मादिकं विद्धि ॥ २७ ॥ स्वाभिप्रेतान्धर्मादीन्व्याचष्टे ॥ धर्मो मद्भक्तिकृदिति ततः सत्त्वेप्राप्तैः प्रश्नैः दत्तैः शास्त्रेषु ॥ २८ ॥ धर्मादीनां महत्त्वं ज्ञात्वा प्रसि
द्धानामन्यथाव्याख्यातत्वात् यमादिष्वपि संशयतः स्वरूपतो वा किंचिद्वैलक्षण्यं स्यादिति संभावनया तद्विशेषजिज्ञासुः पृच्छति यम इति पंचभिः
२९ ॥ हिंतं धनं च किं तदिति ॥ ३० ॥ परेति विद्यादीनां विशेषणं श्रीर्मैत्रं ॥ ३१ ॥
राम राम

राम
७६
७५

प्रश्नान्पृष्टानर्थान् विपरीतानशमादीन् ॥ ३३ ॥ यमनियमानाह अहिंसेति त्रिभिः ॥ अस्तेयं मनसापि परस्वाग्रहणं आस्तिक्यं धर्मे विश्वासः ॥ ३४
शौचं बाह्यमाभ्यंतरं चेति द्वयं अतो द्वादश नियमाः श्रद्धा धर्मादरः ॥ ३५ ॥ उभयोः श्लोकयोर्ये स्मृतास्ते यमनियमाः ॥ यद्वा उभयोः प्रवृत्त
निवृत्तयोः मुमुक्षोर्यमा मुख्याः सकामस्य नियमा मुख्याः स्मृता इत्यर्थः अत्र हेतुमाह ॥ हि यस्मादुपासिताः सेविताः संतः पुंसां प्रवृत्तानां
निवृत्तानां च यथाकामं कामानुसारेण मोक्षमभ्युदयं दुहंतीति ॥ ३६ ॥ मुमुक्षोरुपादेयाञ्छमादीन्हेयांश्च दुःखादीन् महाजनप्रसिद्धेभ्यो

कः पंडितः कश्च मूर्खः कः पंथा उत्पथश्च कः ॥ कः स्वर्गो नरकः कश्चित्को बंधुरुत किं गृहं ॥ ३२ ॥ क आढ्यः को दरिद्रो वा कृपणः कः क ईश्वरः ॥ एतान्प्रश्नान्मम ब्रूहि विपरीतांश्च सत्पते ॥ ३३ ॥ श्री ग उ च ॥ अहिंसा सत्यमस्तेयमसंगो ह्रीरसंचयः ॥ आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाभयं ॥ ३४ ॥ शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्चनं ॥ तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनं ॥ ३५ ॥ एते यमाः सनियमा उभयोर्द्वादश स्मृताः ॥ पुंसामुपासितास्तात यथाकामं दुहंति हि ॥ ३६ शमो मन्निष्ठता बुद्धेर्दम इंद्रियसंयमः ॥ तितिक्षा दुःखसंमर्षो जिह्वोपस्थजयो धृतिः ॥ ३७ ॥ दंडन्यासः परं दानं कामत्यागस्तपः स्मृतं ॥ स्वभावविजयः शौर्यं सत्यं च समदर्शनं ॥ ३८ ॥

राम राम

विलक्षणानाह शम इत्यादिना यावत्समाप्ति एतेनैव तद्विपरीताश्च शमादयोऽप्युन्नेयाः ॥ शमो मन्निष्ठता बुद्धेः न तु शांतिमात्रं दम इंद्रियसंयमः
न चौरादिदमनं ॥ तितिक्षा विविदिषस्य दुःखस्य संमर्षः सहनं न भयादेरित्यर्थः जिह्वोपस्थयोर्जयः वेगधारणं धृतिः अत्र हेतुर्गमन इत्यर्थः ॥ ३७ ॥ दंडो भू
तद्रोहः तस्य त्यागः दानं न धनार्पणमिति कामत्यागः भोगोपेक्षा तपः न हठकृच्छ्रादिः स्वभावो वासना जयः प्रतिबंधः शौर्यं न विक्रांतिः समं ब्रह्म तस्य द
र्शनं आलोचनं सत्यं विषयत्वात्सत्यं न यथार्थभाषणमात्रं ॥ ३८ ॥ ॥ राम ॥ राम ॥ राम

न

अन्यच्च ऋतं सत्यं सूनृता सत्या प्रिया च वाक् एवं च ऋतसत्ययोः स्फुट एव विवेकः क्रमप्राप्तं त्यागं व्याख्यातुमादौ तत्तोऽभेदेन शौचं व्याचष्टे ॥ न
स्याप्रिमलत्यागरूपत्वेन त्यागादभेदप्रतीतेः कर्मस्वसंगमः अनासक्तिः शौचं त्यागस्तु संन्यास इति तयोर्भेद इत्यर्थः ॥३९॥ नृणामिष्टं धनं
धर्मः स्वल्पश्वादिसाधारणं भगवत्तमः परमेश्वरोऽहमेव यज्ञः मदुद्देश्याय ज्ञोऽनुष्ठेयः न क्रियाबुद्ध्येत्यर्थः ॥ यज्ञार्थदानं दक्षिणा सा च ज्ञानोपदेशः
न हिरण्यादिदानं तेन हि यज्ञरूपो विष्णुः प्राप्यते ॥ उदर... मनं बलं न तु मनोदमनं देहबलं प्राणायाम इति ॥४०॥ दयालोकश्च सिद्धैवाभिमता

ऋतं च सूनृता वाणी कविभिः परिकीर्तिता ॥ कर्मस्वसंगमः शौचं त्यागः संन्यास उच्यते ॥३९॥ धर्म इष्टं धनं नृणां यज्ञोऽहं भ
गवत्तमः ॥ दक्षिणा ज्ञानसंदेशः प्राणायामः परं बलं ॥४०॥ भगो म ऐश्वरो भावो लाभो मद्भक्तिरुत्तमा ॥ विद्यात्मनि भि
दाबाधो जुगुप्सा ह्रीरकर्मसु ॥४१॥ श्रीर्गुणा नैरपेक्ष्याद्याः सुखं दुःखसुखात्ययः ॥ दुःखं कामसुखापेक्षा पंडितो बंधमो
क्षवित् ॥४२॥

अधुना लाभं व्याचिख्यासुः प्रथमं भगं तत्तोऽभेदेन व्याचष्टे ॥ लोके तयोरभेदप्रसिद्धेः भगो भाग्यं तच्च मे ऐश्वरो भाव इति गम्यं मदीयमैश्वर्यादिषा
ड्गुण्यमित्यर्थः ॥ अत्र मे लाभस्तु मद्भक्तिः न तु पुत्रधनादि विद्या चात्मनि प्रतीतस्य भेदस्य बाधः नाशः न ज्ञानमात्रं स्वकर्मस्तु जुगुप्सा देयत्वद
र्शनं ह्रीः न लज्जामात्रं ॥४१॥ गुणा एव श्रीर्मे इत्यं न किरीटादि सुखदुःखयोः अत्ययः अतिक्रमः अननुसंधानं न तु सुखं न च भोगः विषयभोगा
पेक्षैव दुःखं न नाग्निदाहादि बंधमोक्षौ स इयं यो वेत्ति स पंडितः न विद्वन्मात्रं ॥४२॥ राम राम

र्ख दंबुद्धिरित्युपलक्षणं देहगेहादिष्वहंममेत्यभिमानवान्मूर्ख इत्यर्थः ॥ मन्निगमो मां नितरां गमयति प्रापयतीति यो निवृत्तिमार्गः स एव
पंथाः सन्मार्गः न कंटकादिमान्यः चित्तविक्षेपः प्रवृत्तिमार्गः स उत्पथ इत्यर्थः कुमार्गः न चौराद्याकुलः सत्त्वगुणस्योदयः उद्रेकः स्वर्गो नेंद्रादि
लोकः ॥ ४३ ॥ तमस उन्नाहः उद्रेकः स नरकः न तामिस्रादिः गुरुरेव बंधुर्न भ्रात्रादिः स चाहमेव यथाहं जगद्गुरुः ॥ एक एव परो बंधुर्विषमे स
मुपस्थिते ॥ गुरुः सकलधर्मात्मा यत्राकिंचनगोचरीरिति ॥ समाधनभोगायतनं गृहं न तु ग्राम्यं मानुष्यं मनुष्यरूपं शरीरमेव न हर्म्यादि गु

मूर्खो देहाद्यहंबुद्धिः पंथा मन्निगमः स्मृतः ॥ उत्पथश्चित्तविक्षेपः स्वर्गः सत्वगुणोदयः ॥ ४३ ॥ नरकस्तमउन्नाहो बंधुर्गु
रुरहं सखे ॥ गृहं शरीरं मानुष्यं गुणाढ्यो ह्याढ्य उच्यते ॥ ४४ ॥ दरिद्रो यस्त्वसंतुष्टः कृपणो यो जितेंद्रियः ॥ गुणेष्वसक्त
धीरीशो गुणसंगो विपर्ययः ॥ ४५ ॥ एत उद्धव ते प्रश्नाः सर्वे साधु निरूपिताः ॥ किं वर्णितेन बहुना लक्षणं गुणदोषयोः ॥
गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः ॥ ४६ ॥ इ श्री ग ते का श ॥ श्रीभगवदुद्धवसंवादे श्रेयोभेदनिर्णयो नाम
ए न वी यः ॥ १९ ॥

णैः संपन्न आढ्य उच्यते न धनीत्यर्थः ॥ ४४ ॥ असंतुष्टो यः स दरिद्रः न निःस्वः यश्च अजितेंद्रियः स कृपणः शोच्यः न दीनः विषयेषु नासक्ता धीः
स ईशः स्वतंत्रः न राजादिः गुणसंगो गुणेषु संगो यस्य सः विपर्ययः अनीशः ॥ ४५ ॥ एतच्च शमादि विपर्ययोपलक्षणमुपसंहरति एत इति ॥ साधुमो
क्षोपयोगितया एतच्च सर्वं गुणदोषयोर्विवेकाय उद्धवेन पृष्टमिति तयोः संक्षेपतो लक्षणमाह ॥ किं बहुना वर्णितेन गुणदोषयोर्लक्षणमेताव
देव न देवाद ॥ गुणदोषयोर्दृष्टिर्दर्शनं दोषः गुणस्तु नतु भयदर्शनवर्जितस्वभाव इति मम ॥ ४६ ॥ इ प द स्कं ए को विं ॥ ध्यायः
॥ १९ ॥

विशेयोगत्रयं प्रोक्तं भक्तिज्ञानक्रियात्मकं ॥ गुणदोषव्यवस्थार्थमधिकारिविभागतः ॥ ननु गुणदोषदृशिर्दोषो गुणस्तूभयवर्जित इत्युक्तं तत्र देवाक्षिपति विधिश्च प्रतिषेधश्चेति पंचभिः ॥ विधिश्च प्रतिषेधश्चेश्वरस्य तव निगमश्चाज्ञारूपो वेदः स च विधीनां प्रतिषेधानां च कर्मणां गुणं दोषं च पुण्यपापफलरूपमवेक्षते ॥ १ ॥ उत्तमाधमभावेन तदधिकारिणां वर्णानामाश्रमाणां च विकल्पं भेदं च गुणदोषरूपमवेक्षते ॥ प्रतिलोमानुलोमजं च गुणदोषं नैवावेक्षते ॥ प्रतिलोमजाः उत्तमवर्णास्तु स्त्रीषु हीनवर्णेभ्यः पुरुषेभ्यः जाताः सूतवैदेहकादयः अनुलोमजास्तूत्तमवर्णेभ्यः पुरुषेभ्यः हीनवर्णासु स्त्रीषु जाताः मूर्धावसिक्ताम्बष्ठादयः तेषामसमस्तं तत्त्वविज्ञेयाः प्रति

उ॰ व॰ वा॰ ॥ विधिश्च प्रतिषेधश्च निगमो हीश्वरस्य ते ॥ अवेक्षतेरविंदाक्ष गुणं दोषं च कर्मणां ॥ १ ॥ वर्णाश्रमविकल्पं च प्रतिलोमानुलोमजं ॥ द्रव्यदेशवयःकालान्स्वर्गं नरकमेव च ॥ २ ॥ गुणदोषभिदादृष्टिमंतरेण वचस्तव
निःश्रेयसं कथं नृणां निषेधविधिलक्षणं ॥ ३ ॥ राम राम राम

लोमानुलोमजा इति गुणदोषौ द्रव्यादीन्कर्मार्हतानर्हताख्यं स्वर्गं नरकं च तत्फलतया गुणदोषमेवावेक्षते ॥ एतच्चोक्तमध्याये प्रपंचयिष्यते ॥ २ ॥ तथापि युक्तं ते किमायातमत आह गुणदोषदृशिर्दोष इति निराकृतत्वात् गुणदोषभिदादृष्टिमंतरेण तावदिना निषेधविधिलक्षणं कर्मकांडं तव वचः त्वदीयं वच नं कथं च तत्त्वव्यचोतरेण नृणां निःश्रेयसंकरं स्यात् ॥ तथापि प्रोक्तमेव मंतव्यमित्यादिसाधनविधेः ॥ नाध्यायादष्टशास्त्रचोदितमुपनंदितदित्यादिनिषेधस्य चावश्यकत्वादिति भावः ॥ यद्वा गुणदोषभिदादृष्टिमंतरेण निषेधविधिलक्षणं तव वक्योक्तिनेति सामानाधिकरण्यमेवास्तु ॥ यद्वा गुणदोषभिदादृष्टिमंतरेण निषेधविधिलक्षणमपि वचः कथं नु तत्त्वमस्यादि वाक्यवत् निःश्रेयसपरं स्यात् सर्वस्य वेदस्य तत्परत्वांगीकारादित्यर्थः ॥ ३ ॥

ननु पितरो देवाश्च सर्वज्ञाः प्रत्यक्षतो दृष्टाः मनुष्येभ्यः कथयिष्यंतीति नेत्याह ॥ पित्रादीनां सर्वेषां तव त्वदाज्ञारूपो वेद एव श्रेष्ठं चक्षुः प्रमा
पकं कालानुपलब्धेऽर्थे मोक्षे स्वर्गादौ च तयोः साध्यसाधनयोः इदमस्य साध्यमिदमस्य साधनमित्यत्र पितृदेवे गुणदोषदृष्ट्यभावे निःश्रेयसं तत
इदतः ॥४॥ किंच शास्त्रेणैव विदितो भेददृष्टिं तस्मिन्नेव विषये शास्त्रं कथं निवर्तयेदित्यत आह ॥ ते निगमात्त्वदाज्ञारूपाद्वेदादेव न स्वतः यस्मा
दयं प्राप्तस्तेन निवर्तितः निगमेनैतस्यापवादः इति स्मृत्वाह ॥ ह इति स्फुटं भ्रमो भवतीति तन्निवर्तयेति शेषः ॥५॥ विषयाभेदेऽप्यधिकारिभेदे

ननु वदते २

पितृदेवमनुष्याणां वेदश्चक्षुस्तवेश्वर ॥ श्रेयस्त्वनुपलब्धेऽर्थे साध्यसाधनयोरपि ॥४॥ गुणदोषभिदादृष्टिर्निगमात्तेन
हि स्वतः ॥ निगमेनापवादश्च भिदाया इति हि भ्रमः ॥५॥ श्री ग उ च ॥ योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया
ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित ॥६॥ निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु ॥ तेष्वनिर्विण्णचित्तानां कर्मयो
गस्तु कामिनां ॥७॥

६२

नाविरोधं वक्तुं प्रथमं योगत्रयमाह ॥ योगाः उपायाः ब्रह्मकर्मदेवताकांडैः प्रोक्ताः कर्म च निष्कामं श्रेयोविधित्सया मोक्षसाधनेच्छया नान्य उपा
योऽस्ति काम्यकर्मादिकं त्वावर्तयति ॥ तथा चोत्तराध्याये स्फुटीकरिष्यति य एतानित्यादिना ॥६॥ तेष्वधिकारिभेदमाह निर्विण्णानामित्या
दिश्लोकेन ॥ इदैषां मध्ये कर्मसु निर्विण्णानां दुःखबुद्ध्या तत्फलेषु विरक्तानामत एव तत्साधनस्य तत्कर्मन्यासिनां ज्ञानयोगः सिद्धिद इत्युत्त
रेणान्वयः ॥ अनिर्विण्णचित्तानां तद्दुःखबुद्धिशून्यानामतः कामिनां तत्फलेष्वविरक्तानामित्यर्थः ॥७॥ रम

मि क

श्री
भाग
११
७५
८२

यदृच्छयापि केनाभाग्योदयेन तत्र काम्येषु कर्मसु प्रवर्तमानस्य पुरुषस्य सर्वात्मना विधिप्रतिषेधाधिकारः इत्युक्तं राध्याये पि च व च्यु-
ति ॥ निष्कामकर्मयोगाधिकारिणस्तु तत्रैव निष्कामं वर्तमानस्य यथाशक्ति सर्वज्ञानभक्तियोगाधिकारान्त्यागे च तदधिकृतयोस्तु श्री-
त्यः ताभ्यां सिद्धानां तु न किंचिदिति ॥ ८ ॥ सर्वोऽधिकर्मयोगमाह तावदिति नवभिः ॥ कर्माणि नित्यनैमित्तिकानि यावता तावत् ९ कु-
र्वीत निर्वेदोऽपि ज्ञानभक्तिभूमिकारोहणकारमाह स्वधर्मस्थ इति ॥ अनाशीः कामः अफलकामः अन्यत्र निषिद्धं नरकयानं हेधैव

मि:

यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् ॥ न निर्विण्णो नातिसक्तो भक्तियोगोस्य सिद्धिदः ॥ ८ ॥ तावत्कर्माणि कुर्वीत
न निर्विद्येत यावता ॥ मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ॥ ९ ॥ स्वधर्मस्थो यजन्यज्ञैरनाशीःकाम उद्धव
न याति स्वर्गनरकौ यद्यन्यन्न समाचरेत् ॥ १० ॥ इहलोके वर्तमानः स्वधर्मस्थोऽनघः शुचिः ॥ ज्ञानं विशुद्धमाप्नोति मद्
भक्तिं वा यदृच्छया ॥ ११ ॥ स्वर्गिणोप्येतदिच्छंति लोकं निरयिणस्तथा ॥ साधकं ज्ञानभक्तिभ्यामुभयं तदसाधकं ॥ १२ ॥

विहितानि द्रव्यमाह्यानि निषिद्धाचरणाद्वा ॥ अतः स्वधर्मस्थत्वान्निषिद्धवर्जनाच्च नरकं न याति अफलकामत्वान्न स्वर्गमपीत्यर्थः ॥ १० ॥ किंच अ-
स्मिंल्लोके अस्मिन्नेव देहे अनघः निषिद्धत्यागी अतः शुचिर्निवृत्तरागादिमलः ॥ यदृच्छयेति केवलज्ञानादपि भक्तेर्दुर्लभतां द्योतयति ॥ ११ ॥ अ-
नेन प्रकारेण ज्ञानभक्तिसाधनत्वान्नरदेहं स्तौति स्वर्गिणोपीति ॥ निरयिण इति दृष्टांतत्वेनोक्तं ज्ञानभक्तिभ्यां ज्ञानभक्त्योः तदुभयं स्वर्गिनार-
किशरीरं ॥ १२ ॥

राम
७९
८२

अतो नरः स्वर्गतिं न कांक्षेत न नारकीमिति दृष्टांतः । यद्वा स्वर्गनरकसाधनानि न कुर्यादित्यर्थः अस्याति श्रेष्ठत्वात्पुनरपि मनुष्यो भवेय मित्यपि न कांक्षेत यतो देहावेशाद्देहासक्त्या स्वार्थे प्रमाद्यति ज्ञानशून्यो भवतीत्यर्थः ।।१३।। अपितु एतद्देहं साधकमिति विहाय तत्त्वार्थसिद्धि दमपि मर्त्यं ज्ञात्वा अप्रमत्तः अनलसः सन् मृत्योः पूर्वमेव मोक्षाय यत्नं कुर्यात् ।।१४।। अप्रमत्तो मुक्तसंगः सुखं प्राप्नोतीत्यत्र खगदृष्टां तः क्रियमाणमिति । यमैर्यमवन्निर्दयैः पुरुषैः कृतं नीडं यस्मिंस्तं स्वकेतं स्वस्याश्रयं वनस्पतिं छेदं परित्यज्य अलंपटः अनासक्तो याति ।।१५।।

न नरः स्वर्गतिं कांक्षेन्नारकीं च विचक्षणः ।। नेमं लोकं च कांक्षेत देहावेशात्प्रमाद्यते ।।१३।। एतद्विद्वान्पुरस्तान्मृत्योरभावाय घटेत सः ।। अप्रमत्त इदं ज्ञात्वा मर्त्यमप्यर्थसिद्धिदं ।।१४।। छिद्यमानं यमैरेतैः कृतनीडं वनस्पतिं ।। खगः स्वकेत मुत्सृज्य क्षेमं याति ह्यलंपटः ।।१५।। अहोरात्रैः छिद्यमानं बुद्ध्वायुर्भयवेपथुः ।। मुक्तसंगः परं बुद्ध्वा निरीह उपशाम्यति ।।१६।। नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारं ।। मयानुकूलेन नभस्वतेरितं पुमान्भवाब्धिं न तरेत्स आत्महा ।।१७।।

उ नरपि दार्ष्टान्तिकमाह । अहोरात्रैः छिद्यमानमायुर्बुद्ध्वा भयेन वेपथुः कंपो यस्य सः ।।१६।। एवमप्रयतमानं प्रमत्तं निंदति । नृदेहमिति तेनावेवाप्यत्यधाहारः यो भवाब्धिं न तरेत्स आत्महा तत्र हेतवः आद्यं सर्वफलानां मूलं एतत्तु पार्जितकर्मभिः सर्वप्राप्यैः किंच सुदुर्लभं मनुष्यमकोटिभिरपि प्राप्तुमशक्यं तथापि सुलभं यदृच्छया लब्धत्वात् तं च सुकल्पं पटुतरं किंच गुरुः संश्रितमात्रः कर्णधारो नेता य स्य तं नयस्य स्मृतमात्रेण अनुकूलमारुतेन प्रेरितं ।।१७।। राम राम राम

श्री भाटी ११ ८३

एवं तावद्विरक्तस्य वैराग्यद्वारा ज्ञानशक्तिसाधकं कर्मयोगमुक्त्वेदानीं सम्यग्विरक्तस्य ज्ञानयोगं तस्य च ज्ञानप्राप्तेः पूर्वं किंचित्कर्तव्यं तत्र वर्जनीयं चाह सार्धैर्नवभिः ॥ यदा त्वारंभेषु कर्मसु निर्विण्णः दुःखदर्शनेनोद्विग्नः तत्फलेषु विरक्तश्च तदा संयतेंद्रियः सन् आत्मनोऽभ्यासेनात्मविषयवृत्तिसंततत्वेन च अचलं यथा भवति तथा मनो धारयेत् ॥१८॥ नन्व प्रथममेवात्यंतधारणासंभवात् न तत्स्वभावानुसारेण वशीकरणमाह ॥ यर्हि आशु भ्राम्यत् विभ्रमदनवस्थितं भवति तदानुरोधेन किंचिदपेक्षापूरणद्वारेण ॥१९॥ न च तदिंद्रियप्राप्त्यर्थमेव स्यात् नेत्याह ॥ मनोगतिं न विसृजेन्नोपेक्षेत किं त्वप्रमत्तः सन्नवलंघयेदित्यर्थः ॥२०॥ अनुरोधमार्गं सदृष्टांतं स्तौति ॥ एषोऽनुरूप्रमार्गेण मनःसंग्रहः परमो योगः

यदारंभेषु निर्विण्णो विरक्तः संयतेंद्रियः ॥ अभ्यासेनात्मनो योगी धारयेदचलं मनः ॥१८॥ धार्यमाणं मनो यर्हि भ्राम्यदाश्वनवस्थितं ॥ अतंद्रितोऽनुरोधेन मार्गेणात्मवशं नयेत् ॥१९॥ मनोगतिं न विसृजेज्जितप्राणो जितेंद्रियः ॥ सत्वसंपन्नया बुद्ध्या मन आत्मवशं नयेत् ॥२०॥ एष वै परमो योगो मनसः संग्रहः स्मृतः ॥ हृदयज्ञत्वमन्विच्छन्दम्यस्येवार्वतो मुहुः ॥२१॥ सांख्येन सर्वभावानां प्रतिलोमानुलोमतः ॥ भवाप्ययावनुध्यायेन्मनो यावत्प्रसीदति ॥२२॥ राम

तत्साधनत्वादुपचारेण स्तुतिः यथा दांतस्य दमनीयस्यार्वतोऽश्वस्य हृदयज्ञत्वं स्वाभिप्रायेण गतिमन्विच्छन्नुपेक्षमाणः अश्वधारकः पुनर्मं किंचित्तदुत्कृतिमनुवर्तते ॥ तदा च रश्मिना तं धृत्वैव गच्छति न तूपेक्षते तद्वदित्यर्थः ॥२१॥ एवमीषद्वशीकृतस्य मनसोऽत्यंतनैश्चल्योपायानाह सांख्येनेति त्रिभिः ॥ सांख्येन तत्वविवेकेन सर्वभावानां महदादिदेहांतानां अनुलोमतः प्रकृत्यादिक्रमेण भवं प्रतिलोमतः पृथिव्यादिक्रमेणाप्ययं च अन्वनुध्यायेत् प्रसीदति निश्चलं भवति ॥२२॥ राम राम राम

राम ८ ८३

ततश्चागमापार्थश्रुतेष्ववधिस्तात्मदर्शनान्नद्विवेकोपपन्नः संसारे निर्विण्णस्यातो विरक्तस्य ततश्चात्मवेदिनः गुरूपदिष्टार्थेनोचकस्य त
तोगुरूपदिष्टस्यैव चिंतितस्य पुनरनुचिंतया दोषान्त्यं देहाद्यभिमानं त्यज ॥२३॥ किंच यमादिभिर्योगमार्गैः आन्वीक्षिक्यापरार्थेद्वय
शोधनेन ममार्चनध्यानादिभिर्वा शुद्धेनास्य पद्मस्यावात्ते त्वं दर्शयति ॥ एतैरुपायैर्योगं परमात्मानं मनः स्मरेत् नान्यैरतो न्यं न कुर्या
दित्यर्थः ॥२४॥ ननु नान्यैरिति कथं योगिभिः प्रमादाद्विकल्पनात्मैः पापापत्तये प्रायश्चित्तं कार्यमेवेत्यत आह ॥ योगेनैव ज्ञानाभ्यासेनै
व एतच्च भक्तस्यापि नामकीर्तनाद्युपलक्षणार्थं नान्यत्कृच्छ्रादि न तु नित्यनैमित्तिकं कर्म सत्त्वशोधकत्वाद्गुणः हिंसादिकेत्वशुद्धि

२५

निर्विण्णस्य विरक्तस्य पुरुषस्यात्मवेदिनः ॥ मनस्त्यजति दोषांस्त्वं चिंतितस्यानुचिंतया ॥२३॥ यमादिभिर्योगपथैरा
न्वीक्षिक्या च विद्यया ॥ ममार्चोपासनाभिर्वा नान्यैर्योगं स्मरेन्मनः ॥२४॥ यदि कुर्यात्प्रमादेन योगी कर्म विगर्हितं
योगेनैव दहेदंहो नान्यत्तत्र कदाचन ॥२५॥ स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः ॥ कर्मणां जात्यशुद्धाना
मनेन नियमः कृतः ॥२६॥ गुणदोषविधानेन संगानां त्याजनेच्छया ॥२७॥ [illegible] राम ॥ राम ॥

हेतुत्वाद्दोषः ॥ तच्च पापनिवर्तकत्वात्कृच्छ्रादिप्रायश्चित्तं गुण इति विधिनिषेधाभ्यामुक्तत्वात् ॥२५॥ प्रायश्चित्तं विनापि योगेनैव कथं पापं
दहेदित्यत आह स्वे स्वे इति सार्धेन ॥ स एव गुणः नेतरः तदुपपादयति यस्माद्विधिनिषेधाभ्यामुक्तत्वात् ॥ अनेन गुणदोषविधानेन कर्मणां नि
यमः संकोचः कृतः उक्तं इत्यत आह जात्या यत्र त्वेवाशुद्धानां कर्मणां सर्वपापानां संगानां त्याजनेच्छया अयं भावः पुरुषस्याशुद्धिनामकस्य
हि तेषां स्वाभाविकप्रवृत्तेरैव तस्य मलिनत्वाच्च सहसा सर्वतो निवृत्तिः कर्तुं शक्यते अतः इदं न कर्तव्यमिदमेव कर्तव्यं इत्येवं स्वाभाविकप्रवृ
त्तिसंकोचद्वारेण निवृत्तिरेव क्रियते ॥ तथा चरन्प्रवृत्तिपरोऽपि दृष्टसत्त्वोन्नताध्यायेव स्यामः अतएव वक्ष्यति कामेष्वित्यादिना अतो योगिनः स्वाभाविक

श्री
भा॰टी॰
ए
६२
८४

भक्त्यधिकारिणो भक्तियोगमाह जातश्रद्ध इति त्रिभिः ॥ मत्कथासु जातश्रद्धः अत एवान्येषु कर्मसु निर्विण्णः न तु तत्फलेषु विरक्तः तदाह वेद दु
ःखात्मकानिति यद्यपि वेद तथापि तत्परित्यागेऽप्यनीश्वरः असमर्थः ॥ २७ ॥ एवंभूतोऽयं श्रद्धालुर्भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयः सन् ततस्तद
नन्तरं मां प्रीत्या भजेत विषयांस्तु सेवमानोऽपि तेषु प्रीतिं न कुर्यादित्याह गर्हयन्निति ॥ २८ ॥ कथं भजेत किं वा ततो भवति तदाह प्रोक्तेनेति द्वा
भ्यां श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तनमित्यादिना ॥ तत्र तत्रोक्तेन मामसकृन्नित्यं भजतः हृदय्याः हृद्गताः कामा नश्यन्ति ॥ २८ ॥

जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्मसु ॥ वेद दुःखात्मकान्कामान्परित्यागेऽप्यनीश्वरः ॥ २७ ततो भजेत मां प्रीतः श्रद्धा
लुर्दृढनिश्चयः ॥ २७ ॥ जुषमाणश्च तान्कामान्दुःखोदर्कांश्च गर्हयन् ॥ २८ प्रोक्तेन भक्तियोगेन भजतो मासकृन्मुनेः ॥ कामा
हृदय्या नश्यन्ति सर्वे मयि हृदि स्थिते ॥ २९ ॥ भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ॥ क्षीयन्ते चास्य कर्माणि मयि
दृष्टेऽखिलात्मनि ॥ ३० ॥ तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः ॥ न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिति ॥ ३१ ॥
यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् ॥ योगेन दानधर्मेण श्रेयोभिरितरैरपि ॥ ३२ ॥ सर्वं मद्भक्तियोगेन मद्भ
क्तो लभतेऽञ्जसा ॥ स्वर्गापवर्गं मद्धाम कथंचिद्यदि वाञ्छति ॥ ३२ ॥ राम राम

हृदयमेव ग्रन्थिरहंकारः तत्पूर्वकाश्च सर्वे संशयाः असंभावनादयः कर्माण्यनारब्धफलानि संसारहेतुभूतानि २९ तदेवं व्यवस्थयाधिका
रेणयदुक्तं ॥ ३० ॥ तत्र च भक्तेरन्यनिरपेक्षत्वात् अन्यस्य च सापेक्षत्वान्भक्तियोग एव श्रेष्ठ इत्युपसंहरति तस्मादिति त्रिभिः ॥ मदात्मनः
मय्येवात्मा चित्तं यस्य तस्य श्रेयःसाधनं ॥ ३ ॥ तत्र हेतुः यत्कर्मभिरित्यादि ॥ इतरैरपि तीर्थयात्राव्रतादिभिः श्रेयःसाधनैः ॥ ३१ ॥ यद्भाव्यं सत्त्व
शुद्ध्यादि तत्सर्वमञ्जसा अनायासेनैव स्वर्गमपवर्गं मद्धाम वैकुण्ठं लभत एव कामकृत्तु नास्त्येव तु कथंचिद्यदि वाञ्छतीति ॥ ३२ ॥ राम

राम
६२
८४

तत्र हेतुमाह न किंचिदिति । धीरा धीमंतो यतो मम एकांतिनो मय्येव प्रीतियुक्ताः अतो मया दत्तमपि न गृह्णंति किं च अन्यं न वांछंतीत्यर्थः अ
पुनर्भवमात्यंतिकमपि कैवल्यं ॥ ३३ ॥ तदुपपादयति नैरपेक्ष्यमेव परं अनंतं महांतमनल्पकं प्राहुः निःश्रेयस फलेन तत्साधनं च प्राहुर्मे भक्तिर्निरा
शिषः प्रार्थनाशून्यस्य निरपेक्षस्य प्रार्थनाकालेऽभूतापेक्षस्य यावत्कृतस्य पुंसो भवेत् यद्वा मे निरपेक्षस्य या भक्तिः सा निराशिषो भवेदित्यर्थः
३४ ॥ अनेन च प्रकारेण सिद्धानां न गुणदोषबुद्धिरिति विरोधपरिहारमुपसंहरति न मयीति ॥ गुणदोषैर्विहितप्रतिषिद्धैरुद्भवो येषां ते गुणाः ॥

न किंचित्साधवो धीरा भक्ता ह्येकांतिनो मम ॥ वांछंत्यपि मया दत्तं कैवल्यमपुनर्भवं ॥ ३४ ॥ नैरपेक्ष्यं परं प्राहुर्निःश्रेयसम
नल्पकं ॥ तस्मान्निराशिषो भक्तिर्निरपेक्षस्य मे भवेत् ॥ ३५ ॥ न मय्येकांतभक्तानां गुणदोषोद्भवा गुणाः ॥ साधूनां सम
चित्तानां बुद्धेः परमुपेयुषां ॥ ३६ ॥ एवमेतान्मयादिष्टाननुतिष्ठंति मे पथः ॥ क्षेमं विंदंति मत्स्थानं यद्ब्रह्म परमं विदुः
३७ ॥ इ श्री भा म पु ए द स्कं ॥ भगवदुद्धवसंवादे ॥ श्लो यः ॥ २० ॥ राम

पा
गुणपृपादयः साधूनां निरस्तरागादीनां अतः समचित्तानां मन एव बुद्धेः प्रकृतेः परमीश्वरं प्राप्तानां ॥ ३६ ॥ काम्यकर्मनिष्ठादुर्दृश्यएता
न्मुक्तिमार्गानुपसंहरति एवमिति ॥ मे पथः मत्प्राप्त्युपायान् ये अनुतिष्ठंति ते क्षेमं कालमायाद्यस्पृष्टं मम लोकं वैकुंठं विंदंति ॥ यत्प
रमं ब्रह्म तत्त्वविदुरित्यन्वयः ॥ ३७ ॥ इ श्री भा मे का श धे श्लो यः ॥ २० ॥ राम राम

श्री
भाग
ए
६२
८५

एवं विशेषो क्रियाज्ञानभक्तिष्वनधिकारिणां ॥ कामिनां इत्यदेशादिगुणदोषाः प्रपंचिता इति तदेव प्रकटयति ॥ तदेवं गुणदोषव्यवस्था
र्थं योगत्रयमुक्तं तत्र च ज्ञानभक्तिसिद्धानां नकिंचिद्गुणदोषौ साधकानां तु प्रथमतो निष्काम कर्मनिष्ठानां यथाशक्ति नित्यनैमित्तिकं कर्म
सत्वशोधकत्वाद्गुणः तदकरणं निषिद्धकरणं च तत्र मलीमसकरणत्वाद्दोषः तन्निवर्तकत्वाच्च प्रायश्चित्तकरणं गुणः विशुद्धसत्वानां
तु ज्ञाननिष्ठानां ज्ञानाभ्यासएव सिद्धिहेतुत्वाद्गुणः भक्तिनिष्ठानां पुनः श्रवणकीर्तनादिभक्तिरेव गुणः तद्विरुद्धं सर्वमुभयेषां दोषः उक्त
मिदानीं येत्वनत्सिद्धानापि साधकाः किंतु केवलं काम्यकर्मप्रधानाः तेषां सकलदोषान्प्रपंचयिष्यन्नादौ तान्निंदति य एतान्

गुण

श्री भ उ च ॥ य एतान्मत्पथो हित्वा भक्तिज्ञानक्रियात्मकान् ॥ क्षुद्रान्कामांश्चलैः प्राणैर्जुषंतः संसरंति ते ॥ १
स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः ॥ विपर्ययस्तु दोषः स्यादुभयोरेष निश्चयः ॥ २ ॥ शुद्ध्यशुद्धी विधी
येते समानेष्वपि वस्तुषु ॥ द्रव्यस्य विचिकित्सार्थं गुणदोषौ शुभाशुभौ ॥ ३ ॥ राम

त्रिति ॥ मत्पथो मदुक्तमार्गान् क्षुद्रान् स्वर्गादीन्‌ चलैः अस्थिरैः प्राणैर्यायुभिरिंद्रियैर्वा जुषंतः सेवमाना भवंति ते संसरंति निखिलदोषभा
क्त्वेन नानायोनीः प्राप्नुवंतीत्यर्थः ॥ १ ॥ नन्वेतैरेव कर्मभिः केचिद्गुणदोषभाजः केचिन्नेति कुतो वैषम्यं न स्वरूपेणाकेचिन्न पुण्यं ते केचिन्नेति
संभवंतितत्राह स्वे स्वे इति ॥ अधिकारिभेदेन कल्पितो गुणदोषो न वस्तुनिष्ठाविति भावः ॥ २ ॥ तदाह शुद्ध्यशुद्धी इति ॥ विचिकित्सार्थं योग्या
नयोग्यं चेति संदेहद्वारा स्वाभाविकप्रवृत्तिनिवृत्तिनिबंधनार्थमित्यर्थः ॥ तत्र शुद्ध्यशुद्धी योग्यत्वायोग्यत्वे गुणदोषौ त्रिमिन्नायादेयत्वानु

राम
६२
८५

अत्राधिकोपादानेनपाप

तत्र शुद्ध्यशुद्धी धर्मार्थं शुद्धेन धर्मः अशुद्धेनाधर्म इति गुणदोषौ व्यवहारार्थं मशुद्धावपि राजादीनां व्यवहारदर्शनाद्युपादेयं नान्यदिति ॥ शुभाशु
भौ यात्रार्थं प्राणरक्षणार्थं दोषत्वेप्यापत्सु शरीरनिर्वाहमात्रोपादानेन पापमिति ॥ धर्मरूपं धुरं भारं कर्मजडानामित्यर्थः ॥ ४ ॥ शुद्ध्यशुद्धी
शुभं चयिष्यन्वेदोक्तत्वेन न तदभिनिवेशो मायिति समानेष्वपि वस्तुष्विति ॥ वेदोक्तं तन्मूलं पंचधा ॥ तिभूमीति त्रिभिः ॥ भूतानां प्राणिनां धारयं
तीति धातवः कारणानि शारीराः शरीरारंभकाः देहतः साम्यमुक्तं जीवतो व्याह आत्मसंयुता इति ॥ ५ ॥ धातुषु देहेषु नामरूपाणि वर्णा

धर्मार्थं व्यवहारार्थं यात्रार्थमपि चानघ ॥ दर्शितोयं मया चारो धर्ममुद्वहतां धुरं ॥ ४ ॥ भूम्यंब्वग्न्यनिलाकाशा भूतानां पं
च धातवः ॥ आब्रह्मस्थावरादीनां शारीरा आत्मसंयुताः ॥ ५ ॥ वेदेन नामरूपाणि विषमाणि समेष्वपि ॥ धातुषूद्धव क
ल्पंते एतेषां स्वार्थसिद्धये ॥ ६ ॥ देशकालादिभावानां वस्तूनां मम सत्तम ॥ गुणदोषौ विधीयेते नियमार्थं हि कर्मणाम् ॥ ७ ॥

क्ष्मादीनि कल्पनायाः प्रयोजनमाह ॥ एतेषां प्राणिनां स्वार्थसिद्धये प्रवृत्तिनियमद्वारा धर्मादिपुरुषार्थसिद्धये ॥ ६ ॥ न केवलं देहेष्वेव
अपितु देशकालादिभावानामपि आदिशब्देनानुपादेयानां फलनिमित्ताधिकारिणां ग्रहणं वस्तूनामुपादेयानां द्रव्यादीनामपि म
मया नियमार्थं संकोचार्थमित्यर्थः ॥ ७ ॥ राम राम राम राम राम राम ।

श्री
मारी
७
६९
८६

एवंगुणदोषविषयं परिशोध्यानयोः शुद्ध्यशुद्धिसत्वात्कुद्ध्यशुद्धीप्रपंचयति अकृष्णसारइत्यष्टभिः ॥ इदानीदेशशुद्धिमाह देशानांमध्ये
कृष्णसारहीनोदेशोऽशुचिः तत्राप्यब्रह्मण्यः ब्राह्मणभक्तिशून्योऽत्यंतमशुचिः कृष्णसारोपिदेशोनेनमृगेणसारः श्रेष्ठोयः सोप्यसौवीरः ॥
कीकटः सुवीरः तत्पुत्रः तेषां सौवीरः कीकटोपि अशुचिः ॥ सेतुं कं सर्वेषुउत्तमोदेशः सत्याज्यो यत्रलभ्यते इतिनहि जिनोयः कीकटः मा
गधांगवंगकलिंगादिसंसृष्टः संमार्जनादिशून्यः म्लेच्छबहुलोवा इतिलाभूपमेकवन्नावः तदशुचिः तदन्यः शुचिरित्यर्थः ॥ उक्तं भव
ति ॥८॥ कालस्यशुद्ध्यशुद्धीदर्शयति ॥ इष्यतोद्रव्यसंपन्नास्वतोवापर्वोह्नादिर्यैः कर्मार्हः कर्मार्हः सकालस्तस्मिन्कर्मणिगुणवान्यतोस्य

अकृष्णसारोदेशानामब्रह्मण्योऽशुचिर्भवेत् ॥ कृष्णसारोप्यसौवीरः कीकटासंस्कृतेरिणं ॥८॥
कर्मण्योगुणवान्कालोद्रव्यतः स्वतएववा ॥ यतोनिवर्ततेकर्मसदोषोऽकर्मकः स्मृतः ॥९॥
द्रव्यस्यशुद्ध्यशुद्धीचद्रव्येणवचनेनच ॥ संस्कारेणाथकालेनमहत्वाल्पतयाथवा ॥१०॥

स्मिन् द्रव्यालाभेनवाराजविप्लवादिनावाकर्मनिवर्तते ॥ यच्चसूतकादौदशाहादिलक्षणोऽकर्मकः कर्मानर्हः स्मृतः सकालः सदोषः अशुद्धइत्य
र्थः ॥९॥ वस्तुशोधनानांद्रव्याणांशुद्ध्यशुद्धीदर्शयति द्रव्यस्येतिचद्वाभ्यां ॥ द्रव्येणतोयादिनाशुद्धिः सुरादिनात्वशुद्धिः वचनेनशुद्धमशु
द्धमितिवासंदेहे शुद्धमित्येवंरूपेणब्राह्मणवचनेनशुद्धिः विपरीतेनाशुद्धिः संस्कारेणप्रोक्षणादिनापुष्पादेः शुद्धिः अवघ्राणादिना
त्वशुद्धिः कालेनदशाहादिनानवोदकादेः शुद्धिः ॥ उक्तंच ॥ कालमेघोदकंग्राह्यंवर्ज्यंतत्र्यहमेवहि ॥ अकालेदशरात्रंस्यात्ततः शुद्धिर्विधी
यते ॥ पर्युषितान्नादेरशुद्धिः अंत्यजाद्युपहतानांतडाकादुदकानांमहत्वाल्पत्वाभ्यांशुद्ध्यशुद्धी ॥१०॥ स्म

स्म
६३
८६

शौचाशौचात्तयोर्गणनादिसूतकान्तादेः शौचान्यस्य शुद्धिः अशौचान्त्यतिशुद्धिः वृद्ध्या पुत्रजन्मादौ द्वादशाहान्तं हृदिज्ञानेन शुद्धिः ज्ञाते ना
शुद्धिः समृद्ध्या जीर्णमलवद्वस्त्रादेः समृद्धं प्रत्यशुद्धिः दरिद्रं प्रतिशुद्धिः तत्रापि विशेषमाख्यदिति एतेद्रव्यवचनादयो द्रव्यशुद्धिहेतवा आ
त्मनो यद्द्रव्यं कुर्वन्ति तद्देशावस्थानुसारत एव यथा यथावत्कुर्वन सर्वतः तथाहि निर्भय एव देशे स्नानादिना शुद्धिं कुर्वन्ति तत्रैव राज्ञा याकु
लेन युगे रोगादिव्यतिरिक्तसु वाद्यवस्थायामेव कुर्वन्ति न बाल्ये रोगाद्यवस्थायामिति तथा च स्मृतिः देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं ।
उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेदिति ११ द्रव्यादिभिर्द्रव्यस्य शुद्धिरित्युक्तं तत्र वचनादिशुद्धिः एकरूपेव द्रव्यतस्तु शुद्धिः बहु

शौचाशौचं प्रवृद्ध्या वा समृद्ध्या च यदात्मनः एवं कुर्वन्ति रि यथा देशावस्थानुसारतः ११ धान्यदार्वस्थितन्तूनां रसतैजसच
र्मणां कालवाय्वग्निरत्नाद्यैः पार्थिवानां युतायुतैः १२ अमेध्यलिप्तं येन गन्धलेपं व्यपोहति भजते प्रकृतिं तस्य तच्छौचेनाविदि
ष्यते १३ ॥

रूपेति तेषां प्रपंचयति धान्येति दारवो विकंकतचमसादिकं अस्थिगजदन्तादि रसास्तैलघृतादयः तैजसाः सुवर्णादयः तेषां पार्थिवानां च र
स्नाकर्दमपाषाणेष्टकादीनां च यथायथं कालादिभिः शुद्धिः तत्रापि कालाकालाद्यत्र ज्ञात्वा युपपद्यातता रतस्यान्तरे देशकालावस्थाद्यनुसारेण च एते रत्नै
श्च युतायुतैः मिलितैः केवलैश्च कालस्य पुनर्ग्रहणं युक्तत्व प्रदर्शनार्थं १२ अमेध्यमपस्पर्शेऽशुद्धिस्तत्कालेऽपि विशेषमाह यत्पीठपात्र
वस्त्रादि येन तक्षणेन क्षारोदकादिना गन्धलेपं च व्यपोहति त्यजति स्वगतं च मलं त्यक्त्वा प्रकृतिं स्वमेव रूपं भजते तेन तस्य तच्छौचं च शोधकं
यावता तक्षणादिना व्यपोहति त्यजति तावत्प्रमाणं स्वरूपत एवाहृत्रिंशोवा तत्कर्तव्यमिष्यते १३ ॥ ॥

श्री॰ भा॰ ए॰ टी॰ ८४
८७

एवं तावद्द्रव्यशुद्धिरुक्ता इदानीं कर्तृशुद्धिमाह स्नानेनेति अवस्था कौमारादिः वीर्यं शक्तिः संस्कार उपनयनादिः कर्म संध्योपासनादि तास्
तु एभ्य आत्मनः साहंकारस्य कर्तुः एतैः स्नानादिभिः यथायथं तत्कार्यानुसारिणी शुद्धिः इयं च शुद्धिर्न व्यवहारार्था किं तु विहितकर्मा
र्थेत्याह शुद्ध इति द्विज इत्युपलक्षणं शूद्रादीनामपि १४ मंत्रशुद्धिमाह सद्गुरुमुखाद्यथावत्परिज्ञानं मंत्रस्य शुद्धिः कर्मशुद्धिमाह ई
श्वरार्पणं कर्मणः शुद्धिः धर्माद्यर्थस्य अशुद्धी प्रपंचतः मदर्पण उपसंहरति धर्म इति देशकालद्रव्यकर्तृमंत्रस्य शुद्धिकर्मभिः षड्भिः शुद्धैर्ध
र्मः संपद्यते एतेषां यो विपर्ययः सोऽधर्मः तद्धेतुरित्यर्थः १५ अयं च गुणदोषविभागो न वास्तवः इत्याह क्वचिदिति आपदि प्रतिग्रहोऽपि गुणः अ
नापदि निषिद्धत्वाद्दोषः परधर्मश्च परस्य गुणोऽपि स्वस्य चानुष्ठीयमानो दोषः दोषोऽपि कुटुंबत्यागादिर्विरक्तादेर्न दोषः अविरक्तस्य तु दो

स्नानदानतपोऽवस्थावीर्यसंस्कारकर्मभिः मत्स्मृत्या चात्मनः शौचं शुद्धः कर्माचरेद्द्विजः १४ मंत्रस्य च परिज्ञानं कर्मशुद्धिर्मदर्प
णं धर्मः संपद्यते षड्भिरधर्मस्तु विपर्ययः १५ क्वचिद्गुणोऽपि दोषः स्याद्दोषोऽपि विधिना गुणः गुणदोषार्थनियमस्तद्भिदामेव
बाधते १६ समानकर्माचरणं पतितानां न पातकं औत्पत्तिको गुणः संगो न शयानः पतत्यधः १७ ॥ ॥

गो

षः एवं च अपि तु विधिबलेन गुणः गुणदोषार्थनियमः एवं योऽयं गुणदोषयोरेकस्मिन्नेवार्थे नियमः गुणदोषार्थनियमः नियामकं शास्त्रं
स तयोर्भेदमेव बाधते १६ दोषस्य क्वचिद्दोषत्वाभावे गुणत्वे चोदाहरणं दर्शयति समानकर्मेत्यादिना कथयति समानस्य तस्यैव कर्मणः सुरा
पानादेराचरणं अपतितानां पतनहेतुरपि तु ज्यायसा कर्मणा वा पतितानां पुनः पातकमधिकारभ्रंशकं न भवति एवमेव पतितत्वात् अ
तोऽत्र दोषस्यापि दोषता नास्तीत्यर्थः तथा संगोऽपि यो यते दोषः गृहस्थस्य सोऽत्पत्तिकः एवं स्त्रीकृतो न दोषः अपि तु गुणः अतो भा
र्यासंबंधियादिस्मादि बोधनात् उभयत्र दृष्टान्तः एवमेवाधः शयानो यथा न पतेति १७ ॥ ॥ ॥

८७
९४

एवं गुणदोषविधीनां प्रवृत्तिसंकोचद्वारा निवृत्तावेव तात्पर्यमित्यभिप्रेत्याह यतो यत इति १८ यथा स्कृतं प्रवृत्तिपरत्वं वेदस्य निराकर्तुं प्रवृत्तिमार्गस्य यथानर्थहेतुत्वं तथा दर्शयति विषयेष्विति चतुर्भिः संगः आसक्तिः स च तेषु विषयेषु येन प्रतिहन्यते कामः तेन सह कामादेव कलिः कलहः विवादः १९ दुर्विषहस्तीव्रस्तमः संमोहः तं क्रोधं चेतना कार्याकार्यस्मृतिः द्रुतं शीघ्रमेव २० शून्याय कल्पते असन्निव भवतीत्यर्थः स्वार्थविभ्रंशः पुरुषार्थहानिः मूर्छितस्य मृततुल्यस्य २१ तत्तुल्यत्वं प्रपंचयति विषयेति नापरमनात्मानं देहादि

ततो यतो निवर्तेत विमुच्येत ततस्ततः एष धर्मो नृणां क्षेमः शोकमोहभयापहः १८ विषयेषु गुणाध्यासात्पुंसः संगस्ततो भवेत् संगात्संजायते कामः कामादेव कलिर्नृणां १९ कलेर्दुर्विषहः क्रोधस्तमस्तमनुवर्तते तमसा ग्रस्यते पुंसश्चेतना व्यापिनी द्रुतं २० तया विरहितः साधो जन्तुः शून्याय कल्पते ततोस्य स्वार्थविभ्रंशो मूर्छितस्य मृतस्य च २१ विषयाभिनिवेशेन नात्मानं वेद नापरं वृक्षजीविकया जीवन्व्यर्थं भस्त्रेव निःश्वसन् २२ फलश्रुतिरियं नृणां न श्रेयो रोचनं परं श्रेयो।
विवक्षया प्रोक्ता यथा भैषज्यरोचनं २३ ॥

किं च वेदवादार्थं वृक्षजीविकयेव यो जीवनं तेन समूर्छिततुल्यः अत एव यो भस्त्रेव श्वसन्वर्तते स मृततुल्यः अतः स्वार्थनाश इत्यर्थः २२ ननु प्रवृत्तस्य स्वर्गादिफलश्रवणात्कुतः स्वार्थविभ्रंशस्तत्राह इयं फलश्रुतिः न श्रेयः परमपुरुषार्थपरा न भवतीत्यर्थः किं तु बहिर्मुखानां नृणां मोक्षविवक्षया अवान्तरफलैः कर्मसु रुच्युत्पादनमात्रं यथा भैषज्ये गुडखंडरोचनं ह्युन्मादेन तथा हि पिब निंबं प्रदास्यामि खलु ते खंडलड्डुकान् पित्रैवमुक्तः पिबति न फलं तावदेव तत् २३ ॥ ॥ ॥

नतुकर्मकांडेमोक्षस्यनामापिनश्रूयतेकुतएवंव्याख्यायतेयथाश्रतस्याचरणादिस्यादाह उत्पत्त्यैवेति द्वाभ्यां उत्पत्त्यास्वभावतएवकामेषुप
श्वादिषुप्राणेष्वायुरिंद्रियबलवीर्यादिषुस्वजनेषुपुत्रादिषुपरिपाकतोनानर्थहेतुषुदुःखहेतुषु २४ अतस्तान्स्वार्थंपरमसु
खमविदुषःअतोननतान्प्रतीभूतान्वेदोयद्बोधयिष्यतितदेवश्रेयइतिविश्वसितानित्यर्थः तानेवंभूतान्वृजिनाध्वनिकर्मवर्त्मनि
देवादियोनिषुभ्राम्यतःततःपुनस्तमःवृक्षादियोनिंविशतःपशुकामइतिआयुरिंद्रियकामइतिकथंपुनःतेष्वेवकामेषुस्वयंबुधोवे
दोयुंज्यात्प्रवर्तयेत्नत्वासक्तमनाःस्यादितिभावः २५ कथंतर्हिकर्ममीमांसकाःफलपरतांवदंतितत्राहएवमिति व्यवसितंवेद

उत्पत्त्यैवहिकामेषुप्राणेषुस्वजनेषुच आसक्तमनसोमर्त्याआत्मनोनर्थहेतुषु २४ नतानविदुषःस्वार्थंभ्राम्यतोवृजि
नाध्वनि कथंयुंज्यात्पुनस्तेषु तांस्तमोविशतोबुधः २५ एवंव्यवसितंकेचिदविज्ञायकुबुद्धयः फलश्रुतिंकुसुमि
तांनवेदज्ञावदंतिहि २६ कामिनःकृपणालुब्धाःपुष्पेषुफलबुद्धयः अग्निमुग्धाधूमतांताःस्वंलोकंनविदंतिते २७

स्याभिप्रायंकुहमितामवांतरफलप्ररोचनयापरमफलांश्रुतिंवदंतिकुतस्तेकुबुद्धयस्तदाह हियस्माद्वेदज्ञाव्यासादयस्तथा
नवदंतीति २६ कुबुद्धितांप्रपंचयतिकामिनइतित्रिभिः कामित्वात्कृपणास्ततोलुब्धास्तस्मात्कुलाःअतःपुष्पेष्ववांतरफलेषुपरमफ
लबुद्धयःअतएवाग्निमुग्धाअग्निसाध्यकर्माभिनिवेशात्लब्धअविवेकाःततश्चधूमतांताःधूममार्गीतेयेषांतेस्वंलोकंआत्मतत्त्वं
तथाचश्रुतिः कश्चिद्वाअस्माल्लोकात्प्रेत्यात्मानंवेदअयमहमस्मीतिकश्चित्स्वंलोकंनप्रतिजानातिअग्निमुग्धोहैवधूमतांतइति २७
वे

कोसौ स्वर्लोकस्तमाहुर्नेति ॥ हृदिस्थमात्मानं मां स्वं लोकं नन्वहं हृदिस्थमहं कारास्पदं जानंत्येव सत्यं परमात्मानं तु न जानंतीत्याह ॥ यइदंम
द्व्यतिरिक्तं जगन्नास्ति कुतः यत इदं जगज्जातं कुतो न जानंति द्वियत्माउक्तं कर्मैव शास्त्रे शास्यं कथनीयं पशुहिंसासाधनं नायेवानतउक्तं शास्त्राः
कर्मवेदिषु विताश्च त एव केवलमसुतृपः प्राणतर्पणपराः नीहारं तमस्तेन व्याप्तानि चक्षूंषि येषां ते यथा सन्निहितमपि न जानंति तद्वत् ॥
तथा च श्रुतिः ॥ न तं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव ॥ नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरंतीति ॥ २५ ॥ वेद
तात्पर्यज्ञानाज्ञानात्पयजंतीत्याह ॥ ते परोक्षमस्फुटं मे मतमविज्ञाय देवादीन्यजंतीत्युत्तरेणान्वयः ॥ २६ ॥ स्वमतमेवाह ॥ हिंसायां मांस

न ते मामंग जानंति हृदिस्थं य इदं यतः ॥ उक्थशस्त्रा ह्यसुतृपो यथा नीहारचक्षुषः ॥ २८ ॥ ते मे मतमविज्ञाय परोक्षं वि
षयात्मकाः ॥ हिंस्यापशून्हिंसंतो हिंस्यंते तेषु तैस्तुते ॥ २९ ॥ हिंसायां यदि रागः स्याद्यज्ञ एव न चोदना ॥ इति वेदं धुनिश्च
त्वा न वेद ज्ञा वदंति हि ॥ ३० ॥ हिंसाविहारा ह्यालब्धैः पशुभिः स्वसुखेच्छया ॥ यजंते देवता यज्ञैः पितृभूतपतीन्खलाः
३१ ॥ स्वप्नोपममसुं लोकमसंतं श्रवणप्रियं ॥ आशिषो हृदि संकल्प्य त्यजंत्यर्थान्यथा वणिक् ॥ ३२ ॥ सम

भक्षणार्थं तत्फलार्थं यदि रागः स्यात्तर्हि यज्ञ एव तेषु प्रभुज्ञात इति परिसंख्येयं ॥ न तावद्दत्यकत्वेन चोदनेत्येवं सत्यं यद्यपि नित्यनैमित्तिकयोः
कामविशेषानुबंधो नास्ति तथापि कर्मणा पितृलोक इति श्रुतेः ॥ सामान्यतः पितृलोककामनास्त्येव अंतःकरणशुद्धिकामनादेस्त्वभावः
तदुक्तं ॥ नेहकामस्य क्रिया काचिद्दृश्यते चेतनस्य हि चित् ॥ यद्यद्धि कुरुते जंतुस्तत्तत्कामस्य चेष्टितमिति ॥ ३० ॥ अज्ञत्वादेव हिंसया विहाराः क्री
डा येषां ते ॥ ३१ ॥ किं च ते श्रुतिमंदबुद्धय इत्याह स्वप्नोपममिति ॥ अमुं परलोकमाशिषश्चास्मिंल्लोके संकल्प्य न तु निश्चित्य विघ्नबाहुल्यात्
त्यजंति कर्मस्वादिनियोजयंति ॥ यथा कश्चिद्दुर्वणिक् उत्तरसमृद्ध्यादिलोभेन नबहु धनार्जनेच्छ्यासिद्धं धनं त्यजन् भयभ्रष्टो भवति तद्वदित्यर्थः
॥ ३२ ॥

अतो रजःसत्त्वतमोनिष्ठास्ते रजःसत्त्वतमोजुषः स्वानुरूपानिंद्रादीनेवोपासते न तु मां यद्यपींद्रादीनामपि मदंशत्वान्मदुपासनमेव तथाप्या
पियथावन्नोपासते भेददर्शित्वादित्यर्थः ॥३३॥ इष्ट्वेति संकल्पमनुकृत्य तमेव संकल्पं दर्शयति इष्ट्वेति ॥ तस्य भोगस्यांते महाशाला महागृ
हस्थाः ॥३४॥ ततः किमित्यत आह एवमिति ॥ अतो मत्प्रवणत्वाभावान्नित्यं संसारिणो भवंतीति भावः ॥३५॥ तदेवं प्रवृत्तिपरत्वं निराकृ

रजःसत्त्वतमोनिष्ठा रजःसत्त्वतमोजुषः ॥ उपासत इंद्रमुख्यान्देवादीन्न तथैव मां ॥३३॥ इष्ट्वेह देवता यज्ञैर्गत्वा रंस्यामहे दिवि ॥ तस्यांत इह भूयास्म महाशाला महाकुलाः ॥३४॥ एवं पुष्पितया वाचा व्याक्षिप्तमनसां नृणां ॥ मानिनां चातिस्तब्धानां मद्वार्तापि न रोचते ॥३५॥ वेदा ब्रह्मात्मविषयास्त्रिकांडविषया इमे ॥ परोक्षवादा ऋषयः परोक्षं मम च प्रियं ॥३६॥

त्य प्रकृतं निवृत्तिपरत्वमेवोपसंहरति ॥ वेदा इति ॥ कर्मब्रह्मदेवताकांडविषया इमे वेदा ब्रह्मात्मविषयाः ब्रह्मैवात्मासंसारीति तत्परत्वात्प्रतीतौ च ॥ फलश्रुतिरियं नृणां न श्रेयो रोचनं परं ॥ श्रेयोविवक्षया प्रोक्ता यथा भैषज्यरोचनमित्युक्तमेव कारणमनु
स्मारयति परोक्षेति ॥ ऋषयो मंत्राः तद्द्रष्टारो वा तत्किमिति ॥ यतः परोक्षमेव मम च प्रियं अयं भावः शुद्धांतःकरणैरेव तद्बुद्ध्यतां ना
न्यैरनधिकारिभिः इष्टया कर्मत्यागेनानर्थप्रसंगादिति ॥३६॥ राम राम राम

ननु वेदज्ञा अपि जैमिन्यादयः किमिति तथा न वर्णयंति मां विना तत्वतो वेदां तदर्थं वा न कोपि वेदेत्याशयेनाह शब्दब्रह्मेति यावत्समाप्तिः ॥ स्व
रूपतः अर्थतश्च दुर्विज्ञेयं कथं तच्च स्थूलं सूक्ष्मं चेति द्विविधं । तत्र सूक्ष्मं तावत्स्वरूपतोपि दुर्विज्ञेयमित्याह प्राणेंद्रियमनोमयं प्रथमं प्रा
णमयं पराख्यं ततो मनोमयं पश्यंत्याख्यं तत इंद्रियमयं मध्यमाख्यं तस्य वर्णाभिव्यक्तत्वेन वागिंद्रियप्रधानत्वात् किंचानंतपारं समहि प्राणा
दिमयस्यानिर्विशेषस्य तस्य च कालतो देशतश्चापरिच्छेदात् ॥ अर्थतोपि दुर्ज्ञेयत्वमाह गंभीरं निगूढार्थं अतो दुर्विगाह्यं मतिप्रवेशान
र्हं ॥ तथा च श्रुतिः ॥ चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ॥ गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो मनुष्या वदंतीति

शब्दब्रह्म सुदुर्बोधं प्राणेंद्रियमनोमयं ॥ अनंतपारं गंभीरं दुर्विगाह्यं समुद्रवत् ॥ ३६ ॥
मयोपबृंहितं भूम्ना ब्रह्मणानंतशक्तिना ॥ भूतेषु घोषरूपेण बिसेषूर्णेव लक्ष्यते ॥ ३७ ॥

अयमर्थः वाचः शब्दब्रह्मणः परिमितानि निर्णीतानि पद्यंते ज्ञायते परं तत्वमेभिरिति पदानि स्थानानि चत्वार्यपि ये मनीषिणः तद्दृश्यः ते विदुर्न
त्रेषु तो गुहायां देहमध्ये त्रीणि निहितानि नेंगयंति स्वरूपं प्रकाशयंति ॥ अतः केवलं वाचस्तुरीयं चतुर्थभागं वैखरीरूपं मनुष्याः प्राणि
नो वदंतीति तमपि वदंती वन तु तत्वेनाजानंत ॥ ३६ ॥ तत्र मनीषिभिर्यज्ज्ञेयं सूक्ष्मं रूपं दर्शयति मयेति ॥ मयांतर्यामिनोपबृंहितं अधि
ष्ठितं तस्य तत्वेप्यपरिच्छेदमाह भूम्नेति ॥ अधिष्ठातृत्वेपि अविकारित्वेपि ब्रह्मणेत्यनुविहितं तस्यापि नियंतृत्वं घटयति अनंतशक्तिनेति
भूतेषु सर्वप्राणिषु घोषरूपेण नादरूपेण लक्ष्यते ॥ मनीषिभिः अंतःसूक्ष्मदर्शनत्वे दृष्टांतः बिसेषूर्णातंतुरिवेति ॥ ३७ ॥

ति

श्री भा॰ टी॰ ११ ८.

ततो वैखर्या व्याख्यायाः स्वरूपावेत्तः उत्पत्तिप्रकारं सदृष्टांतमाह यथेति त्रिभिः ॥ हृदयान्नाभिकमलान्मुखद्वारात् ऊर्णनाभिरिव बहिः प्रकटयति दार्ष्टांतिके
दर्शयति आकाशादिति प्राणस्तदुपाधिर्हिरण्यगर्भस्तथा ॥ ३९ ॥ प्रभुर्भगवांस्तेन स्वरूपेण छंदोमयो वेदमूर्तिः स्वतस्त्वमृतमयो घोषवा
न्नादोपादानवान् मनसापि निमित्तभूतेन निमित्ततामेव दर्शयति ॥ स्पर्शादीन्वर्णान्स्वस्पर्शयति संकल्पयतीति स्पर्शरूपिणेन स्पर्शो
पलक्षणं हृदयाकाशाद्बृहतीं सृजतीति तृतीयश्लोकेनान्वयः ॥ बृहतीं शब्दार्थव्याख्यानाय विशेषणानि सहस्रपदवीं बहुमा

यथोर्णनाभिर्हृदयादूर्णामुद्वमते मुखात् ॥ आकाशाद्घोषवान्प्राणो मनसा स्पर्शरूपिणा ॥ ३९ ॥
छंदोमयोऽमृतमयः सहस्रपदवीं प्रभुः ॥ ओंकाराद्व्यंजितस्पर्शस्वरोष्मांतस्थभूषितां ॥ ४० ॥
विचित्रभाषाविततां छंदोभिश्चतुरुत्तरैः ॥ अनंतपारां बृहतीं सृजत्याक्षिपते स्वयं ॥ ४१ ॥
गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च ॥ त्रिष्टुब्जगत्यतिछंदो ह्यत्यष्ट्यतिजगद्विराट् ॥ ४२ ॥

र्गां तदेवाह ॥ ओंकारादुरःकंठादिसंगेन व्यंजितैः स्पर्शादिभिर्भूषितां ओंकारस्याविर्भूतः स्वराम्नोऽभिप्रेतः न त्वकारादिवर्णरूपः तस्य व्यंजकाः
तत्र स्पर्शाः कादिपंचवर्गाः स्वराः अकारादयः षोडश ऊष्माणः शषसहाः अंतस्थाः यरलवाः ॥ ४० ॥ विचित्राभिर्वैदिकलौकिकभाषाभिर्विततां
यथोत्तरं चत्वारि चत्वार्यक्षराणि उत्तराण्यधिकानि येषां तैः छंदोभिरुपलक्षितामेव अनंतपारां सृजति स्वयमेवाक्षिपते उपसंहरति ॥ ४१ ॥ तेषु छं
ति कि छंदांसि दर्शयति गायत्रीति ॥ तत्र चतुर्विंशत्यक्षरा गायत्री ततश्चतुरक्षरवृद्ध्या उष्णिगादिछंदांसि अत्यष्टिः अतिजगती अतिविराड् इत्यर्थः

रम ७ ८.

अतो हृदयमस्यापि साकल्येन स्वरूपतो दुर्ज्ञेयेत्युक्तं अर्थतोपि दुर्विज्ञेयत्वमाह किमिति ॥ कर्मकांडे विधिवाक्यैर्मां विना किं विधत्ते अभिधत्ते देवताकांडे मंत्रवाक्यैः किमाचष्टे प्रकाशयति ज्ञानकांडे च किमनूद्य विकल्पयेत ॥ निषेधार्थमिति एवमस्या हृदयं तात्पर्यार्थं मत्तः अन्यः कश्चिदपि वेद न जानाति तर्हि त्वमुच्यतामित्यपेक्षायामाह मामिति चकथयति मामेव यज्ञरूपं विधत्ते मामेव तत्र देवतारूपमभिधत्ते न मत्तोन्यः पृथगस्ति यत्त्वाकाशादिप्रपंचजातं तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिना विकल्प्यापोह्यते तदप्यहमेव न मत्तः पृथगस्ति ॥४३॥ अत इत्य

किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् । इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन ॥४३॥ मां विधत्तेभिधत्ते मां विकल्प्यापोह्यते त्वहं ॥४३॥ एतावान्सर्ववेदार्थः शब्द आस्थाय मां भिदां ॥ मायामात्रमनूद्यांते प्रतिषिध्य प्रसीदति ॥४४॥ ३ श्री भा व ए द स्कं ॥ भगवदुद्धवसंवादे कृ शो यः ॥२१॥ राम राम राम

पेक्षायां सर्ववेदार्थं संक्षेपतः कथयति । एतावानेव सर्वेषां वेदानामर्थः तमेवाह शब्दो वेदः मां परमार्थरूपमाश्रित्य भिदां मायामात्रमित्यनूद्य नेह नानास्ति किंचन नेति नेति नेमोन्ते तां प्रतिषिध्य प्रसीदति निवृत्तव्यापारो भवति अयं भावः यथा ह्यंकुरेयोरसः सप्रवृत्त हि स्तार भूतास्तु नानावे उशाखास्वपि ॥ नचैवं प्रणवस्यैवोर्थः परमेश्वरः सप्रवृत्त हि स्तास्भूतानां सर्ववेदकांडशाखानामपि संगच्छते नान्यदिति ॥४४॥ नित्यमुक्तः स्वतः सर्ववेदकृत्सर्ववेदवित् ॥ स्वपरज्ञानदाताय तं वंदे गुरुमीश्वरं १ ११ ए द स्कं ए विं ध्या ॥२१॥ राम

द्वाविंशे तत्त्वसंख्यानमविरोधधियोच्यते ॥ पुंप्रकृत्योर्विवेकश्च जन्मसृत्युर्विधादि च ॥ तदेवं वेदानां प्रवृत्तिपरत्वं निराकृत्य मोक्षपरत्वं निर्णीतं
संति च मोक्षपरत्वेपि तद्वांतरविवादाः ॥ तथाहि केचित्तत्त्वसंख्यास्तु विवदंते तत्रापि च बाह्यार्थसदसत्त्वे आत्मनस्त्वेप्येकत्वनानात्वादिषु
तत्र किं सत्यमिति जिज्ञासया पृच्छति कतीति ॥ ऋषिभिरस्माभेषु च बहुधा संख्यातानि निरूपितानि तत्त्वानि तेषु मध्ये कतियुक्तानीत्यर्थः ॥ भगवन्म
नातु वादपूर्वकं बहुधा संख्यानं प्रपंचयन् नवैकादशेति त्रिभिः । त्वं तावदष्टाविंशतितत्त्वान्याख्यातानि च वयं शुश्रुम श्रुतवंतः ॥१॥ एतावतीनां
भावः एतावत्त्वं नानात्वमित्यर्थः यद्विवक्षया यत्प्रयोजनमभिप्रेत्य गायंति आयुष्मन्नित्यपसर्त्तं ॥३॥ विवक्षाभेदेन सर्वं युक्तमेव मायया

उ॰ वा॰ ॥ कति तत्त्वानि विश्वेश संख्यातान्यृषिभिः प्रभो ॥ नवैकादश पंच त्रीण्यात्थ त्वमिति शुश्रुमः ॥१॥ केचित्षड्विं
शतिं प्राहुरपरे पंचविंशतिं ॥ सप्तैके नव षट् केचिच्चत्वार्येकादशापरे ॥२॥ केचित्सप्तदश प्राहुः षोडशैके त्रयोदश ॥ एतावत्त्वं हि
संख्यानमृषयो यद्विवक्षया ॥ गायंति पृथगायुष्मन्निदं नो वक्तुमर्हसि ॥३॥ श्री भ॰ उ॰ ॥ युक्तं च संति सर्वत्र भाषंते ब्रा
ह्मणा यथा ॥ मायां मदीयामुद्गृह्य वदतां किं नु दुर्घटं ॥४॥ नैतदेवं यथात्थ त्वं यदहं वच्मि तत्तथा ॥ एवं विवदतां हेतुः शक्त
यो मे दुरत्ययाः ॥५॥

किं नाम न युक्तमित्यादृत्य युक्तमिति ॥ यथा ब्राह्मणा भाषंते तत्तद्युक्तं च न वस्तुतः यस्मात्संति सर्वत्रांतर्भूतानि सर्वाणि तत्त्वानि किं च मायामिति
असत्त्वेपि च मायाश्रयत्वात् चरतेः एवेत्यर्थः उद्गृह्य स्वीकृत्य न हि मरीचिजलपरिणामादिविवादे किंचिद्दुर्घटमेव भवति ॥४॥ ननु यदि
सर्वमपि युक्तं कुतो विवादः ॥ यदि च माययैवालंबनं कुतो देहे प्रति विवादस्तत्राह ॥ नैतदिति देहं प्रति विवदमानानां मदीयाः अतिक्रमाः
शक्तयः सत्त्वाद्या अंतःकरणवृत्तिरूपेण परिणता एव हेतव इत्यर्थः ॥५॥ राम राम

तासां विवादे हेतुत्वमुपपादयति यासामिति ॥ यासां व्यतिकरात् क्षोभात् इदं तावत्पदं विषयः विकल्पो भेद आसीत् अतः कारणादिति विकल्पो मतान्तरं
लक्ष्यतः । एतदेव व्यतिरेकेण द्रढयति शमदमयोर्हेतुकं तस्मिन्प्राप्ते विकल्पोऽप्येति लीयते तेन च विकल्पमनुवादः शाम्यतीति ॥६॥ संति सर्वत्रे
ति यदुक्तं तत्प्रपंचयति परस्परेति द्वाभ्यां । अन्योन्यस्मिन्ननुप्रवेशाद्धेतोर्यथा विवक्षितं तत्त्वं तथा पूर्वं कारणं अपरं कार्यं कार्यकारणभावेन
प्रसंख्यानं भवति । यद्वा पूर्वोल्पसंख्या अपराधिकसंख्या तयोः पौर्वापर्येन न प्रसंख्यानं गणनमिति ॥७॥ अनुप्रवेशं दर्शयति । पूर्वस्मिन्
कारणभूते तत्त्वे कार्यतत्त्वानि सूक्ष्मरूपेण प्रविष्टानिस्थदिवरवत अपरस्मिन्कार्यतत्त्वे कारणतत्त्वान्यनुगतत्वेन प्रविष्टानि चेष्टेहत ॥८॥ ॥

यासां व्यतिकरादासीद्विकल्पो वदतां पदं ॥ प्राप्ते शमदमेऽप्येति वादस्तमनु शाम्यति ॥६॥ परस्परानुप्रवेशात्तत्त्वानां पुरुषर्
षभ ॥ पौर्वापर्यप्रसंख्यानं यथा वक्तुर्विवक्षितं ॥७॥ एकस्मिन्नपि दृश्यन्ते प्रविष्टानीतराणि च ॥ पूर्वस्मिन्वा परस्मि
न्वा तत्त्वे तत्त्वानि सर्वशः ॥८॥ पौर्वापर्यमतोऽमीषां प्रसंख्यानमभीप्सतां ॥ यथा विविक्तं यद्वक्त्रं गृह्णीमो युक्तिसंभवात् ॥९॥
अनाद्यविद्यायुक्तस्य पुरुषस्यात्मवेदनं ॥ स्वतो न संभवादन्यस्तत्त्वज्ञो ज्ञानदो भवेत् ॥१०॥ राम

अविरोधमुपसंहरति ॥ अतोऽमीषां तत्त्वानां पौर्वापर्येन कारणकार्यत्वं प्रसंख्यानं च न्यूनाधिकमभीप्सतां वादिनां मध्ये यथा यथा विव
क्षया यद्वक्त्रं यस्य मुखं प्रवर्तते तत्सर्वं निश्चितं विविक्तं वयं गृह्णीमः उक्तन्यायेन सर्वत्र युक्तेः संभवात् ॥९॥ ननु कार्यकारणतत्त्वानां पृथ
क्त्वापृथक्त्वे तत्त्वविवक्षया भवतु नाम संख्याभेदः जीवेश्वरयोस्तु कथं भेदाभेदविवक्षया षड्विंशतिपक्षो वाश्रितावत आह अनादीति स्वतो न
संभवति अन्यज्ञउसंभवात् स्वतः सर्वज्ञः परमेश्वरो भवति ॥ इति षड्विंशतिपक्षाभिप्राय इत्यर्थः ॥१०॥ राम राम

श्री
भागी
ए
११
९२

कथं तर्हि पंचविंशतिपक्षः सत्तत्राह पुरुषेति ॥ वैलक्षण्यं विसदृशत्वं नास्ति द्वयोरपि चिद्रूपत्वात् अतस्तयोः स्वतंत्रमन्यतत्त्वकल्पनाऽपार्था
व्यर्था एवं पंचविंशतिपक्षोपपत्तिरित्यर्थः ॥ ननु एवमपीश्वरप्रसादलभ्यज्ञानस्य पृथक्त्वेनापञ्चाद्वयमपि न घटते अत एवाह ज्ञानं चेति
सत्त्वगुणवृत्तित्वान्नेदं तत्त्वांतरमित्यर्थः ॥ ११ ॥ ननु ज्ञानं जीवधर्मः कथं प्रकृतेर्गुणः स्यादत आह प्रकृतिरिति ॥ गुणसाम्यं हि प्रकृतिः अत
स्तद्विशेषरूपा गुणाः तस्या एव न त्वात्मनो जीवस्याकर्तृत्वात्तस्य स्थित्यादिहेतुभूतगुणाश्रयत्वानुपपत्तेः ॥ १२ ॥ अतः सत्त्वं सत्त्वमयं ज्ञा

पुरुषेश्वरयोरत्र न वैलक्षण्यमण्वपि ॥ तदन्यकल्पनापार्था ज्ञानं च प्रकृतेर्गुणः ॥ ११ ॥ प्रकृतिर्गुणसाम्यं वै प्रकृते
नात्मनो गुणाः ॥ सत्त्वं रजस्तम इति स्थित्युत्पत्त्यंतहेतवः ॥ १२ ॥ सत्त्वं ज्ञानं रजः कर्म तमोऽज्ञानमिहोच्यते ॥ गुणव्य
तिकरः कालः स्वभावः सूत्रमेव च ॥ १३ ॥ पुरुषः प्रकृतिर्व्यक्तमहंकारो नभोऽनिलः ॥ ज्योतिरापः क्षितिरिति तत्त्वान्युक्ता
नि मे नव ॥ १४ ॥

नं प्रकृतेर्गुण इति पूर्वेणैवान्वयः ॥ ननु तर्हि ज्ञाननिवर्त्यं कर्म चाज्ञानं च तत्त्वांतरं स्यान्नै रजः कर्म रजसो वृत्तिः अज्ञानं तमसो वृत्तिः अतः कर्मा
ज्ञानयो रजस्तमोद्वारा प्रकृतावेवांतर्भाव इति भावः ॥ तथापि कालस्वभावयोस्तत्त्वांतरता स्यात् ॥ न गुणानां व्यतिकरो यस्मात्स एवेश्वरः
कालो नाम स्वभावो नाम सूत्रं तत्त्वं महत्तत्त्वमेव तस्य सर्वशक्तिमत्त्वात् ॥ तदेवं ज्ञानादीनां यथायथमंतर्भावान्नव पक्षद्वयेपि तत्त्वशुद्धिः एत
त्पक्षांतरेष्वपि ज्ञेयं स्वमते तु गुणानामागमापायित्वात्पृथक्तेर्भेदो विवक्षितः अतो गुणास्त्रीणि तत्त्वानि ॥ १३ ॥ अपराणि पंचविंशतित
त्त्वानि पूर्वोक्तप्रकारद्वयसाधारणानि दर्शयति पुरुष इति सार्धद्वाभ्यां ॥ व्यक्तं महत्तत्त्वं नभआदीनि तन्मात्राणि मे मया ॥ १४ ॥ राम

राम
९९
९२

एकादश दर्शयति श्रोत्रमिति ॥ दर्शनं च स्वरूपज्ञानशक्तयः ज्ञानेंद्रियाणि पंच वागादि पाय्वंतानि इंद्रैकेनोक्तानि चत्वारि अंघ्रिश्चेति कर्माणि क
र्मेंद्रियाणि पंच उभयमुभयात्मकं मनः अंगादेरुद्भवमेवमेतान्येकादश ॥ १५ ॥ पंच दर्शयति शब्द इति ॥ शब्दादीनि विषयतयायाणिता
नि पंच महाभूतानि ॥ ननु गत्यादिभिस्तत्त्वाधिरूपं स्वत्वं येपि स्यात्तन्नाह गतीति ॥ गतिश्च उक्तिश्च उत्सर्गश्च शिल्पं च तानि कर्मायतनानां
कर्मेंद्रियाणां सिद्धयः फलानि तन्नांतरीणीत्यर्थः ॥ १६ ॥ तदेवं मतत्रये णतत्त्वसंख्याभेदान्निरस्य यद्विवक्षयागायंतीति एतद्वयं तन्मतता
त्पर्यं दर्शयतीति सर्गादाविति ॥ कार्याणि षोडश विकाराः कारणानि महदादीनि सप्त तद्रूपिणी सती प्रकृतिः अस्य विश्वस्य सर्गादौ गुणैः

श्रोत्रं त्वग्दर्शनं घ्राणो जिह्वेति ज्ञानशक्तयः ॥ वाक्पाण्युपस्थपाय्वंघ्रि कर्माण्यंगोभयं मनः ॥ १५ ॥ शब्दः स्पर्शो रसो गंधो
रूपं चेत्यर्थजातयः ॥ गत्युक्त्युत्सर्गशिल्पानि कर्मायतनसिद्धयः ॥ १६ ॥ सर्गादौ प्रकृतिर्ह्यस्य कार्यकारणरूपिणी ॥
सत्त्वादिभिर्गुणैर्धत्ते पुरुषोऽव्यक्त ईक्षते ॥ १७ ॥ व्यक्तादयो विकुर्वाणा धातवः पुरुषेक्षया ॥ लब्धवीर्याः सृजंत्यंडं संहताः प्र
कृतेर्बलात् ॥ १८ ॥ सप्तैव धातव इति तत्रार्थाः पंच खादयः ॥ ज्ञानमात्मोभयाधारस्ततो देहेंद्रियासवः ॥ १९ ॥

हेत्वात्सृज्यत्वाद्यवस्थां धत्ते उपादानकारणरूपत्वात् पुरुषस्त्वव्यक्तः अपरिणामी निमित्तभूतः केवलमीक्षते अतः परिणामिन्याः
प्रकृतेः पुरुषो भिन्न इति ॥ १७ ॥ तत्त्वैरारब्धस्य च कार्यस्य तत्त्वं तद्भावमभिप्रेत्याह ॥ प्रकृतेर्बलात्तामाश्रित्येत्यर्थः ॥ १८ ॥ एवं स्वमतमुपसंहृ
त्य मतांतरेष्वपि सामान्यतो निरूपितानां चेतनानां विशेषतः सतात्पर्यं दर्शयति ॥ ज्ञानं जानातीति द्रष्टा जीव उभयोर्द्रष्टृदृश्ययोः आधारश्चा
त्मेति सप्त ॥ तत्र प्रकृत्यादीनां कारणत्वेन खादिष्वंतर्भावः उक्तरेषामंतर्भावार्थमाह ॥ ततस्तेभ्यः सप्तभ्यः देहेंद्रियासवः कार्याणि जायंते
॥ १९ ॥

श्री
भाग टी
११
६३

षडिति मते षड्भौतिकस्यापि भूतांतर्भावं जीवस्य च परमात्मांतर्भावमाह तैर्युक्त इति ||१४|| चत्वार्येवेति पक्षे पृथ्वी आत्मनो जातानि आत्मना सह
चत्वारि तत्त्वानि तदंतर्भावार्थमाह तैरिति अवयविनः कार्यस्य ||१५|| भूतानि च मात्राणि च इंद्रियाणि च पंच पंच एकेन मनसा सह आत्मा सप्त
दशः ||१६|| आत्मैव संकल्पयन्मन उच्यते | त्रयोदशपक्षे भूतानि तन्मात्रैरेकीकृतानि पंचैव इंद्रियाणि तत्प्रकाशकानि पंचैव मनो वा

षडित्यत्रापि भूतानि पंच षष्ठः परः पुमान् || तैर्युक्त आत्मसंभूतैः सृष्ट्वेदं समुपाविशत् ||१४|| चत्वार्येवेति तत्रापि तेज आ
पोऽन्नमात्मनः | जातानि तैरिदं जातं जन्मावयविनः खलु ||१५|| संख्याने सप्तदशके भूतमात्रेंद्रियाणि च | पंच पंचैकमनसा
आत्मा सप्तदशः स्मृतः ||१६|| तद्वत्षोडशसंख्याने आत्मैव मन उच्यते || भूतेंद्रियाणि पंचैव मन आत्मा त्रयोदश ||१७|| ^^
इति नानाप्रसंख्यानं तत्त्वानामृषिभिः कृतं | सर्वं न्याय्यं युक्तिमत्त्वाद्विदुषां किमशोभनं ||१९|| उद्धव उवाच || प्रकृतिः
पुरुषश्चोभौ यद्यप्यात्मविलक्षणौ || अन्योन्यापाश्रयात्कृष्ण दृश्यते न भिदा तयोः ||२०||
राम

||^^ एकादशत्व आत्मासौ महाभूतेंद्रियाणि च || अष्टौ प्रकृतयश्चैव पुरुषश्च नवेत्यथ ||१८||

राम
११
६३

इंद्रियाधिष्ठातृ आत्मा च द्विविधः जीवात्मा परमात्मा च ||१७|| एवं त्रयोदशपक्षे जीवमनसोरात्मांतर्भावेनैतान्येवैकादश | नवपक्षे ह्यष्टौ प्र
कृतयः पुरुषश्च विकाराणामंतर्भावः ||१८|| उपसंहरति | इत्येभिः प्रकारैः प्रकृतिपुरुषभेदज्ञापनायेत्यर्थः ||१९|| ननु एवं प्रकृतिः प्रकृतिरिति
आत्मना जडाजडस्वभावेन विलक्षणावन्योन्यापाश्रयात् परस्परपरिहारेणाप्रतीतेरित्यर्थः ||२०||
राम

तदेवंख्यानत्ति॥ प्रकृतौतत्कार्ये देहेचप्रकृतिश्चात्मनितेनविनाजस्याप्रतीतेः अहमित्यभेदप्रतीतेः नदेहात्मनोर्भेदोलक्ष्यतेहृदिवर्त्तमा
नंसंशयं ॥२७॥ त्वमेवह्यात्मनोमायागतिः छेत्तुंसमर्थोनान्यः॥ नयेनयुक्त्यानैपुण्यंप्रावीण्यंयेषांतैः अर्हसीत्युक्तंतत्रहेतुमाह हियस्मा
त्वत्तः त्वत्प्रसादादेव अत्रज्ञानेभ्रंशः भ्रंशश्चतेशक्तितोमायातः नतुस्वप्रकाशस्यात्मनः कथंज्ञानप्रमोषः ज्ञानादेर्वैतत्प्रमोषेवाममकिं
प्रयोजनंतत्राह त्वमेवेति॥२८॥ विकाराविकाराभ्यांनानात्वैकत्वाभ्यांसापेक्षनिरपेक्षप्रकाशाभ्यांचात्यंतभेदंवक्तुमाह प्रकृतिरिति॥
ष्या मका

ने ३

हृदि

प्रकृतौलक्ष्यतेह्यात्माप्रकृतिश्चतथात्मनि॥ एवंमेपुंडरीकाक्षमहांतंसंशयं॥२६॥ छेत्तुमर्हसिसर्वज्ञवचोभिर्नय
नैपुणैः॥ त्वत्तोज्ञानंहिजीवानांप्रमोषस्तेत्रशक्तितः॥२७॥ त्वमेवह्यात्ममायायागतिंवेत्थनचापरः॥२८॥ श्री
भ ग उ व॥ प्रकृतिःपुरुषश्चेतिविकल्पःपुरुषर्षभ॥ एषवैकारिकःसर्गोगुणव्यतिकरात्मकः॥२९॥ ममांगमाया
गुणमय्यनेकधाविकल्पबुद्धीश्चगुणैर्विधत्ते॥ वैकारिकस्त्रिविधोध्यात्ममेकमथाधिदैवमधिभूतमन्यत्॥३०॥

वे २

विकल्पोत्यंतभेदएवकुतइत्यपेक्षायांप्रकृतिशब्दोक्तदेहादिसंघातस्यविकारत्वंनानात्वंचदृश्यतइति॥ एषइतिद्वाभ्यामेषसर्गः सृज्यतइति
सर्गः देहादिसंघातः वैकारिकः विकारवान् अत्रहेतुः गुणव्यतिकरात्मकः गुणक्षोभजनितः॥२९॥ नानात्वमाह ममेति॥ विकल्पंभेदंत
द्बुद्धीः अनेकधात्वंप्रपंचयतिवैकारिकः अनेकविकारवानपिस्थूलेनमार्गेणतावत्त्रिविधः वैविध्यमेवाह अध्यात्ममित्येकंरूपं॥३०॥

तानि रूपाणि दर्शयति । दृगाध्यात्मं रूपमधिभूतमत्र रंध्रे चक्षुर्गोलके प्रविष्टमार्कं वपुः सूर्यांशोधिदैवमिति सापेक्षप्रकाशतामाह पर
स्परमिति ॥ एवं च रूपाकृतिपं ज्ञायते तदन्यथानुपपत्त्या चक्षुस्तत्स्वरूपस्यान्यथानुपपत्त्या तदधिष्ठाता देवता जितवृद्धेः प्रतीतिस्ततो रूप
ज्ञाने त्रयं त्वेवमेतत्त्रयं परस्परं सिद्ध्यति अत्र रंध्र इति विशेषं व्याख्यातमाह दृष्टृ इति तोपयोगितया सत्त्वएव आकाशैकौ वर्तने मंडलात्मा सच
स्वतः सिद्ध्यति चक्षुर्विषयत्वेपि प्रतियोग्यपेक्षाभावमात्रेण स्वतस्त्वमुक्तं । इदानीमात्मनो विकारत्वाभावेन भेदमाह । यद्यस्मादात्मा

दृग्रूपमार्कं वपुरत्र रंध्रे परस्परं सिद्ध्यति न स्वतो सौ ॥ आत्मा यदेषामपरो यमाद्यः स्वयानुभूत्याखिलसिद्धिसिद्धः ॥ ३१ ॥
एवं त्वगादि श्रवणादि चक्षुर्जिह्वादि नासादि च चित्तयुक्तं ॥ ३२ ॥

एषामध्यात्मादीनां आद्यः कारणमतः एकरूपो भिन्नश्च न तस्मादेभ्योपरो भिन्नः प्रकाशत्वादपीत्याह स्वयानुभूत्यासुतः सिद्धप्रकाशेनाखिला
नां सिद्धानां परस्परं प्रकाशानामपि प्रकाशः सर्वेषामपि सामान्यतश्चित्प्रकाशविषयत्वादतएव तस्य स्वप्रकाशे विषयत्वं सिद्धं च दृष्टा विद
शितमिंद्रियांतरेप्यतिदिशति ॥ ३१ ॥ यथा चक्षुरेवं त्वगाद्यपीत्यर्थः त्वक् स्पर्शो वायुरिति श्रवणं शब्दो दिश इति जिह्वा रसो वरुण इति नासा गंधो
श्विनाविति चित्तेन युक्तं मंतःकरणांतरमपि तत्र चित्तं चेतयितव्यं वासुदेवे निमनो मंतव्यं चंद्र इति बुद्धिः बोद्धव्यं ब्रह्मेति अहंकारो हंकर्तव्यं रुद्र

ननु च पुनरपि वैलक्षण्यमात्रमेवोक्तं त्रिविधत्वं च व्यतिरिक्तात्मप्राप्तिरस्तु अतः स्यादहंकारनिवृत्त्या तन्तु ततः त्रिविधविकल्पनिवृत्त्यै
त्या वशयेनेत्याह ॥ योसावहमहंकारस्तमेवाह गुणक्षोभं करोतीति तथा ततः परमेश्वरात्कालादृष्टनिमित्तात्प्रधानं मूलमुपादानं यस्य तस्मा
न्महतः प्रसृतो विकारः स च त्रिवृत् त्रिविधः मोहमयस्य विकल्पस्य हेतुः त्रिवृत्त्वमेवाह वैकारिक इति ॥ स उतो निवर्तते आत्मा ज्ञान
विलसितत्वात् ज्ञानेनेत्याशयेनाह आत्माय विज्ञानमय इति न तु कथं मोहमयत्वं विकल्पस्याहंकारस्य वैकारिकस्तत्यागीकारात् तत्रा

योसौ गुणक्षोभकृतो विकारः प्रधानमूलान्महतः प्रसूतः ॥ अहं त्रिवृन्मोहविकल्पहेतुर्वैकारिकस्तामस ऐन्द्रियश्च ॥
आत्मापरिज्ञानमयो विवादो ह्यस्तीति नास्तीति भिदार्थनिष्ठः ३३ व्यर्थोपि नैवोपरमेत पुंसां मत्तः परावृत्तधियां स्व
लोकात् ॥ ते कर्मभिर्यान्ति तथोच्चनीचदेहेषु नित्यं परिवर्तमानाः ॥ ३४ ॥ उ व वा ॥ त्वत्तः परावृत्तधियः स्वकृतैः क
र्मभिः प्रभो ॥ उच्चावचान्यथा देहान्गृह्णन्ति विसृजन्ति च ॥ ३५ ॥ राम राम

रु विवाद इत्ययं भिदार्थनिष्ठो विवादो ह्यात्मापरिज्ञानमय इत्यन्वयः ॥ पक्षादिविवादः सर्वो भिदार्थनिष्ठ एव न तु वस्तुमात्रनिष्ठः अतः परस्य
वस्तुनिभिरेव भेदस्य निराकृतत्वान्मोहमयत्वं सिद्धमिति ॥ ३३ ॥ ननु यद्यहंकारो विकल्पस्तु न सत्यत्वं नार्दितं तन्निवृत्तिप्रयासेन तत्राह ॥ व्यर्थो
पि यद्यपि नोपि स्वरूपनाशनतो व्यर्थस्तथापि ईश्वरीभूतानां पुरुषाणां नैवोपरमेत अहंकारो विकल्पस्तु वस्तुतत्त्वतः ते कर्मभिः उच्चनीचदेहेषु ते
संसरन्तीति ॥ ३४ ॥ ननु एवं व्यतिरिक्तात्म इति ॥ व्यापकस्यात्मनो देहाद्देहान्तरगमनं मकानैः कर्माणि नित्यस्य जन्ममरणादीनि कथमिति भावः
॥ ३५ ॥

दि

एतद्विद्वांसोनसंतिहियस्मान्माययावंचिताः ॥३५॥ लिंगशरीराध्यासेनसर्वंघटतइत्युत्तरमाहद्वाभ्यांमनइतिप्रधानत्वेनपंचभिरितिनिर्देशोन्येषा
मप्युपलक्षणार्थः देहाद्देहांतरंप्रयातिततोन्यआत्मातन्मनोनुवर्ततेअहंकारेणानुगच्छति ॥ नत्वमनसोपिपूर्वदेहवियोगोदेहांतर
योगश्चकथंभवतीतिचेत् ॥३६॥ स्मृतिविलयोवियोगाभ्यामितिवक्तुंतयोःकारणमाह ध्यायन्निति कर्मतंत्रंत्वात्मनःकर्मोपस्थापितान्
दृष्टान्वानुश्रुतान्वेदोक्तान्वाविषयाननुध्यायत् ॥ अथानंतरंध्यायमानेषुउद्यत्आविर्भवत्पूर्वविषयेषुचसीदत्लीयमानंभ

तन्ममाख्याहिगोविंददुर्विभाव्यमनात्मभिः ॥ नह्येतत्प्रायशोलोकेविद्वांसःसंतिवंचिताः ॥३५॥ श्री ग उ व ॥
मनःकर्ममयंनृणामिंद्रियैःपंचभिर्युतं ॥ लोकाल्लोकंप्रयात्यन्यआत्मातदनुवर्तते ॥३६॥ ध्यायन्मनोनुविषयान्दृष्टा
न्वानुश्रुतानथ ॥ उद्यत्सीदत्कर्मतंत्रंस्मृतिस्तदनुशाम्यति ॥३७॥ विषयाभिनिवेशेननात्मानंयत्स्मरेत्पुनः ॥ जंतोर्वै
कस्यचिद्धेतोर्मृत्युरत्यंतविस्मृतिः ॥३८॥ जन्मत्वात्मतयापुंसःसर्वभावेनभूरिद ॥ विषयस्वीकृतिंप्राहुर्यथास्वप्नमनो
रथः ॥३९॥

वतिनदनंतरंतत्स्मृतिःपूर्वापरानुसंधानंनश्यति ॥३७॥ ततःकिमतआह विषयेति ॥ कर्मोपस्थापितदेवादिदेहादत्यंताभिनिवेशेनआ
त्मानंपूर्वदेहंमनोनस्मरेदिति ॥ यन्मनसैवदेहाभिनिवेशेनभयशोकादेर्देहाभिनिवेशेनवाहर्षादेर्हेतोःपूर्वदेहात्यंतविस्मृतिःअहंकार
प्रवृत्तिःतदभिमानिनोजंतोर्जीवस्यमृत्युरुच्यतेनतुदेहस्यनाशः ॥३८॥ जन्मतुविषयस्यदेहस्यआत्मतयास्वीकारंतमभिमानमाहुः नतु
देहवदुत्पत्तिंचपुत्रादिदेहवत्प्रीतिमतिशयमात्रेणकिंतुसर्वभावेनअभिमानमात्रेणोत्पत्तिमरणेदृष्टांतद्वयंयथास्वप्नमनोरथश्चे
त्यर्थः ॥३९॥

श्री भा टी ० ६२ ८५

राम ६२ ८५

दृष्टं नैव विदूरत्नोति स्वप्नमिति ॥ तत्र वर्तमाने स्वप्नादौ पूर्वं चेति अपूर्वमिवेति चान्वयः पूर्वसिद्धमप्यात्मानमपूर्वं जातमिव पश्यतीत्यर्थः
४१ ॥ उपसंहरति इंद्रियाणामयनं मनः तस्य देहाभिनिवेशेन यास्वस्थितिः उत्पत्तिस्तया वस्तूनि आत्मनि तदभिमाने नेदं त्रैविध्यमुक्तममध्य
मनी चतं असदेव भातीत्यन्वयः ॥ एवं सतरागकलुषितांतःकरणेन नरो बहिरंतर्भिदा देहत्वर्भवति बाह्याभ्यंतरभेदे देहत्वप्रभवति बास्य विष
यानां तराकूतवोदीन्पश्यतीत्यर्थः ॥ यथाजनो जीवः स्वप्ने बहूनि असतो जनान्देहान् अवेनपश्यन् बहुरूपो भातितद्वत् ॥ यद्वा इदं त्रैवि

स्वप्नं मनोरथं चेच्छां प्राक्तनेन स्मरत्यसौ ॥ तत्र पूर्वमिवात्मानमपूर्वं चानुपश्यति ॥ ४१ ॥ इंद्रियायनसृष्ट्येदं त्रैविध्यं
भाति वस्तुनि ॥ बहिरंतर्भिदाहेतुर्जनोऽसज्जनकृद्यथा ॥ ४२ ॥ नित्यदा ह्यंग भूतानि भवंति न भवंति च ॥ काले ना
लक्ष्यवेगेन सूक्ष्मत्वात्तन्न दृश्यते ॥ ४३ ॥ राम राम राम राम

ध्यं अध्यात्मादिरूपं भाति असज्जनकृत् दुष्टपुत्रोत्पादकः जनः पिता स्वयं समोऽपि पुत्रदोषेण नरशत्रुमित्रादिषु भेदे देहत्वर्भवति तद्व
दिति अन्यत्समाने ॥ ४२ ॥ न तदेवं लोकप्रसिद्धौ जन्ममरणे सर्वेषां जीवानुसारेण भवत इति नित्यस्य सूक्ष्मावस्था अपि नैव वैराग्याय निरूप
ति नित्यदेति श्लोकेन प्रकटयति ॥ नित्यदा प्रतिक्षणं भूतानि शरीराणि उत्पद्यंते नश्यंति च वा कालस्यापि सूक्ष्मत्वात्तन्न तेन भवनमभव
नं वा विवेकिभिर्न लक्ष्यते ॥ ४३ ॥ राम ॥ राम ॥ राम राम

छा २

मनोऽर्जन्ममरणयोरज्ञानैककारणमेव तद्द्वयेत सत्त्वमेव तयोः अतउत्याशं दृष्टानुमानेन साधयति ॥ अर्चिषां परिणामादिभिः स्रोतसां गती
भिः फलानां तु पाकादिभिः यथावस्थाविशेषाः कृताः कालेनेति पूर्वस्यानुषंगः आदिशब्देन तेजोबलकामक्रोधलादीनामुपादा
नं विमतं प्रतिक्षणोत्पत्तिविनाशशालेशवत् अवस्थाभेदत्वात् दीपज्वालादिवदित्यनुमानं ॥४४॥ ननु प्रदीपवत्प्रतिक्षणं भंगे कथं तदि
सोयमिति प्रत्यभिज्ञाः तद्देवसादृश्यावलंबिनी स्यादत ॥ सोयमिति सादृश्याद्विषयामेव यथा सोयं प्रदीप इति प्रत्यभिज्ञाः यथा स्रो

यथार्चिषां स्रोतसां च फलानां वा वनस्पतेः ॥ तथैव सर्वभूतानां वयोवस्थादयः कृताः ॥४४॥
सोयं दीपोर्चिषां यद्वत्स्रोतसां तदिदं जलं ॥ सोयं पुमानिति नृणां मृषा गीर्धीर्मृषायुषां ॥४५॥
मास्य स्वकर्मबीजेन जायते सोप्ययं पुमान् ॥ म्रियते वामरो भ्रांत्या यथाग्निर्दारुसंयुतः ॥४६॥

तसां प्रवाहरूजलानामिति तदिदं जलमिति ॥ यस्मान्मृषा सोयं पुमानिति गीर्धीश्च मृषा नृणां बहूनां शरीरिणां मृषायुषां व्यर्थमायुर्येषां
तेषामविवेकिनां भवति ॥४५॥ ननु देहाध्यासवतः पुंसः जन्मकर्ममरणानि संतिनान्यस्येति तत्त्वतस्यान्नहि देहेन च संयुक्तरूपभेदेन सत्त्वमस्त्वे
वेति अन्नस्यापि वस्तुतः तदभावादित्याह ॥ अयं पुमान् आद्यः सोपि स्वस्यात्मनः कर्मणां बीजभूतेन सोप्यजोपि पुमान् जायते अमरोपि कर्मनाशे
न म्रियते वा किं त्वयं भ्रांत्या अजन्मापि जायत इव अमरोपि म्रियत इव यथा मरुभूततेजोरूपोग्निः आकल्पान्तमवस्थितोपि दारुयोगवियोगाभ्या

टत

सिद्धवत्कृत्योक्तावयोवस्थाः प्रपंचयति ॥ निषेको जठरे प्रवेशः गर्भः तन्मध्ये वृद्धिः बाल्यमापंचमात् कौमारमाषोडशात् ततो यौ-
वनमापंचचत्वारिंशतः ततो वयोमध्यमाषष्टि एवं ते देहसंबंधाज्जन्ममरणादीनि ॥ ॥ तदुपपादितमर्थमुपसंहरति एता इति ह स्फु-
टमन्यस्य देहस्य संबंधिनीर्या एता मनोरथमयीः तनूरवस्थाः गुणसंगात्मका निराहृत्य विवेकात्कश्चित्परमेश्वरानुगृहीतः कश्चि-
ज्जहाति अवस्थावतो देहस्य द्रष्टा नावस्थावानिति विवेकज्ञानेन ॥ ४८ ॥ ननु तदानीमहं किं नित्येन जन्ममरणादस्ते जन्ममरणवान्दे-

निषेकगर्भजन्मादि बाल्यकौमारयौवनं ॥ वयोमध्यं जरामृत्युरित्यवस्थास्तनोर्नव ॥ ४७ ॥ एता मनोरथमयीर्ह्यन्यस्यो-
च्चावचास्तनूः ॥ गुणसंगादुपादत्ते क्वचित्कश्चिज्जहाति च ॥ ४८ ॥ आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ ॥ न भवाप्यय-
वस्तूनामभिज्ञो द्वयलक्षणः ॥ ४९ ॥ तरोर्बीजविपाकाभ्यां यो विद्वाञ्जन्मसंयमौ ॥ तयोर्विलक्षणो द्रष्टा एवं द्रष्टा तनोः पृथक् ॥ ५० ॥

होने दृश्यते तन्न आह आत्मन इति ॥ पितुर्देहस्योर्ध्वदैहिकं कुर्वता अप्ययदर्शनात् पुत्रदेहस्य जातस्य जातकर्म कुर्वता जन्मदर्शनात् आत्मनः स्व-
देहस्यापि भवाप्ययावनुमेयौ एवं च दृश्यते सति भवाप्ययवतां वस्तूनां देहानामभिज्ञो द्रष्टा द्वयलक्षणः भवाप्ययधर्मकेण न भवति ॥ ४९ ॥ ए-
तदेव दृष्टान्तेन स्पष्टयति तरोरिति ॥ तरुशब्देन उद्भिज्जमात्रोपलक्षणं फलपाकान्तस्य ब्रीह्यादेरित्यर्थः ॥ यद्वा तरोरेवान्यः परिणामो विपाकः
बीजाज्जन्म विपाकान्तं संयमं नाशं च विद्वान् द्रष्टा तनोर्द्रष्टा ततः पृथक् स्वतन्त्रवर्तमानोऽप्ययो भवाप्ययाभ्यां संबध्यते ॥ ५० ॥ राम

श्री भा.टी. प ५४ ९७

अविवेकिनां संसारं प्रपंचयति प्रकृतेरिति पंचभिः ॥ तत्त्वेन तत्त्वतो विविच्य तत्त्वदृष्ट्या स्पर्शेषु विषयेषु संमूढ इति वा ॥५१॥ ततस्तदनुमानेन गुणभे
देन त्रिविधं तत्रापि च तारतम्येनैकैकं त्रिविधं संसारमाह सत्त्वेति ॥५२॥ ननु चाकर्तुरात्मनः कुतः कर्मभिर्भ्रमणं तत्राह ॥ नृत्यतो गायतो जनान्
पश्यन् अनुकरोति ॥ तद्गतस्वरमालादिगतं शृंगारकरुणादिरसं च मनसानुवर्तयतीत्यर्थः ॥ अनुकार्यते गुणैर्बलादित्यर्थः ॥ अनेन दृ
ष्टांतेन दृश्यधर्मो द्रष्टर्यस्फुरतीति दर्शितं ॥५३॥ उपाधिधर्मा आत्मपरिणते च भासंत इति दृष्टांतमाह ॥ नीरस्थास्तरवो धावंतीव दृश्यंते

प्रकृतेरेवमात्मानमविविच्याबुधः पुमान् ॥ तत्त्वेन स्पर्शसंमूढः संसारं प्रतिपद्यते ॥५१॥ सत्त्वसंगादृषीन्देवान्रज
सासुरमानुषान् ॥ तमसा भूततिर्यक्त्वं भ्रामितो याति कर्मभिः ॥५२॥ नृत्यतो गायतः पश्यन्यथैवानुकरोति तान् ॥ एवं
बुद्धिगुणान्पश्यन्ननीहोऽप्यनुकार्यते ॥५३॥ यथांभसा प्रचलता तरवोऽपि चला इव ॥ चक्षुषा भ्राम्यमाणेन दृश्य
ते भ्रमतीव भूः ॥५४॥ यथा मनोरथधियो विषयानुभवो मृषा ॥ स्वप्नदृष्टाश्च दाशार्ह तथा संसार आत्मनः ॥५५॥
अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ॥ ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥५६॥ राम

जले प्रतिबिंबिता वा चंचला इवेति विषयध्यानेकेन मनसा परिकल्पिता एवं तेषु लावण्यादयो गुणा न वस्तुतः संति अतो मनोनिबंधन
एव संसार इत्यभिप्रेत्य ग्राहक गुणग्राहे वा भासं तत्र दृष्टांतमाहुः च द्वयेति ॥५४॥ भोगस्यापि मिथ्यात्वे दृष्टांतमाह यथेति ॥ यथा ए
ताः पुंसि ज्ञा मनोरथधियः स्वप्नदृष्टाश्च धियो यथा एवमात्मनो विषयानुभवः संसारो मृषा ॥५५॥ ननु यदि मृषा तर्हि किं तन्निवृ
त्तिश्रमेण तत्राह ॥ अर्थे हीति ॥ अस्यात्मनः ॥५६॥ राम राम राम

राम ५४ ९७

अतो भोगोद्यमो न कर्तव्य इत्याह तस्मादिति ॥५७॥ दुःखप्रतीकारोद्यममपि परित्यज्य परमेश्वरनिष्ठेनैव भाव्यमित्याह द्विषद्भिरिति द्वाभ्यां
क्षिप्तः आक्षिप्तः नुन्न इति वा उपलक्षितः ॥५८॥ निष्ठ्युतः निष्ठीवनविषयीकृतः मूत्रितः मूत्रेणार्द्रीकृतः प्रकंपितः परमेश्वरनिष्ठीनः प्रच्यावि
तोपि कृच्छ्रगतः कष्टप्राप्तोपि तदा धैर्यमवलंब्यात्मनात्मानमुद्धरेत् श्रीनारायणं स्मरेदित्यर्थः ॥५९॥ एवं त्वदुक्तं यथावदनुबुध्येयं तथा

तस्मादुद्धव मा स्वस्य विषयानसदिंद्रियैः ॥ आत्माग्रहणनिर्भातं पश्य वैकल्पिकं भ्रमं ॥५७॥ द्विषद्भिरवमानितो सद्भिः
प्रलब्धोसूयितोथवा ॥ ताडितः सन्निरुद्धो वा वृत्त्या वा परिहापितः ॥५८॥ निष्ठ्युतो मूत्रितो वाज्ञैर्बहुधैवं प्रकंपितः ॥
श्रेयस्कामः कृच्छ्रगत आत्मनात्मानमुद्धरेत् ॥५९॥ उ व वा ॥ यथैवमनुबुध्येयं वद नो वदतां वर ॥ सुदुःसह
मिमं मन्ये आत्मन्यसदतिक्रमं ॥६०॥ विदुषामपि विश्वात्मन्प्रकृतिर्हि बलीयसी ॥ ऋते त्वद्धर्मनिरतान्शांतांस्ते च
रणालयान् ॥६१॥ श्री ग ते ह ना ए द स्कं ॥ भगवदुद्धवसंवादे ॥ विं ध्या ॥२२ राम

नः सर्वान्प्रति वदेः ॥६०॥ त्वद्धर्मनिरतान्विना ते विदुषामपि असद्भिः कृतमतिक्रममपराधं सुदुःसहं मन्ये इत्यन्वयः प्रकृतिः स्वभावः ॥६१॥
निरस्तसर्वसंदेहायानेकीकृत्य स्वदर्शनं ॥ प्रकाशितरहस्याय भजाम्युद्धवमीश्वरं ॥१॥ इ श्री ग ते का श धे विं ध्या
२२॥ राम राम ॥ राम राम राम राम

ने

श्री
भा०टी०
११
९५
५८

त्रयोविंशे तितिक्षारसदुपायई र्यते ॥ भिक्षुगीताप्रकारेण मनसः संयमो धिया ॥१॥ दुर्जनोपद्रवोनंतं दुःसहोपि मनीयसां ॥ अत्र भिक्षुर्भि
रध्यायैः सदुपायवर्णनं ॥ न तथेत्यावदस्मिन्नध्याये भिक्षुगीतया मनोविजयः ३ तत्रपुरुषप्रकृति विवेकः तदुत्तरस्मिन्गुणत्रयविजयः त
तः परस्मिन्नैलगीतया विषयसंगत्यागेन सत्संगश्चेति क्रमेणोपाया भगवता वर्णिताः ॥ आशंसितः प्रार्थितः भृत्यस्य वचः सत्कुर्वन् ॥
भृत्यं प्रति आबभाषे ॥१॥ न तथेत्यावदंगीकारेणेत्तद्वचः संपूजयति द्वाभ्यां ॥ हे बार्हस्पत्य बृहस्पतेः शिष्य ॥ अत्र लोके स साधुर्नास्ति यो दुर्ज

श्री शु उ ॥ स एवमाशंसित उद्धवेन भागवतमुख्येन दाशार्हमुख्येन ॥ सभाजयन्भृत्यवचो मुकुंदस्तमाबभाषे श्र
वणीयवीर्यः ॥१॥ श्री भ उ च ॥ बार्हस्पत्य न सोस्त्यत्र साधुर्वै दुर्जनेरितैः ॥ दुरुक्तैर्भिन्नमात्मानं यः समाधातु
मीश्वरः ॥२॥ न तथा तप्यते विद्धः पुमान्बाणैस्तु मर्मगैः ॥ यथा तुदंति मर्मस्था ह्यसतां परुषेषवः ॥३॥ कथयंति म
हत्पुण्यमितिहासमिहोद्धव ॥ तमहं वर्णयिष्यामि निबोध सुसमाहितः ॥४॥ केनचिद्भिक्षुणा गीतं परिभू
तेन दुर्जनैः ॥ स्मरता धृतियुक्तेन विपाकं निजकर्मणां ॥५॥ राम राम

नोक्तैर्भिन्नं दुःखितं मनः समाधातुमीश्वरः स्यात् ॥२॥ कुतस्तत्र आह न तथेति ॥ यथा मर्मस्था मर्मस्वेव नित्यं स्थिताः परुषोक्तिरू
पा इषवः तुदंति व्यथयंति तथाहि तरे बाणा न तुदंति अतस्तैर्न तथा तप्यते इत्यर्थः ॥३॥ तथापि दुःसमाणेभ्युपायैः सर्वे सोढुं शक्यं इत्य
भिप्रायेणेतिहासमाहेति ॥ महत्पुण्यं यथा भवति तथा पुण्यमिति इतिहासं गाथां कथयंति ॥४॥५॥ राम

राम
९५
५८

स तु भिक्षुः पूर्वं धनाढ्यः कष्टार्जितस्य धनस्य नाशेन संतप्यमानो निर्विण्णः सन्प्रव्रज्य भिक्षामटन् दुर्जनैः परिभूतः प्रशान्तेनोपयोगिनीं गा
थामगायत् तेनिर्विण्णं तस्य चरितमाह अवंतिष्वित्यादिना ॥ अवंतिषु मालवेषु वार्ता कृषिवाणिज्यादिरूपा वृत्तिर्यस्य कदर्यस्तु स्मृता
त्मकः ॥ आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयन् ॥ देवतातिथिभृत्यांश्च स कदर्य उतिस्मृत इति ॥ ६ ॥ तस्य ज्ञातयो बांधवाः अतिथयो धु

अवंतिषु द्विजः कश्चिदासीदाढ्यतमः श्रिया ॥ वार्तावृत्तिः कदर्यस्तु कामी लुब्धोतिकोपनः ॥ ६ ॥ ज्ञातयोतिथयस्तस्य वाङ्मात्रे
णापि नार्चिताः ॥ शून्यावसथ आत्मापि काले कामैर नर्चितः ॥ ७ ॥ दुःशीलस्य कदर्यस्य द्रुह्यंते पुत्रबांधवाः ॥ दारा दुहितरो भृ
त्या विषण्णा नाचरन्प्रियं ॥ ८ ॥ तस्यैवं यक्षवित्तस्य च्युतस्योभयलोकतः ॥ धर्मकामविहीनस्य चुक्रुधुः पंचभागिनः ॥ ९ ॥
तदवध्यानविस्रस्तपुण्यस्कंधस्य भूरिद ॥ अर्थोप्यगच्छन्निधनं बह्वायासपरिश्रमः ॥ १० ॥ ज्ञातयो जगृहुः किंचित्किंचिद्दस्य
व उद्धव ॥ दैवतः कालतः किंचिद्ब्रह्मबंधोर्नृपार्थिवात् ॥ ११ ॥ स एवं द्रविणे नष्टे धर्मकामविवर्जितः ॥ उपेक्षितश्च स्वजनैश्चिं
तामाप दुरत्ययां ॥ १२ ॥ तस्यैवं ध्यायतो दीर्घं नष्टरायस्तपस्विनः ॥ खिद्यतो बाष्पकंठस्य निर्वेदः सुमहानभूत् ॥ १३ ॥

नीनाश्वनेन नार्चिता इत्यर्थः शून्यावसथो धर्महीने गृहे ॥ ७ ॥ यक्षाणां वित्तमिव केवलं संरक्षणीयं वित्तं यस्य पंचभागिनः पंचयज्ञदेवताः
॥ ९ ॥ एतेषामवध्यानमनादरः तेन विस्रस्तो विशीर्णः पुण्यस्य स्कंधः अर्थलाभमात्रे हेतुः श्रमो यस्य तस्य बह्वायासैः कृष्यादिभिः केव
लं श्रमो यस्मिन् सः ॥ १० ॥ अतो निधनमगच्छत् तत्राह ज्ञातय इति ॥ दैवतः गृहदाहादिना कालतः निक्षेतं धान्यादि नृपात्पार्थिवान्नो च
हैकं तस्मात् ॥ ११ ॥ नष्टरायः नष्टा रायोर्था यस्य तस्य नष्टधनस्येत्यर्थः ॥ १३ ॥ राम राम

५

मेमयात्मा आत्मा देहः शुच्यैवात्मानुतापनं प्रपंचयति न धर्मायेत्यादिना यस्येह शोकायासः ते नु मया ॥१४॥ नरकाय च सत्यप्यर्थे धर्मो न तु स्या
नाद्य ॥१५॥ श्वित्रः श्वेतकुष्ठं ॥१६॥ सिद्धेप्यर्थे तस्योत्कर्षे संवर्धनेनाशोपभोगयोः द्वंद्वैक्यं नाशे उपभोगे चेत्यर्थः साधनोत्कर्षयोरायासः
तत्र त्रासः चिंता च नाशे भ्रमः इति ॥१७॥ किंच अर्थे प्राप्ते ये स्तेयादयः पंचदशानर्थाः प्राप्नुवंति अस्मयाद योर्व्यसनैः सह व्यसनानि स्त्रीद्यू

स चाहमदोरूपं हृष्यात्मा मे नुतापितः ॥ न धर्माय न कामाय यस्यार्थायासई दृशः ॥१६॥ प्रायेणार्थाः कदर्याणां न सुखा
य कदाचन । इह चात्मोपतापाय मृतस्य नरकाय च ॥१७॥ यशो यशस्विनां शुद्धं श्लाघ्या ये गुणिनां गुणाः ॥ लोभः स्व
ल्पोपि तान् हंति श्वित्रो रूपमिवेप्सितं ॥१८॥ अर्थस्य साधने सिद्धे उत्कर्षे रक्षणे व्यये । नाशोपभोग आयासस्त्रासश्चिंता
भ्रमो नृणां ॥१९॥ स्तेयं हिंसानृतं दंभः कामः क्रोधः स्मयो मदः ॥ भेदो वैरमविश्वासः संस्पर्धा व्यसनानि च ॥२०॥ एते पं
चदशानर्था ह्यर्थमूला मता नृणां ॥ तस्मादनर्थमर्थाख्यं श्रेयोर्थी दूरतस्त्यजेत् ॥२१॥ भिद्यंते भ्रातरो दाराः पितरः
सुहृदस्तथा ॥ एकास्निग्धाः काकिणिना सद्यः सर्वेरयः कृताः ॥२॥ अर्थेनाल्पीयसा ह्येते संरब्धा दीप्तमन्यवः ॥ त्यजंत्याशु
स्पृधो घ्नंति सहसोत्सृज्य सौहृदं ॥२१॥ लब्ध्वा जन्मामरैः प्रार्थ्यं मानुष्यं तद्द्विजाग्र्यतां । तदनादृत्य ये स्वार्थं घ्नंति यांत्यशुभां
गतिं ॥२२॥

तमस्य विषयाणि ॥१९॥ भेदो वैरस्पर्धाः प्रपंचयति द्वाभ्यां ॥ भिद्यंते स्नेहं त्यजंति किंच पृथक्भूताः एकास्निग्धाः एकाएकस्मात् तेन ते आस्निग्धाः
अतिप्रिया इत्यर्थः कृतः काकिणिना पुरुषमार्थेषु केकणीकाकिनी वराटिके तियादव ॥२॥ तथा संरब्धाः हविताः स्पृधः स्पर्धमानाः ॥२१॥
इत्नृत्व वदर्थे निष्ठानां तेनर्थाः परलोकेप्यनर्था एव तेषामित्याह लब्ध्वेति त्रिभिः ॥ मानुष्यं जन्म तत्रापि द्विजाग्र्यतां ब्रह्मत्वं ब्राह्मण्यं स्वार्थं

अमरप्रार्थनां दर्शयन्नाह स्वर्गेति ॥ लोकं देहम् अनुषज्जेत आसक्तिं कुर्यात ॥ २३ ॥ ऋषयो मनुष्याय ज्ञ ब्रह्मयज्ञयोः देवता देवपितृभूतानि इतरेषु ज्ञातयः सगोत्राः बांधवा विवाहादिना संबंधाः तान् अन्यांश्च भागिनः भागार्हान् आत्मानं चासंविभज्य अन्नादिभिरसंतर्प्य ॥ २४ ॥ एवं विमृश्य पश्चात्तप्यमानत्वाद् ॥ व्यर्थयार्थेच्छया प्रमत्तस्य मम वित्तादिगतम् इति शेषः ॥ येन चित्तादिना कुशला विवेकिनः सिद्धिं निर्मुच्यंति जरठो वृद्धः ॥ २५ ॥ अन्यदपि स्वसदृशशोचति ॥ कस्मादेवमनर्थे विद्वानपि संक्लिश्यते कारणं संभावयति कस्यचिदिति ॥ २६ ॥ नेतुनाम

स्वर्गापवर्गयोर्द्वारं प्राप्य लोकमिमं पुमान् ॥ द्रविणे को नुषज्जेत मर्त्योऽनर्थस्य धामनि ॥ २३ ॥ देवर्षिपितृभूतानि ज्ञातीन्बंधूंश्च भागिनः ॥ असंविभज्य चात्मानं यक्षवित्तः पतत्यधः ॥ २४ ॥ व्यर्थयार्थेहया वित्तं प्रमत्तस्य वयो बलं ॥ कुशला येन सिद्ध्यंति जरठः किं नु साधये ॥ २५ ॥ कस्मात्संक्लिश्यते विद्वान्व्यर्थयार्थेहयासकृत ॥ कस्यचिन्मायया नूनं लोकोऽयं सुविमोहितः ॥ २६ ॥ किं धनैर्धनदैर्वा किं कामैर्वा कामदैरुत ॥ मृत्युनाग्रस्यमानस्य कर्मभिर्वोत जन्मदैः ॥ २७ ॥ नूनं मे भगवांस्तुष्टः सर्वदेवमयो हरिः ॥ येन नीतो दशामेतां निर्वेदश्चात्मनः प्लवः ॥ २८ ॥ सोहं कालावशेषेण शोषयिष्येंगमात्मनः ॥ अप्रमत्तोऽखिलस्वार्थे यदि स्यात्सिद्ध आत्मनि ॥ २९ ॥ राम राम राम

यं मोहितः संक्लिश्यते किं तु धनादिभिः भोगादिकिं वा दत्ताभ्याम् [illegible] किं धनैरिति ॥ उत पुनरपि ॥ २७ ॥ इदानीं संपन्नविवेकः सन्हृष्यन्नाह नूनमिति त्रिभिः ॥ येन प्रीतेनात्मनः प्लवरूपो निर्वेद अनुभवति स हरिर्मे नूनं प्रीत इति ॥ २८ ॥ अंगं शोषयिष्ये तपसा यद्वा वियवालंघनेन यानि यदि स्यात्कालावशेषः तदात्मन्येव सिद्धः तुष्टः सन् अखिलस्वार्थे धर्मादिसाधने अप्रमत्तः सन् ॥ २९ ॥ राम

श्री
भागी
९
८७
१००

अनुमोदेरननुगुरुहंत ॥ ननु देवैरनुमोदितोपि जरद्‌ः स्वल्पेन कालेन किं साधयिष्यामि तत्राह मुहूर्तेनेति ॥ ३॰ ॥ अभिप्रेत्य तिष्ठित्य आवंत्यः अवंति देशभवः स्वदयग्रंथीन् अहंकारममकारादीन् ॥ ३१ ॥ असंगः आसक्तिमन्यः अलक्षितः भ्रमन् ॥ अतोनयत् ॥ ३२ ॥ प्रवयसंहृदमवधूतं मलिनं पर्यभवन् अवमेनिरे देभइप भित्तिमिस्त्विभस्कारैः ॥ ३३ ॥ परिभवानेव दर्शयति केचिदिति सप्तभिः भोभागवत

तत्र मामनुमोदेरन्देवा स्त्रिभुवनेश्वराः ॥ मुहूर्तेन ब्रह्मलोकं त्वहं गः समसाधयत् ॥ ३॰ ॥ श्री ग नु च ॥ इत्यभिप्रेत्य मनसा ह्यावंत्यो द्विजसत्तमः ॥ उन्मुच्य हृदयग्रंथीञ्छांतो भिक्षुरभून्मुनि ॥ ३१ ॥ स चचारमहीमेतां संयतात्मेंद्रियानिलः ॥ भिक्षार्थं नगरग्रामानसंगो लक्षितो विशत् ॥ ३२ ॥ तं वै प्रवयसं भिक्षुमवधूतमसज्जनाः ॥ दृष्ट्वा पर्यभवन्भद्र बह्वीभिः परिभूतिभिः ॥ ३३ ॥ केचित्त्रिवेणुं जगृहुः केचित्पात्रं कमंडलुं ॥ पीठं चैके क्षसूत्रं च कंथां चीराणि केचन ॥ प्रदाय च पुनस्तानि दर्शितान्याददुर्मुनेः ॥ ३४ ॥ अन्नं च भैक्ष्यसंपन्नं भुंजानस्य सरित्तटे ॥ मूत्रयंति च पापिष्ठाः ष्ठीवयंति चमूर्धनि ॥ ३५ ॥ यतवाचं वाचयंति ताडयंति न वक्ति चेत् ॥ तर्जयंत्यपरे वाग्भिः स्तेनोयमिति वादिनः ॥ ३६ ॥ बध्नंति रज्ज्वा तं केचिद्बध्यतां बध्यतामिति ॥ क्षिपंत्येके वजानंति एष धर्मध्वजः शठः ॥ ३७ ॥ क्षीणवित्त इमां वृत्तिमग्रहीत्स्वजनोज्झितः ॥ अहो एष महासारो धृतिमान्गिरिराडिव ॥ ३८ ॥ मौनेन साधयत्यर्थं बकवद्दृढनिश्चयः ॥ इत्येके वि

हसंत्यैतिदर्शितानि संति प्रदाय पुनस्वाददुः ॥ ३४ ॥ अन्नेसूत्रयंति मूर्धनि ष्ठीवयंति पूत्कारेण श्लेष्माणं क्षिपंति च ॥ ३५ ॥ क्षिपंति निंदंति निंदामेवाह एष धर्मध्वजस्त्रिदंडलिंगोपजीवी शठो लोकवंचकः ॥ ३७ ॥ तदेवाहुः क्षीणवित्त इति ॥ ३८ ॥ महासारः अतिबली ॥ ३८ ॥ दुर्वांतयंति तं उपर्यधो वर्तमं चंति ॥ ३९ ॥

एप
८७
१००

वा

बबंधुः शृंखलैर्निरुरुधुः कारागृहे दिग्गु द्विजं शुकशारिकादियथा ॥४०॥ भौतिकं दुर्जनादिकं दैहिकं ज्वरादिनिमित्तं दैविकं शीतोष्णादि
दिष्टं दैवप्राप्तं ॥४१॥ धर्मात्पातयद्भिः परिभूतोऽपि सात्विकीं धृतिमास्थाय स्वधर्म एव स्थितः इमां वक्ष्यमाणां गाथामगायत सात्विकी
धृतिश्च ॥ धृत्या यया धारयते मनःप्राणेंद्रियक्रियाः ॥ योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्विकी इति स्मृतेः ॥४२॥ नायं मे वा सुखदुःख
हेत्वाकीं गाथामाह नायमिति ॥ अयं जनो विप्रो देवता इंद्रादि आत्मा देहः ग्रहाः सूर्यादयः कर्म पुण्यापुण्यात्मकं कालश्चैते

तं बबंधुर्निरुरुधुर्ये पाक्रीडनकं द्विजं ॥४०॥ एवं स भौतिकं दुःखं दैविकं दैहिकं च यत् ॥ भोक्तव्यमात्मनो दिष्टं प्राप्तं प्रा
प्तमबुध्यत ॥४१॥ परिभूत इमां गाथामगायत नराधमैः ॥ पातयद्भिः स्वधर्मस्थो धृतिमास्थाय सात्विकीं ॥४२॥
ब्रा ण वा नायं जनो मे सुखदुःखहेतुर्न देवतात्मा ग्रहकर्मकालाः ॥ मनः परं कारणमामनंति संसारचक्रं
परिवर्तयेद्यत् ॥४३॥ मनो गुणान्वै सृजते बलीयस्ततश्च कर्माणि विलक्षणानि ॥ शुक्लानि कृष्णान्यथ लोहि
तानि तेभ्यः सवर्णाः सृतयो भवंति ॥४४॥ राम राम राम

मे सुखदुःखहेतवो न भवंति न चात्मा नापि ग्रहादयः मनः परं केवलं सुखदुःखयोः कारणं वदंति मनसा ह्येव पश्यति मनसा शृणो
तीत्यादि श्रुतेः ॥४३॥ परिवर्तनप्रकारमेवाह मन इत्यादि ॥ गुणान्गुणवृत्तीः सृजति ततश्च तेभ्यो गुणेभ्यः शुक्लानि सात्विकानि कृ
ष्णानि तामसानि लोहितानि राजसानि सवर्णाः तत्कर्मानुरूपाः सृतयः देवतिर्यङ्नरादिगतयः ॥४४॥ राम

तर्हि मनसएवसंसारःस्यान्नात्मनइत्याशंक्याह अनीहइति ॥ अयमर्थः अविद्ययामनोऽध्यासेनेयमात्मनःसंसृतिःनतुस्वतोयतस्त
इदृशस्येश्वरस्यसानास्तिकिंतुमनइतोजीवस्यैवेतितदेतदाह ॥ मनसासमीहमानेनसहनियंतृत्वेनवर्तमानोऽपिपरमात्माऽनीहःत
त्क्रियासंगरहितःयतोहिरण्मयःविद्याशक्तिप्रधानःउक्तःयतोमत्सखोममजीवस्यसखानियंताअतउतउच्चैर्विचष्टे ॥ अनिरोधि
तज्ञानेनकेवलंपश्यतीत्यर्थः असौपुनरहंजीवःस्वलिंगंस्वस्मिन्नात्मनिलिंगयतियोजयतिसंसारमितितेनयातन्मनःपरिगृह्यआ
त्मत्वेनस्वीकृतस्यमनसोगुणैःकर्मभिःसंगतःसंबद्धोगुणसंगाद्वाकामान्जुषन्निबद्धइति ॥४४॥ अतोमनोनिग्रहएवकृतेसर्वंकृतं

अनीहआत्मामनसासमीहताहिरण्मयोमत्सखउद्विचष्टे ॥ मनःस्वलिंगंपरिगृह्यकामान्जुषन्निबद्धोगुणसंगतोसौ ॥४५॥
दानंस्वधर्मोनियमोयमश्चश्रुतंचकर्माणिचसद्व्रतानि ॥ सर्वेमनोनिग्रहलक्षणांताःपरोहियोगोमनसःसमाधिः ॥४६॥
समाहितंयस्यमनःप्रशांतंदानादिभिःकिंवदतस्यकृत्यं ॥ असंयतंयस्यमनोविनश्यद्दानादिभिश्चेदपरंकिमेभिः ॥४७॥

स्यात्तंविनातुसर्वंव्यर्थमित्याहदानमितिद्वाभ्यां ॥ स्वधर्मोनित्यनैमित्तिकःसद्व्रतान्येकादश्युपवासादीनिअन्यानिचयावंतिकर्माणि
तेसर्वेउपायाःमनोनिग्रहलक्षणाःअंतोनिष्ठाफलंयेषांतेतथाननुज्ञानांगत्वेनैषांप्रसिद्धेस्तत्राहमनसःसमाधिर्निग्रहएवपरोयोगो
ज्ञानंज्ञेयमित्यर्थः ॥४६॥ अतोयस्यमनःसमाहितंभवतितस्यकिंकृत्यमस्तिवदेतिपरंप्रत्युपदिशन्निवस्वयमेवाह ॥ असंयतंविक्षि
प्तंचेत्यद्वाविनश्यदालस्यादिनानीयमानंचेद्भवेत् ॥ तर्हिएभिर्दानादिभिःकिमपरंप्रयोजनंस्यान्नकिंचिदित्यर्थः ॥४७॥

नन्वितरेंद्रियजयः प्रयोजनं स्यान्नेत्याह मनोवश इति ॥ देवा इंद्रियाणि तदधिष्ठातारो वा भीष्मः योगिनामपि भयंकरो मनोलक्ष
णो देवः कुतः सहसः बलादपि बलिनो वा सहीयान् बलीयान् अतस्तं यो वशवर्तिनं कुर्यात्स एव देवः सर्वेंद्रियजेता भवति नान्यः
तथा च श्रुतिः ॥ मनसो वशे सर्वमिदं बभूव नान्यस्य मनो वशमन्वियाय ॥ भीष्मो हि देवः सहसः सहीयानिति ॥ ४७ ॥ अतो असह्या
रागादयो वेगा यस्य तं अत एव अरुंतुदं मर्ममिं तं तुदति व्यथयतीत्यरुंतुदं तं नेति केचन तं न विजित्य अजित्वा ये केचिन्मर्त्यैः कैश्चि
दसद्विग्रहं कुर्वंति तत्र च वानुकूलप्रतिकूलादीनन्यान्मित्रादीन्कुर्वंति ते मूढा इत्यर्थः ॥ ४८ ॥ न तस्मात्ते अनेन प्रकारेण संसारे भ्रमंतीत्या

मनोवशेऽन्ये ह्यभवन्स्म देवा मनश्च नान्यस्य वशं समेति ॥ भीष्मो हि देवः सहसः सहीयान्युंज्याद्वशे तं स हि देवदेवः ॥ ४७ ॥
तं दुर्जयं शत्रुमसह्यवेगमरुंतुदं तं न विजित्य केचित् ॥ कुर्वंत्यसद्विग्रहमत्र मर्त्यैर्मित्राण्युदासीनरिपून्विमूढाः ॥ ४८ ॥
देहं मनोमात्रमिमं गृहीत्वा ममाहमित्यंधधियो मनुष्याः ॥ एषोऽहमन्योऽयमिति भ्रमेण दुरंतपारे तमसि भ्रमंति ॥ ५० ॥ राम
जनस्तु हेतुः सुखदुःखयोश्चेत्किमात्मनश्चात्र हि भौमयोस्तत् ॥ जिह्वां क्वचित्संदशति स्वदद्भिस्तद्वेदनायां कतमाय कुप्येत् ॥ ५१ ॥

ह देहमिति ॥ मनोमात्रपरिकल्पितमिमं स्वदेहमहमिति पुत्रादिदेहं च ममेति स्वीकृत्य तमसि संसरंति ॥ ५० ॥ तदेवं मनस एव सुखदुःखकारण
त्वमुपपाद्येदानीं जनादीनां सुखादिकारणत्वं प्रपंचयति जनस्त्विति षड्भिः ॥ अत्र चास्मिन्पक्षे आत्मनः किं न किंचित्सुखदुःखकर्तृत्वं न तत्क
र्तृत्वं चेत्यर्थः कुत इत्यत आह निश्चितं भौमयोः भूविकारयोः देहयोस्तत् तस्मात् आत्मनः असंगतस्याक्रियस्य च हननादिषु कर्मसु कर्तृत्वानुपपत्तेः ॥
तथापि दुःखमात्मपर्यवसाय्येवेति चेदेवमपि परमात्मन उभयत्राप्येकत्वात् न कोऽपि विषयोऽस्तीति स्वदृष्टांतेन दर्शयति जिह्वामिति ॥ ५१ ॥

यदि देवताः अस्तु नाम तत्रापि पक्षे आत्मनः किं यतो विकारयोः विक्रियमाणयोर्देवतयोस्तत्दुःखं तेन म्रुवे सिद्धं तेनैव बाहुः स्वदेहे नरः रक्ति मानिनोर्वह्नीन्द्रयोर्देवतत्वेन विक्रियस्यानन्दं कारस्य चात्मनः देवतानां च सर्वदेहेष्वभेदात्तेन कोपविषयो नास्तीति स्वदेहदृष्टांतमाह यदीति यद्यदंगं देवताधिष्ठानं हस्तमुखादिकं तत्स्वपूर्वत्वेन देवतानधिष्ठानरूपमविकारदंतोदाहरणं ॥ ५१ ॥ आत्मनः सुखदुःखयोर्हेतुत्वपवि णामः स एव हेतुः यदि स्यात्तत्र तस्मिन्पक्षे अन्यतः किं न किंचिदन्यतो भवति यस्मै क्रुध्येतेत्यर्थः यतो निजस्वस्वभावः न त्वात्मनः

दुःखस्य हेतुर्यदि देवतास्तु किमात्मनस्तत्र विकारयोस्तत् ॥ यदंगमंगेन निहन्यते क्वचित्क्रुध्येत कस्मै पुरुषः स्वदेहे ॥ ५२ ॥
आत्मा यदि स्यात्सुखदुःखहेतुः किमन्यतस्तत्र निजस्वभावः ॥ न ह्यात्मनोन्यद्यदि तन्मृषा स्यात्क्रुध्येत कस्मान्न सुखं न दुःखं ॥ ५३ ॥
ग्रहा निमित्तं सुखदुःखयोश्चेत्किमात्मनो जस्य जनस्य ते वै ॥ ग्रहैर्ग्रहस्यैव वदंति पीडां क्रुध्येत कस्मै पुरुषस्ततोन्यः ॥ ५४ ॥

परिणामोन्यनिमित्तेनो भवति अतो नास्ति कोपविषय इति चेत्तत्राह नहीति आत्मव्यतिरिक्तं नास्त्येव यदि स्यात्तदसत्यमिति प्रतीयेत तत्र हि तन्मृषैवेत्य न स्वकस्माद्धेतोः क्रुध्येत यतो नास्ति निमित्तेन च दुःखं सुखं वेत्यर्थः ॥ ५३ ॥ ग्रहपक्षेप्यजस्यात्मनः किं यतः जन्यत इति जनो देहः तस्यैव जन्म लग्नापेक्षया द्वादशराशिस्थग्रहात्सुखदुःखयोर्निमित्तं भवंति किंचान्तरिक्षस्थैर्ग्रहैः तत्स्थस्यग्रहस्यैव पादाधीदिदृष्ट्यादिभिर्ग्रहैः पीडां वदंति दैवज्ञाः न तु शरीरकोणादिषु स्थितस्य तद्दृष्टिगोचरस्य पुरुषस्य ग्रहरूपेणैव तत्पीडा तल्लक्षणोत्पन्ने देहे तत्साभिमानाद्भवति अतः पुरुषस्त

ग

कर्म देहश्चेदस्ति तस्य सुखोपगमः कर्मैव नास्ति अनन्तस्य देहं तु तु मिति तदाह हि यस्मात् तत्कर्म एकस्य जडाजडत्वे सति स्याज्जडत्वाद्धि कारित्वोपप
त्तेः अजडत्वाच्च हितानुसंधानतः प्रवृत्तिसंभवात् अचिज्जडो देहः अनन्तस्य प्रवृत्तिर्न संभवति पुरुषस्तु सुपर्णः प्रबुद्धज्ञानस्य अतः कस्मै कु
ध्येन यतः सुखदुःखयोः कर्मैव मूलं भूतं नास्तीति ॥ ५५ ॥ तत्र कालपक्षेप्यात्मनः किंचनेत्यसौ कालात्मक एव ब्रह्मांशत्वात् स्वांशस्य सुतः
पीडा नास्तीत्यत्र दृष्टांतः नाग्नेर्दीप्तो न तदंशस्य ज्वाला देहलोपो दाहो नाशोस्ति तत्रोपाधिस्थ तत्काष्ठांशदाहत्वाशः स्यादिति दृष्टांतमाह ॥ हिम

कर्मोत्थदेहः सुखदुःखयोश्च किमात्मनस्तद्धि जडाजडत्वे ॥ देहस्त्वनित्यः सुखदो यस्तु वर्णः कुध्येन कस्मै नहि कर्म मूलं ॥ ५६ ॥
कालस्य देहः सुखदुःखयोश्च किमात्मनस्तत्र तदात्मकोसौ ॥ नाग्नेर्हि तापो न हिमस्य तत्स्यात् कुध्येन कस्मै न परस्य द्वंद्वं ॥ ५७ ॥
न केन चित्क्वापि कथंचनास्य द्वंद्वोपरागः परतः परस्य ॥ यथाहमः संहतिरूपिणः स्यादेवं प्रबुद्धो न बिभेति मृत्यैः ॥ ५८ ॥

स्यात्तत्वैत्यं तदंशस्य तुषारकणस्य नाशकं स्यादित्यर्थः ॥ किं चास्तामंशत्वं वस्तुतः परस्यायं परस्य द्वंद्वं सुखदुःखादिकं नास्तीति ॥ ५६
न देवं घटे नेहेन वः प्रसिद्धा निरस्ताः यदि कश्चिद्धेतुत्वेन सम्बन्धावयेन तत्तदपि वस्तु महिमावेशात्ययं न संभवतीत्याह न केन चिदिति ॥ नन्वपरा
त्मः कथमपह्नूयते तत्राह यथेति संहति मद्भियमाना मेव रूपयति प्रकाशयतीति तथा तस्या हमः अहंकारस्य यथा स्यात् तथा प्रकृ
तेः परस्यात्मनो द्वंद्वसंबंधः अहंकारनिमित्तोसौ न वास्तव इत्यर्थः एवं प्रबुद्धोयः स मृत्यैः ह्रत्वा न बिभेति न भयमन्यत्र कुत्रापि प्राप्नोती
त्यर्थः ॥ ५७ ॥

अहमप्यनयैव परमात्मनि निष्ठया तरिष्यामीत्याह एतामिति ॥ सोहमित्यन्वयः नन्वियं निष्ठैव कथं भवेत्तत्राह मुकुंदेति ॥ ५५ ॥ प्रस्ता
वेन सहनगाथार्थं संक्षेपतो दर्शयति द्वाभ्यां ॥ इत्थं नष्टद्रविणो निर्विण्णगतक्लमः प्रव्रज्य गां पर्यटन्नसद्भिर्निराकृतोपि स्वधर्मादकंपितः
सन्मुनिरहं गाथामगायतेत्यर्थः ॥ ५७ ॥ मित्रोदासीनरिपवः सर्वेपि च संसारस्तमसः अज्ञानत आत्मनो मनसो विभ्रममात्रकृतः ॥

एतां स आस्थाय परात्मनिष्ठामध्यासितां पूर्वतमैर्महर्षिभिः ॥ अहं तरिष्यामि दुरंतपारं तमो मुकुंदांघ्रिनिषेवयैव ॥ ५५ ॥
श्री ग उ च ॥ निर्विद्य नष्टद्रविणो गतक्लमः प्रव्रज्य गां पर्यटमान इत्थं ॥ निराकृतोसद्भिरपि स्वधर्मादकंपितो मु
नुनिराह गाथां ॥ ५७ ॥ सुखदुःखप्रदो नान्यः पुरुषस्यात्मविभ्रमः ॥ मित्रोदासीनरिपवः संसारस्तमसः कृतः ॥ ५८ ॥ तस्मात्स
र्वात्मना तात निगृहाण मनो धिया ॥ मय्यावेशितया युक्त एतावान्योगसंग्रहः ॥ ५९ ॥ य एतां भिक्षुणा गीतां ब्रह्मनिष्ठां समा
हितः ॥ धारयञ्छ्रावयञ्छृण्वन्द्वंद्वैर्नैवाभिभूयते ॥ ६० ॥ इ श्री ग ते का श ॥ भिक्षुगीता ॥ म यो शो ध्य २३

नतान्विक इत्यर्थः ॥ ५८ ॥ उक्तं द्वंद्वसहनोपायमुपसंहरति तस्मादिति ॥ ५९ ॥ मनोनिग्रहस्याशक्तोप्येतत्कुर्वन्नादि निष्टः तत्फलं प्राप्नोती
त्याह य इति ॥ द्वंद्वैः सुखदुःखादिभिः ॥ ६० ॥ भिक्षुगीतामिषेण त्वमक्वचित्तगतोहरिः ॥ मोहनिद्रां हरन्भाति परमानंदरूपतः ॥ ६१ ॥
इ श्री ग ते का स्कं ११ यो शो यः ॥ २३ ॥ राम राम राम

चतुर्विंशतत्त्वसांख्येन मनो मोहनिवार्यते ॥ आत्मनः सर्वभावानामागमापायचिंतया ॥ स्वपरद्वंद्वमुक्तानामहं कृत्वाथ संयमं ॥ चि
तैस्तोत्क्षा पुनः कुलैः सांख्यमत्र कृतं ततो ॥ १ ॥ अद्वितीयात्परमात्मनो मायया प्रकृतिपुरुषद्वारा सर्वं द्वैतमुदेति पुनस्तत्रैव लीयते
इत्यनुसंधानस्य द्वंद्वभ्रमो निवर्तते इति चतुर्विंशसांख्यं प्रलोमेति अथेति ॥ सर्वैः कपिलादिभिर्विनिश्चितं वैकल्पिकं भेदनिमित्तं भ्रमं तत्त्व
त्वतः क्षोदिरूपं ॥ १ ॥ अथोशत्कः कार्त्स्न्ये ज्ञानं दृष्टा तेन दृश्यः कृत्स्नो यथा सर्वं अविकल्पितं विकल्पमन्यमेकमेव बुद्धौ एव लीनमा

श्री ग उ च ॥ अथ ते संप्रवक्ष्यामि सांख्यं पूर्वैर्विनिश्चितं ॥ यद्विज्ञाय पुमान्सद्यो जह्याद्वैकल्पिकं भ्रमं ॥ १ ॥ आसी
ज्ज्ञानमथो ह्यर्थ एकमेवाविकल्पितं ॥ यदा विवेकनिपुणा आदौ कृतयुगे युगे ॥ २ ॥ तन्मायाफलरूपेण केवलं निर्वि
कल्पितं ॥ वाङ्मनोगोचरं सत्यं द्विधा समभवद्बृहत् ॥ ३ ॥ तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका ॥ ज्ञानं त्वन्यतमो भा
वः पुरुषः सोभिधीयते ॥ ४ ॥ तमो रजः सत्त्वमिति प्रकृतेरभवन्गुणाः ॥ मयाप्रक्षोभ्यमाणायाः पुरुषानुमतेन च ॥ ५ ॥

मेव यत
सीदित्यर्थः कदेत्यपेक्षायामाह अथ युगेयुगेभ्यः पूर्वं प्रलय इत्यर्थः तथादौ कृतयुगे तस्मिन्नन्यदापि यदा विवेकनिपुणा जना भवंति त
दापि तेषां भेदास्फूर्तेः ॥ २ ॥ तद्बृहद्ब्रह्म वाङ्मनोगोचरं यथा भवति तथा मायायां दृश्यं फलं तत्प्रकाशः तद्रूपेण मायाविलासरूपेण च द्विधा स
त ॥ ३ ॥ तयोर्द्विधाभूतयोरंशयोर्मध्ये उभयात्मिका कार्यकारणरूपिणी ॥ ४ ॥ अभवन् अभिव्यक्ता बभूवुः ॥ मया परमेश्वरेण जीवादृष्टप्रयु
क्तया क्षोभ्यमाणायाः पुरुषानुमतेन च यदा स्वस्येव प्रकृतेरीक्षणरूपया पुरुषस्य स्यात् तदनुमतेन तद्द्वारेणेत्यर्थः ॥ ५ ॥ राम

श्री
भारी
ए
१०२
मतः २
१०४

सत्त्वं क्रियाशक्तिमात्रं महान् प्रथमो विकारस्ततो महान् ज्ञानशक्तिः तन्त्वयं महानेव प्रथमो विकारः प्रसिद्धः तत्राह सच ज्ञानक्रियागर्भत्वात्
सत्त्वेन संयुतः नय एकमेव तत्त्वं क्रियाज्ञानशक्तिभ्यां द्विधोच्यत इत्यर्थः विमोहनः जीवस्य भ्रमहेतुः स जातः ॥६॥ यतस्तन्मात्रादीनां कार
णं मनः शब्देन देवानामप्युपलक्षणं चिदचिन्मयः चिदाभासव्याप्तत्वात् ॥ उभयथापि रूपमिति जीवोपाधित्वं दर्शितं यद्यपि तन्मात्रादीनि तस्मा ए
दात्मनः आकाशः संभूत इत्यादिश्रुतेः अन्नमयं हि सोम्य इत्यादिश्रुतेश्च ॥ प्रथमं सृष्टानि जायन्ते तेभ्यः स्थूलं पंचीकृतेभ्यः प्राणादीनि क्रमेण दि
समष्ट्यात्मकं लिंगशरीरं पंचीकृतेभ्यश्च ब्रह्मांडं तस्मिन्नैव राजसत्वं तर्यामी लीलाविग्रहः क्षीराब्धिशायी श्रीनारायणस्तन्नाभिपद्मे च वैरा

तेभ्यः समभवत्सत्त्वं महान्सत्त्वेण संयुतः ॥ ततो विकुर्वतो जातो योऽहंकारो विमोहनः ॥६॥ वैकारिकस्तैजसश्च तामसश्चे
त्यहं त्रिधा ॥ तन्मात्रेंद्रियमनसां कारणं चिदचिन्मयः ॥७॥ अर्थस्तन्मात्रिकाज्जज्ञे तामसादिंद्रियाणि च ॥ तैजसा
द्देवता आसन्नेकादश च वैकृतात् ॥८॥ मया संचोदिता भावाः सर्वे संहत्यकारिणः ॥ अंडमुत्पादयामासुर्ममायतनमुत्
तमं ॥९॥

ड्रूपभोगविग्रहश्चतुराननः यतो यथावस्तरमन्त्येषां जीवानामाविर्भाव इति प्रक्रिया ॥ तथापि चिन्नाभिव्यक्तिस्सर्वेकोऽहंकारः ततोऽस्य
तेंद्रियादि व्यवहारः इत्येतावतामहदादिक्रमेण सृष्टिरुच्यते ॥ तथाचोक्तं ॥ मूलोऽदधविस्फुलिंगाद्यैः सृष्टिर्यन्नोदितान्यथा ॥७
पायः सोऽत्र नारायणनास्ति भेदः कथंचनेति ॥७॥ तस्माद्द्विविधा त्वहंकृतिप्ररूपा द्विविधप्रपंचोत्पत्तिं दर्शयति ॥ अर्थ इति ॥ तन्मात्रि
काद्भूतादितन्मात्रकारणात् तामसाद्द्वारात् अर्थो महाभूतरूपो जज्ञे ऽथ भूतानामावरणस्वभावत्वादिंद्रियाणि दश तैजसात्सा
जसात् तेषां प्रवृत्तिस्वभावत्वाद् वैकृतात् सात्त्विकात् देवतादिग्यानाकेऽत्र वेतोऽश्विवह्नीन्द्रोपेंद्रमित्रकाः ब्रह्मा चेंद्रश्चन्येकादश च श

[illegible] ॥८॥ [illegible]

राम
१०२
१०४

सलिलेसंस्थितिर्यस्यतत्सलिलसंस्थितिः तस्मिन्सलिलसंस्थितेऽण्डेनारायणरूपोलीलाविग्रहोऽसमभवंस्थितइत्यर्थः ॥ विश्वाख्यंलो
ककारणभूतंतत्रचात्मभूःस्वयंभूरात्मनःस्वरूपभोगविग्रहेणपुनर्देवाजस्तस्मिन्नाविर्भूतइत्यर्थः ॥१०॥ रजसायुक्तोमदनुग्रहात्तपसासृजत्
भूतलादिसद्वीपोभुवः अन्तरिक्षलोकः स्वः स्वर्गः ॥११॥ महर्लोकादेरुपलक्षणंलोकसृष्टिप्रयोजनमाह देवानामितिसार्धेन ॥ ओकोनि
वासः पदंस्थानं त्रितयात्परं महर्लोकादि भूमेरधः अतलादि ॥१२॥ एवंब्रह्मदस्यायांकारणमाहसार्धेन ॥ त्रिलोक्यांपातालादिसप्ततायां १३
१२

तस्मिन्नण्डेसमभवंमंडेसलिलसंस्थिते ॥ ममनाभ्यामभूत्पद्मंविश्वाख्यंतत्रचात्मभूः ॥१०॥ सोऽसृजत्तपसायुक्तोरजसाम
दनुग्रहात् ॥ लोकान्सपालान्विश्वात्माभूर्भुवःस्वरितित्रिधा ॥११॥ देवानामोकआसीत्स्वर्भूतानांचभुवःपदं ॥ मर्त्या
नांचभूर्लोकःसिद्धानांत्रितयात्परं ॥१२॥ अधोऽसुराणांनागानांभूमेरोकोऽसृजत्प्रभुः ॥ त्रिलोक्यांगतयःसर्वाःकर्म
णांत्रिगुणात्मनां ॥१३॥ योगस्यतपसश्चैवन्यासस्यगतयोऽमलाः ॥ महर्जनस्तपःसत्यंभक्तियोगस्यमद्गतिः ॥१४॥
मयाकालात्मनाधात्राकर्मयुक्तमिदंजगत् ॥ गुणप्रवाहएतस्मिन्नुन्मज्जतिनिमज्जति ॥१५॥ अणुर्बृहत्कृशःस्थू
लोयोयोभावःप्रसिद्ध्यति सर्वोऽप्युभयसंयुक्तःप्रकृत्यापुरुषेणच ॥१६॥ सम सम

योगादिनाऽनन्येनयथोक्तंमहर्लोकादयः मद्गतिः वैकुंठलोकः ॥१४॥ नचतन्मद्गतिव्यतिरेकेणनरागतयःसर्वंचलाइत्याह वैराग्यार्थंमया
कालशक्तिनाधात्राएवस्मरणेनकर्मफलप्रदेनदेवभूतेनगुणप्रवाहेसंसारेउन्मज्जतिआसत्यलोकमूर्ध्वमागतीःप्राप्नोतिपुनर्निमज्जति
आस्थावरंनीचागतीःप्राप्नोति ॥१५॥ सृष्टिनिरूपणस्यद्वितीयात्मप्रतिपत्त्यर्थत्वात्तत्प्रतिपादनायकारणेनकार्यस्यव्याप्तिमाह अणुरि

श्री भा टी
१२
१०५

इदानीं कार्यस्य कारणात्मतां दर्शयति ॥ यस्य कार्यस्य य आदिः कारणं अंते लयस्थानं च तस्य मध्यं मध्यावस्थोपि सत् एव वै प्रसिद्धं सुवर्णा
दिसत्तं एव व्यभिचारित्वात् सत् एव सत्त्वेतरः अनंतरं मिथ्याभूत कार्यस्य तत्राह विकार इति तैजसाः कटककुंडलादयः पार्थिवाश्च घटशरावा
दयश्च यथेति ॥ २९ ॥ नन्वेवं तर्हि स्वकार्यं प्रति महदादीनामप्यादित्वं न स्यात्तत्राह यदिति ॥ यद्रूपमुपादाय उपादानकारणतयाश्री
त्य पूर्वः कारणरूपो महदादिभावः परमहंकारादिकं भावं विकुरुते सृजति यथा पिंडो घटं मृद्रूपमुपादाय स्वयं निमित्तं तद्घटं सृजति ॥ तद्र
त्मएव सन्निति पूर्वस्यानुषंगः कथं तर्हि स्थितिकेऽन्येव सत्यमित्यादि श्रुतिस्तत्राह आदिरिति ॥ परस्य यस्यादिरंतश्च विद्यते तेन तदानीं तत्सत्यम
भिधीयते अन्यापरमकारणस्यात्मनः सत्यत्वविवक्षयेत्यर्थः ॥ ३० ॥ ननु तथापि सर्वविकारमिथ्यात्वे प्रकृतिपुरुषकालानां सत्कार्यं

सत्त्वयस्यादिरंतश्च स वै मध्यं च तस्य सत् ॥ विकारो व्यवहारार्थो यथा तैजसपार्थिवाः ॥ २९ ॥ यदुपादाय पूर्वस्तु भावो विकु
रुतेऽपरं ॥ आदिरंतो यदा यस्य तत्सत्यमभिधीयते ॥ ३० ॥ प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः ॥ सतोऽभिव्यंजकः का
लो ब्रह्म तत्त्रितयं त्वहं ॥ ३१ ॥ सर्गः प्रवर्तते तावत्पौर्वापर्येण नित्यशः ॥ महान्गुणविसर्गार्थः स्थित्यंतो यावदीक्षणं ॥ ३२ ॥

भूतानां भिन्नत्वात्कथमद्वितीयता तत्राह प्रकृतिरिति ॥ अस्य सतः कार्यस्योपादानं या प्रकृतिः प्रसिद्धा यश्च तस्या आधारः अधिष्ठाता परः
पुरुषः यश्च गुणक्षोभेणाभिव्यंजकः कालस्तत्त्रितयं ब्रह्मस्वरूपोऽहमेव न तु एभ्यः प्रकृतेः शक्तित्वात् पुरुषकालयोरहंस्वरूपत्वात् ॥ ३१ ॥
एवं तावत्कालत्रयेऽप्यव्यभिचारित्वात् ब्रह्मैव सत्यं ततस्तस्य स्वविकारणेनाद्वैतं सत्त्वमुक्त्वा मध्येऽपि तस्यैव सत्त्वमुपपादयितुं तेष्ववधित्वेन सत्त्वं
स्वकं दर्शयिष्यन् सर्गप्रवाहरूपायाः स्थितेरवधिमाह सर्ग इति ॥ महान् बहुलः पौर्वापर्येण पितृपुत्रादिरूपेण नित्यशः अविच्छेदेन किमर्थं प्रव
र्तते तदाह गुणेषु देहेषु विविधतया सृज्यत इति गुणविसर्गो जीवस्तदर्थः तद्भोगप्रयोजकः किंपर्यंतं प्रवर्तते यावत्स्थित्यंतः सोऽपि किमवधिस्त

[illegible marginal note] ॥ ९ ॥

राम
१२
१०५

प्रलयं निरूपयति॥ विराड्ब्रह्मांडं मया कालात्मना साध्यमानः लोकानामहरहः कल्पाः सृष्टिप्रलयाविविधाः कल्प्यंते यस्मिंस्तान्चात्रवस्मिन्
विकल्पयतीति तथासतथाद्यतोपि पंचतत्त्वरूपाय विशेषाय विभागाय कल्पते योग्यो भवति पंचानां भूतानामेकरूपः तेषां पृथग्रूपस्थानश्यती
त्यर्थः॥२१॥ तत्र तस्माद्वा एतस्मादात्मनः आकाशः संभूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधीभ्योऽन्नं
अन्नात्पुरुष इति श्रुत्युक्तसृष्टिप्रातिलोम्येन प्रलयमाह अन्न इति॥ मर्त्यशरीरं येनोपचितं तस्मिन्नन्ने शतवर्षायामनावृष्ट्या क्षीणे सति तत्रै
व लीयत इत्यर्थः अन्नं धानास्तु बीजमात्रावशेषं भवतीत्यर्थः॥ धाना भूमौ उप्ता न प्ररोहंतीत्यर्थः भूमिर्गंधसंवर्तकादित्यशोषिता संकर्षणमु
खाग्निना दग्धा सती भूतसूक्ष्मगंधतन्मात्रावशेषा भवति॥२२॥ अपस्तु गंधः शतवर्षयावृष्ट्याप्लाव्यमानोऽप्सु प्रलीयते॥ एवमेवापो ज्योतिषा शो

विराण्मयासाद्यमानो लोककल्पविकल्पकः॥ पंचत्वाय विशेषाय कल्पते भुवनैः सह॥२१॥ अन्ने प्रलीयते मर्त्यमन्नं धानासु लीयते
धाना भूमौ प्रलीयंते भूमिर्गंधे प्रलीयते॥२२॥ अप्सु प्रलीयते गंध आपश्च स्वगुणे रसे॥ लीयते ज्योतिषि रसो ज्योती रूपे प्रलीयते॥२३॥
रूपं वायौ स च स्पर्शे लीयते सोपि चांबरे॥ अंबरं शब्दतन्मात्रे इंद्रियाणि स्वयोनिषु॥ योनिर्वैकारिके सौम्य लीयते मनसीश्वरे॥२४॥

ष्यमाणा रसमात्रावशेषा भवंति तेजो रसोपि तस्मिंल्लीयते॥२३॥ ज्योतिस्तु वायुनाभिभूयमानं रूपमात्रं सत् तस्मिंल्लीयते॥ २३ वायुश्च कालप्रेरितेनां
बरेण ग्रस्तः स्पर्शमात्रः संस्तस्मिन्नंबरं च भूतादिनाहंकारेण ग्रस्यमानं शब्दतन्मात्रे तदेवं तामसाहंकारकार्यस्य शब्दा[illegible]र्यंतं लयमुक्त्वा राजसाहं
कारकार्यस्याप्याह इंद्रियाणि स्वयोनिषु स्वप्रवर्तकदेवतासु तेषां प्रवृत्तिस्वभावत्वात् प्रवृत्तेश्च देवताधीनत्वात्तत्रैव लय इति वाचोयुक्तिः वस्तु
तस्तेभ्यः कारणे राजसाहंकार एव लयोऽभिप्रेतः योनिर्वितिवैकारिकत्वादेकत्वमविवक्षितं योनयो देवतास्तु मनसि तद्धृतः ईश्वरे नियंतरि मनोवशे
नोपलभमानस्म देवा इत्युक्तत्वादिंद्रियलयोक्त एवावाग्विभिप्रायः मनश्च देवताभिः सह वैकारिकेऽहंकारे इत्यर्थः॥२४॥ राम

श्री भागी ० १०३ १०६

नामसाहंकारकार्यविशेषितस्पर्शरूपलयमाह ॥ शब्दो भूतादिं नामसाहंकारं अप्येति तत्तस्मिं लीयते इत्यर्थः ॥ भूतादिरित्युपलक्षणं त्रिविधोप्य
हंकारो महति जडांशं विहाय ज्ञानक्रियाशक्तिमात्ररूपो भवति कथंभूतः प्रभुः समर्थः सर्वजगन्मोहकत्वात् स च महान् स्वकारणेषु ज्ञानशक्तिक्रि
याशक्तिमत्त्वात्सुगुणवत्तमः स्तादृग्भावं विहाय गुणमात्ररूपो भवति ते चाव्यक्ते प्रकृतौ साम्यावस्थां गच्छन्तीत्यर्थः तदव्यक्तं काले कालाधीनत्वात् ॥ तेनै
कीभूय वर्तते अव्यये उपरते नृत्ते ॥ २१ ॥ मायामये मायाप्रवर्तके ज्ञानमये वा अत एव जीवयतीति जीवः तस्मिन्नदृश्यरूपे अयं भावः विश्व
स्य भेदावस्थस्योपकारको यः कालः सोऽपि तेन सह ज्ञानात्मनावतिष्ठते इति ॥ तदुक्तं सप्तमे ॥ कालेन चात्र तेरजनीदृशास्त्रा स्वयं प्रधान

शब्दो भूतादिमप्येति भूतादिर्महति प्रभुः ॥ स लीयते महान्स्वेषु गुणेषु गुणवत्तमः ॥ २५ ॥ तेऽव्यक्ते संप्रलीयंते तत्काले लीयते
व्यये ॥ २१ ॥ कालो मायामये जीवे जीव आत्मनि मय्यजे ॥ आत्मा केवल आत्मस्थो विकल्पापायलक्षणः ॥ २६ ॥ एवमन्वीक्ष
माणस्य कथं वैकल्पिको भ्रमः ॥ मनसो हृदि वर्तेत व्योम्नीवार्कोदये तमः ॥ २७ ॥ एष सांख्यविधिः प्रोक्तः संशयग्रंथिभेदकः ॥
प्रतिलोमानुलोमाभ्यां परावरदृशा मयया ॥ २५ ॥ ३ श्री ग ते का श ॥ धे भगवदुद्धवसंवादे ॥ ह श ते ध्या ॥ २४ ॥

(ल) ह्रुभ्यां नरदेवस्तत्पदमिति ॥ दशमे च ॥ योऽयं कालस्तस्य तेऽव्यक्तबंधो चेष्टामाहुश्चेष्टते येन विश्वं ॥ निमेषादिर्वत्सरांतो महीयांस्तं त्वेशानं क्षेम
धाम प्रपद्य इति ॥ जीव आत्मनि प्रविष्टे लीन तेन प्रकृतियोगाभावात् परिपूर्णेन सद्रूपेणावतिष्ठते आत्मा त्वात्मस्थ एव नान्यत्र लीयते य
तः केवलो निरुपाधिः अत्र हेतुः विकल्पापायाभ्यां विश्वोत्पत्तिलयाभ्यां लक्ष्यते अधिष्ठानत्वेनावधित्वेन चेति तथा सः ॥ २७ ॥ अस्य कथनस्य प्र
योजनमाह एवमिति ॥ मनसः कथं भेदनिमित्तो भ्रमः स्यात् जातो वा कथं हृदि तिष्ठेदिति ॥ २८ ॥ उपसंहरति एष इति ॥ २५ ॥ प्रत्यक्षमिव येन
दर्शितं तत्त्वमात्मनः ॥ सांख्यप्रख्यानकर्त्रे तस्मै हरये गुरवे नमः ॥ १ ॥ ३ श्री ग ते का श धे ह श ते ध्या ॥ २४ ॥

राम १०३ १०६

पंच विशे गुणैर्लोकं प्रकृतिपुरुषयोर्निरूप्यते चित्तप्रभवसत्त्वादिगुणवृत्तिरनेकधा १ प्रकृतिपुरुषयोर्विवेकः स्तानमतोपियावत्पर्यन्तं विशेष [illegible] गुणत्रय
वृत्तिमतो मस्यालोकावसु हृदोपगमः अतस्तद्गुणोपायकथनाय गुणानां तिनिरूपणार्थमाह गुणानां मिति सह मिश्राणां च य वर्ण मानाः सामि
श्राः न संमिश्राः असंमिश्राः तेषां विभक्तानां गुणानां मध्ये येन गुणेन यथा यादृशो भवेत् तदिदं कथयतो मत्तो निबोधेत्यर्थः १ तत्र सत्व
वृत्तीराह शमइति ईक्षा विवेकः तपः स्वधर्मवर्त्तिः स्मृतिः पूर्वापरानुसंधानं तुष्टिर्यथालाभसंतोषः त्यागोऽप्यशीलत्वं अस्पृहा वैराग्य
श्रद्धा आस्तिक्यं ह्रीः अनुचितकर्मणि लज्जा दयादानं दयादानगतिरहतो श्रीतिस्वरमणं स्वानिर्वृतिः आत्मरतिः
२ रजसो वृत्तीराह कामोऽभिलाषः ईहा व्यापारः मदो दर्पः तृष्णा लाभेऽप्यसंतोषः स्तंभो गर्वः आशीः धनादिप्रार्थना भेदो वलादि
सुखं भिदा हं मन्यइति भेदबुद्धिः सुखं विषयभोगः मदोत्साहः यशः प्रीतिः हास्यं वीर्यं बलोद्यमः
वीर्यं प्रभावाविष्कारः बलेनोद्यमः व्यायेनोद्यमः सात्विकावृत्तिः ३ तमोवृत्तीराह क्रोध इति क्रोधोऽसहिष्णुता लोभोऽप्ययपराङ्मुखता

श्रीभगवानुवाच गुणानामसम्मिश्राणां पुमान्येन यथा भवेत् तन्मे पुरुषवर्येदमुपधारय शंसतः १ शमो दमस्तितिक्षेक्षा
तपः सत्यं दया स्मृतिः तुष्टिस्त्यागोऽस्पृहा श्रद्धा ह्रीर्दयादिः स्वनिर्वृतिः २ काम ईहा मदस्तृष्णा स्तम्भ आशीर्भिदा सु
खं मदोत्साहो यशः प्रीतिर्हास्यं वीर्यं बलोद्यमः ३ क्रोधो लोभोऽनृतं हिंसा याच्ञा दम्भः क्लमः कलिः शोकमोहौ वि
षादार्ती निद्राशा भीरनुद्यमः ४ सत्वस्य रजसश्चैतास्तमसश्चानुपूर्वशः वृत्तयो वर्णितप्रायाः सन्निपातमथो शृणु ५
सन्निपातस्त्वहमिति ममेत्युद्धव या मतिः व्यवहारः सन्निपातो मनोमात्रेन्द्रियासुभिः ६

पृ० ३ ता १

असत्यं मत्सरा स्तीयं भावप्रतं हिंसा द्रोहः याच्ञा प्रार्थना दंभो धार्मिकध्वजित्वं क्लमः श्रमः कलिः कलहः शोकमोहो प्रसिद्धो चित्तवंश्यमध्व विषादः खि
दुःखं दैन्यं च निद्राते ईहो आशेदं मे भविष्यतीति रूपन्वी हा भीर्भयमनुद्यमो जाड्यं ४ अनुपूर्वशः क्रमेणैता सत्वादीनां वृत्तयो वर्णितप्रा
याः अन्या अप्यनुक्ता प्राया अस्मदुक्तप्रायाः इति भावाः ५ विभक्तानां गुणानां वृत्तयो वर्णिताः मिश्राणामाह सन्निपात इति त्रिभिः अहम
मेति च मता गुणानां सर्वेषां मिश्रणानां एव एषां सान्निपातजं संमहत्त्वं तः कामी क्रोधी इत्यादि तयाममत्या तिरास्तिकाम
क्रोधइत्यादिरूपश्चान्तर्बहिः सर्वोऽपि व्यवहारश्च सान्निपातकार्यमित्याह व्यवहार इति प्रवृत्ति हेतुः मनश्च मात्राणि च इंद्रिया
णि च असवश्च तैर्मनआदीनां सात्विकतामसराजसत्वात्तैर्व्यवहारः सान्निपातज इति भावः ६ राम श्री श्री श्री

२.८

अतएव यदा धर्मादिषु परिनिष्ठितो भवेत् तदायं त्रिगुणनिष्ठारूपः सन्निकर्षः सन्निपातः तमेव धर्मादीनां सत्वतमोरजःका र्येषु श्रद्धारतिधनानि सत्वरजस्तमोमयान्यावहतीति तथा ७ धर्मनिष्ठा दिव्याद्विषयतः सन्निपातजत्वेपूर्वफलत्वात्तथात्वमाहप्रवृत्तिलक्षणे निष्ठा पुमान् यर्हि गृहाश्रमे स्वधर्मे चानुतिष्ठेत गुणानां समितिः सन्निपातः हि यस्मात्का र्येष्वपि सन्निपातदर्शनात् प्रवृत्तिलक्षणे काम्ये धर्मे पराप्ये सोपि निष्ठा भवति अयं वानिवृत्तो निष्ठितः तथापि गृहाश्रम एवासक्तः तिष्ठेत् पश्चात्स्वधर्मे चानित्यं निष्कामे तिष्ठेत् गुणानां सा च विसंमतिः

धर्मे चार्थे च कामे च यदासौ परिनिष्ठितः गुणानां सन्निकर्षोयं श्रद्धारतिधनावहः ७ प्रवृत्तिलक्षणे निष्ठा पुमान्यर्हि गृहाश्रमे स्वधर्मे चानुतिष्ठेत गुणानां समितिर्हि सा ८ पुरुषं सत्वसंयुक्तमनुमीयाच्छ मादिभिः कामादिभीरजोयुक्तं क्रोधाद्यैस्तमसायुतं ९ यदा भजति मां भक्त्या निरपेक्षः स्वकर्मभिः तंस त्वप्रकृतिं विद्यात् [illegible] पुरुषं स्त्रियमेव वा १० यदा आशिष आशास्य मां भजेत स्वकर्म भिः तं रजःप्रकृतिं विद्याद्धिंसामाशास्य तामसम् ११

स्य धर्मस्य सहसा स्वधर्माः रजस्तमसयादेरपि ८ तदेवं मिश्रामिश्रगुणवृत्तीः संप्रदर्श्य इदानीं पुमान्येन यथा भवेत्तस्य तिय उक्तं तद्दर्शयति पुरुषमिति त्रिभिः ९ १० हिंसादयो मरणादि कामाशास्य यो भवेत्तं तामसं विद्यात् एते गुणैरेवं भूतो भवतीति तात्पर्यार्थः ११ राम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम

४राम०
२०४
२.८

दिंसां शत्रुमरणादिकमाशास्य यो भजेत तं तामसं विद्यात् ॥ एतैर्गुणैरेवंभूतो भवतीति तात्पर्यार्थः ॥ ११ ॥ ननु मेवापि गुणवशेन कर्तृत्वा
विशेषात् केन विशेषेण त्वं सेव्यो जीवस्तु सेवक इति नियमः यतो मां भजेतेति वारं वारमुच्यते तत्राह सत्त्वमिति ॥ जीवस्यैव न मे अतः यतः
चित्तजा जीवोपाधौ चित्ते भिद्यजंयन्ते अतस्तैः स एव बध्यते कीदृशः भूतानां देहरूपाणामन्येषां च मध्ये सज्जमानः अहं त्वनासज्जमानो
गुणानियंतृत्वेन स्वेच्छयादिकर्तापि नित्यमुक्तः अतो महान् विशेष इति भावः यद्वा भूतानामपि चीहतानां यत्कार्यं सत्त्वे चित्रम त्वमयं हिंसो
न्मम न इति स्मृतेः ॥ तेन भवाः अतो भूतोपहितस्य जीवस्यैवेति अन्यत्समानं ॥ १२ ॥ तदेवं मिश्रामिश्रगुणकार्याणि प्रदर्श्येदानीमेके

यदा आशिष आशास्य मां यजेत स्वकर्मभिः ॥ तं रजः प्रकृतिं विद्याद्धिंसामाशास्य तामसं ॥ ११ ॥ सत्त्वं रजस्तम इति गुणा जी
वस्य नैव मे ॥ चित्तजा यैस्तु भूतानां सज्जमानो निबध्यते ॥ १२ ॥ यदेतरौ जयेत्सत्त्वं भास्वरं विशदं शिवं ॥ तदा सुखेन यु
ज्येत धर्मज्ञानादिभिः पुमान् ॥ १३ ॥ यदा जयेत्तमः सत्त्वं रजः संगं भिदा चलं ॥ तदा दुःखेन युज्येत कर्मणा यशसा श्रिया ॥ १४ ॥
यदा जयेद्रजः सत्त्वं तमो मूढं लयं जडं ॥ युज्येत शोकमोहाभ्यां निद्रया हिंसयाशया ॥ १५ ॥ राम

कगुणोद्रेककार्याणि दर्शयति सप्तदशभिः ॥ यदेतरौ गुणौ जयेदभिभवेत् भास्वरं प्रकाशकं विशदं स्वच्छं शिवं शांतं शिवत्वविशदत्वभा
स्वरत्वानां यथाक्रमं सुखधर्मज्ञानहेतुत्वात् तदा तैर्युज्येत आदिशब्दात् शमदमादिभिश्च ॥ १३ ॥ तमः सत्त्वं च कर्मभूतं रजः कर्तृ संगं संगहेतु भिदा
भेदहेतुः चलं प्रवृत्तिस्वभावं अतः संगहेतुत्वात् यशसा श्रिया च युज्येत तत्कामः पुमान् भवतीत्यर्थः भिदाहेतुत्वात् दुःखेन युज्येत द्वितीयाद्वै भ
यं भवतीति श्रुतेः चलत्वात् कर्मणा च युज्येत ॥ १४ ॥ यदा रजः सत्त्वं च कर्मभूतं तमः कर्तृ जयेत् मूढं विवेकभ्रंशकं लयं आवरणात्मकं जडं अ
नुद्यमात्मकं अतो मूढत्वात् शोकमोहाभ्यां हिंसया लयत्वात् निद्रया जडत्वात् उद्यमाभावेन केवलमाशया युज्येतेति द्रष्टव्यं ॥ अनन्तरपाठे लयात्मक

॥ ९८ ॥ श्रीभा० टी० स्कं० ११ अ० २५

किंच यदा चित्तं प्रसीदेत स्वच्छं भवेत निर्वृतिरुपरतिः तत्तदा मत्पदं मदुपलब्धिस्थानं सत्त्वमुद्रिक्तं विद्धि ॥ १६ ॥ यदा पुनः क्रियया विक्रुर्वन् विका
रं प्राप्नुवन् आधीर्भवति आसमंताद्ध्यायति खिन्ना धीर्यस्य सः चेतसां बुद्धीन्द्रियाणां च अनिर्वृतिः अनुपरतिः गात्राणि कर्मेन्द्रियाणि तेषामस्वास्थ्य
विकाराधिक्यं मनोभ्रांतत्वं चंचलत्वं रज उत्कटं निशामय जानीहि ॥ १७ ॥ यदा सीदन् निरोभवेत चेतसो ग्रहणे चिदाकारपरिणामे अक्षमं सचित्तं
विलीयेत मनोपि संकल्पात्मकं न हृष्येत् लीनं तमो ज्ञानं ग्लानिर्विषादश्च भवति तत्तदा तम उत्कटं उपधारय विद्धि ॥ १८ ॥ किंचेन्द्रियाण्येव नि

यदा चित्तं प्रसीदेत इंद्रियाणां च निर्वृतिः । देहे भयं मनो संगं तत्सत्त्वं विद्धि मत्पदं ॥ १६ ॥ विक्रुर्वन् क्रियया चाधीरनिर्वृतिश्च
चेतसां । गात्रास्वास्थ्यं मनो भ्रांतं रज एतैर्निशामय ॥ १७ ॥ सीदच्चित्तं विलीयेत चेतसो ग्रहणेऽक्षमं । मनो नष्टं तमो ग्लानि
स्तमस्तदुपधारय ॥ १८ ॥ एधमानेषु गुणेषु सत्त्वे देवानां बलमेधते । असुराणां च रजसि तमस्युद्धव रक्षसां ॥ १९ ॥ सत्त्वाज्जा
गरणं विद्याद्रजसा स्वप्नमादिशेत । प्रस्वापं तमसा जंतोस्तुरीयं त्रिषु संततं ॥ २० ॥ उपर्युपरि गच्छंति सत्त्वेन ब्राह्म
णा जनाः । तमसाधोध आमुख्याद्रजसांतरचारिणः ॥ २१ ॥ राम राम

इति प्रवृत्तिनिमोहस्वभावानि देवासुररक्षांसीति ज्ञेयं ॥ यद्वा प्रसंगादाध्यधिदैविकानां गुणानामुत्कर्षे कार्याण्युक्तानीति ज्ञेयं ॥ १९ ॥ गुणो
त्कर्षेणावस्थाभेदं दर्शयति सत्त्वादिति ॥ प्रसंगात्त्रिगुणावस्थामाह तुरीयं चतुर्थमवस्थांतरं नाम त्रिषु जागरणादिषु संततं अनेकरसं
स्वात्मतत्त्वमेवेत्यर्थः ॥ २० ॥ गुणोत्कर्षद्वारेण तत्कर्मफलानि च दर्शयति उपर्युपरीति ॥ ब्राह्मणा वेदार्थानुष्ठानाभियुक्ताः आब्रह्मणः इति
पाठे ब्रह्मलोकमभिव्याप्येत्यर्थः ॥ आमुख्यात् स्थावरानभिव्याप्य अंतरचारिणो मनुष्या एव पुनः भवंति ॥ २१ ॥ राम

हा।देहाद्युक्तां तिकालीन गुणोत्कर्षफलमाह सत्त्वेप्रवृद्धे सति प्रलीनाम्मृताः रजोलयाः रजसि प्रवृद्धे सति लयो येषां ते एवं तमोलया इति अपि निर्गुणा
इत्यत्र तु लयशब्दस्य उपादानं ज्ञातो अपि निर्गुणाः जीवन्तो मामेव यांतीत्यर्थः २२ इदानीं गुणोत्कर्षकृतमेव तत्तत्फलसाधनकर्म त्रैविध्यमाह मदर्पणं
मत्प्रीत्युद्देशेनानुष्ठितं निष्फलं केवलं दासभावेनानुष्ठितं यन्निजकर्म नित्यादि तत्सात्विकं फलसंकल्पितं यस्मिंस्तस्मिंश्च हिंसाप्रायं हिंसोद्देशेनकृतं
हिंसाबहुलं वा प्रादिशब्दाद्दंभमात्सर्यादिकृतं तत्तत् २३ इदानीं सगुणनिर्गुणभेदेन ज्ञानादीनां चातुर्विध्यमाह कैवल्यं देहादिव्यतिरिक्तात्मवि
षयं वैकल्पिकं देहादिविषयं यत्तद्रजः राजसं प्राकृतं बालमूकादिज्ञानं तु तामसं मन्निष्ठं परमेश्वरविषयं २४ अधुना वासस्थानं विधिमाह वनमित्यादि
नाव नं विविक्तो वासः सात्त्विको वासः भगवन्निकेतनं तु सर्वदा निर्विशेषत्वान्निर्गुणं स्थानं २५ कारकः कर्ता असंगी अनासक्तः रागांधः अत्यभिनिवे

सत्वे प्रलीनाः स्वर्यांति नरलोकं रजोलयाः तमोलयास्तु निरयं यांति मामेव निर्गुणाः २२ मदर्पणं निष्फलं वा सात्त्विकं निज
कर्म तत् राजसं फलसंकल्पं हिंसाप्रायादि तामसं कैवल्यं सात्त्विकं ज्ञानं रजो वैकल्पिकं तु यत् प्राकृतं तामसं ज्ञानं मन्निष्ठं निर्गु
णं स्मृतं २४ वनं तु सात्त्विको वासो ग्रामो राजस उच्यते तामसं द्यूतसदनं मन्निकेतं तु निर्गुणं २५ सात्त्विकः कारकोऽसंगी रा
गांधो राजसः स्मृतः तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः २६ सात्त्विक्याध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राज
सी तामस्यधर्मे या श्रद्धा मत्सेवायां तु निर्गुणा २७ पथ्यं पूतमनायस्तमाहार्यं सात्त्विकं स्मृतं राजसं चेंद्रियप्रेष्ठं ता
मसं चार्तिदाशुचि २८ सात्त्विकं सुखमात्मोत्थं विषयोत्थं तु राजसं तामसं मोहदैन्योत्थं निर्गुणं मद

विश्रमस्थान

पाश्रयम् २९ रामराम रामश्रीरामश्री

शवान् स्मृतिविभ्रष्टः अनुसंधानशून्यः अविवेकी मदपाश्रयः मदेकशरणः सहि निरहंकारत्वान्निर्गुणः २६ अधर्मे धर्मश्रद्धा तियाश्रद्धा २७
पथ्यं हितं परिणामसुखकरं पूतं शुद्धं अनायस्तं अनायासतः प्राप्तं आहार्यं भक्ष्यभोज्यादि इंद्रियाणां प्रेष्ठं भोगकाले सुखदं कटुम्ललवणादि अ
तिदाशुचि दैन्यकरमशुद्धं च चशब्दात् ईश्वरे निवेदितं निर्गुणमित्यभिप्रेतं २८ आत्मोत्थं सुखं मदपाश्रयमित्यपि ईश्वरतत्त्वपदार्थविषयत्वेन
ज्ञानवदेव द्रष्टव्यम् २९

भा॰ ए॰ टी॰
६
१०५

उक्तं संसारहेतुभूतं त्रैगुण्यमुपसंहरति द्वाभ्यां द्रव्यं पथ्यपूतादि देशो वनग्रामादिः फलं सात्विकं सुखमित्यादि कालः यदा भजेत मां भजेत भक्त्या येदत्त
तौ जयेदित्यादिना यो पर्यो उक्तः ज्ञानं कैवल्यं सात्विकं ज्ञानमित्यादि कर्म मदर्पणमित्यादि कारकः सात्विको ऽसंगीत्यादि श्रद्धा सात्विक्याध्यात्मिकी
त्यादि अवस्था सत्वाज्जागरणमित्यादि आकृतिः उपश्रुपरिगृह्यतेत्यादिनोक्ता देवत्वादि यानिष्ठा सत्वे प्रलीनास्स्वर्यान्तीत्यादिनोक्ता स्वर्गादिः
एवं सर्वो भावो हि त्रैगुण्यस्त्रिगुणात्मिकः ३० न केवलमेवमेव किंतु यावतः पुरुषाव्यक्ताभ्यामधिष्ठिताः अधिष्ठितास्ते सर्वे भावा गुण
मया एवं तत्प्रपंचयति दृष्टमिति ३१ एतानीत्थं त्रैगुण्यस्य संसारहेतुत्वमनुवदंस्तन्निर्जयात्मोक्षमित्याह एता इति सार्द्धेन येनेमे निर्जिताः
स पश्चादविहितेन भक्तियोगेन मन्निष्ठः सन्मद्भावाय मोक्षाय प्रपद्यते योग्यो भवति ३२ तस्माद्विवेकिना मिदमेव युक्तमित्याह तस्मादिति ज्ञा

द्रव्यं देशः फलं कालो ज्ञानं कर्म च कारकः श्रद्धावस्थाकृतिर्निष्ठा त्रैगुण्यः सर्व एव हि ३० सर्वे गुणमया भावाः पुरुषाव्यक्त
धिष्ठिताः दृष्टं श्रुतमनुध्यातं बुद्ध्या वा पुरुषर्षभ ३१ एताः संसृतयः पुंसो गुणकर्मनिबंधनाः येनामी निर्जिताः सौम्य गुणा
जीवेन चित्तजाः ३२ भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते तस्माद्देहमिमं लब्ध्वा ज्ञानविज्ञानसंभवं ३३ गुणसंगं विनिर्धू
य मां भजंतु विचक्षणाः निःसंगो मां भजेद्विद्वानप्रमत्तो जितेंद्रियः रजस्तमश्चाभिजयेत्सत्वसंसेवया मुनिः सत्वं चा
भिजयेद्युक्तो नैरपेक्ष्येण शांतधीः ३५ संपद्यते गुणैर्मुक्तो जीवो जीवं विहाय मां जीवो जीवविनिर्मुक्तो गुणैश्चाशयसंभ
वैः मयैव ब्रह्मणा पूर्णो न बहिर्नांतरश्चरेत् ३७ इति श्रीभागवते॰ एकादशस्कंधे पंचविंशोऽध्यायः २५

नविज्ञानयोः संभवो यस्मिंस्तमिमं नरदेहं ३३ भजनप्रकारमाह निःसंग इति सार्द्धेन सत्वसंसेवया सात्विकान्येव सेवेत अमानत्वादि
द्धय इति प्राकृतरूपानीत्यानैरपेक्ष्येण उपशान्तात्मकेन सत्वेनैव ३४ एवं सति मां प्राप्नोतीत्याह संपद्यते इति जीवं जीवत्वकारणं लिंगशरीरं मां
प्राप्नुवन्पुनः संसारः स्यादित्याह जीव इति न बहिर्विषयभोगेन नान्तरस्मरणेन ३५ गुणकृतान्संसारान्प्रयाम जितगुणैक्यकथनादिभिः
धनतभक्तिरसेन विवेकिनो नाहेतवः सुस्तभजंतु रीहया इति श्री एकादशो पंचविंशोऽध्यायः॥ २५ श्रीरस्तु श्रीरस्तु श्रीरस्तु

भा॰
१०६
१०५

वीदुंशे योगनिष्ठाया विघतो दुष्टसंगतः साधुसंगेन तन्निष्ठा परा काष्ठेति वर्ण्यते १ योगिनो योगविभ्रंशः संगतः स्वेवादिति सर्वथा तन्निवृत्त्यर्थ
मैलगीतं वितन्यते २ निःसंगो मां भजेद्विद्वानप्रमत्तो जितेंद्रियः इत्युक्तं तत्र विपक्षे अनर्थं दर्शयिष्यन् जीवन्मुक्तस्यापि तर्हि संगो दुर्वार इत्यर्थः
स्यादित्याशंक्योक्तानुवादपूर्वकं परिहरति सार्द्धाभ्यां मल्लक्षणं मत्स्वरूपं लक्ष्यते येन तमिमं नरदेहं लब्ध्वा मद्धर्मे भक्तियोगे आस्थितः स
न् आत्मस्थमात्मन्येव निरंतरत्वेनावस्थितं परमानंदरूपं मां समुपैति सम्यक्प्राप्नोति १ न चैवंभूतस्य विषयसंगेन मा भूदित्याह गुण
मय्येति गुणमय्या जीवयोनिः जीवोपाधिस्तस्या विमुक्तः गुणेषु वर्तमानोऽपि तैर्न युज्यते संगं न प्राप्नोति अत्र हेतुः अवस्तुभिः ननु वस्तुभिरप्यन्ये
युज्यमाना दृश्यंते तत्राह अवस्तुत्वेन दृश्यमानेषु २ तथापि संगं वर्जयेदित्याह संगमिति असतां लक्षणमाह शिश्नोदरतर्पयतीति शिश्नो

श्रीभगवानुवाच मल्लक्षणमिमं कायं लब्ध्वा मद्धर्म आस्थितः आनंदं परमात्मानमात्मस्थं समुपैति मां १ गुणमय्या जीवयो
न्या विमुक्तो ज्ञाननिष्ठया गुणेषु मायामात्रेषु दृश्यमानेष्ववस्तुतः २ वर्तमानोऽपि न पुमान्युज्यतेऽवस्तुभिर्गुणैः संगं न कुर्या
दसतां शिश्नोदरतृपां क्वचित् ३ तस्यानुगः तमस्यंधे पतत्यंधानुगांधवत् ३ ऐलः सम्राडिमां गाथामगायत बृहच्छ्रवाः ह
उर्वशीविरहान्मुह्यन्निर्विण्णः शोकसंयमे ४ त्यक्त्वात्मानं व्रजंतीं तां नग्न उन्मत्तवन्नृपः विलपन्नन्वगाज्जाये घोरे तिष्ठेति
विक्लवः ५ श्रीरामचंद्राय नमः श्रीगोविंदाय नमः

मा२
दरतर्पकेषां काचित् कदाचित् अपि असतां तावद्बहूनां संगः किंतु तस्यैकस्याप्यनुगः अनुवर्ती सन् अंधमनुगच्छतीति यो अंधस्तद्वत् ३ अत्रेति हासमाह
ऐलः पुरूरवाः सम्राट् चक्रवर्ती बृहच्छ्रवाः कीर्तिर्यस्य सः उर्वशीविरहात् प्रथमं मुह्यन् पश्चात् कुरुक्षेत्रे तां संगम्य गंधर्वदत्तेनाग्निना देवानि
ष्ट्वा पुनरुर्वशीलोकं प्राप्य शोकसंयमे लोकापगमे सति ततो निर्विण्णः सन्निमां गाथामगायतेति नैमित्तिकं धातुसोरणं द्रष्टव्यम् ४ प्राक्तनी
मोहावस्थामाह त्यक्त्वेति आत्मानं राजानं त्यक्त्वा अथवा शय्यायाः प्रोत्थाय नग्नः त्यक्त्वा व्रजंतीमन्वगात् घोरे तिष्ठेति हये जाये मनसा तिष्ठ घोरे व
चांसि मिश्रा कृणवावहै नु न नौ मंत्रा अनुदितास एते मयस्करन्परतरे चनाहन्नित्येवं मंत्रे विलपन् ५ श्रीरस्तु श्रीरस्तु श्रीरस्तु श्रीरस्तु

भा.ए.टी. वैक्लव्ये कारणमाह कामानिति वर्षाणां यामिनीः रात्रीः यांतीः अपयांतीः आयांतीः आगामिनीः आकृष्टं चेतनायस्य सः ६ तस्य गंधर्वलोकप्राप्तस्य व
१०७ र्द्धुकालभोगानंतरं निर्वेदं एव तस्य गाथामाह अहो इति द्वाभ्यां अभिः कश्मलं तापः प्रपद्यते अहो इति यतो मया इमे अहोरात्ररूपा आयुःखंडा न स्मृताः ७
११० तदेवाह नाहमिति अभिनिर्मुक्तः अपिर ममानोस्तंगतः अभ्युदितो वा सूर्य इति अमया उर्वश्या वंचितः वत खेदे उत अपि मुषितः वर्षपूगानामि
विगतान्यहानि न वेदेति ८ येन संमोहेन आत्मा देहः क्रीडामृगवदधीनः ९ ननु प्रणयकुपितायाः अनुनयार्थमधीनता युक्तैव सत्यं न त्वत्र तत
स्त्रीत्याह सपरिच्छदं राज्यादिसहितं ईश्वरं चक्रवर्तिनं तृणमिव त्यक्त्वा यांतीमपि अन्वगमं अन्वगतोस्मीत्यर्थः १० किंच ममश्र भावा

कामानतृप्तोऽनुजुषन् क्षुल्लकान्वर्षयामिनीः न वेद यांतीर्नायांतीरुर्वश्याकृष्टचेतनः ६ श्रीऐल उवाच अहो मे मो
हविस्तारः कामकश्मलचेतसः देव्या गृहीतकंठस्य नायुःखंडा इमे स्मृताः ७ नाहं वेदाभिनिर्मुक्तः सूर्यो वाभ्युदितो मया
मुषितो वर्षपूगानां वताहानि गतान्युत ८ अहो मे आत्मसंमोहो येनात्मा योषितां कृतः क्रीडामृगश्चक्रवर्ती नरदेवशिखाम
णिः ९ सपरिच्छदमात्मानं हित्वा तृणमिवेश्वरं यांतीं स्त्रियं चान्वगमं नग्न उन्मत्तवद्रुदन् १० कुतस्तस्यानुभावः स्यात्तेज ई
शत्वमेव वा योऽन्वगच्छं स्त्रियं यांतीं खरवत्पादताडितः ११ किं विद्यया किं तपसा किं त्यागेन श्रुतेन वा किं विविक्तेन मौनेन स्त्री
भिर्यस्य मनो हृतं १२ स्वार्थस्याकोविदं धिङ्मां मूर्खं पंडितमानिनं योऽहमीश्वरतां प्राप्य स्त्रीभिर्गोखर
वज्जितः १३ सेवतो वर्षपूगान्मे उर्वश्या अधरासवं न तृप्यत्यात्मभूः कामो व
ह्निराहुतिभिर्यथा १४ श्रीरामचंद्राय नमः॥

दृग्भिमानो तथैवेत्याह कुतस्तस्य मे तेजो बलं खरो यथा पादताडितोपि खरीमनुगच्छति तद्वदित्यर्थः ११ एवंभूतस्य सर्वं साधनं निष्फ
लमित्याह किमिति त्यागेन संन्यासेन विविक्तेन एकांतसेवया मौनेन वा द्विः पमेते त्यर्थः १२ अतएव स्वनामानं निंदति हा मां स्वा
र्थस्येति अकोविदमविज्ञातारं खरवत् गोरिव खरवदित्यर्थः १३ अधरासवं सेवमानस्य आत्मभूः मनसिजः पुनःपुनरूढवात् इत्यर्थः १४

भा ११.२

८२ भा०११।२६

एवमष्टभिर्वेदांतनिरूपितः इदानींतस्याविवेकमाहद्वाभ्यां पुंश्चल्येति अयंभावः कर्मभिर्देवानिष्टाद्दुःखमेवप्राप्नोमिअतःपरमे
श्वरमेवभजेयमिति १४ परमेश्वरप्रसादंविनादैवहृदयप्रसादं दुर्विद्यावाक्यान्मोहाननिवर्ततइत्याह बोधितस्यापीति देव्याउर्वश्या
सूक्तवाक्येनयथार्थवचनेनपुनरेवोमास्पर्शमाप्रतमो माबाहृका मोघा अपिवासउदृत्नूनवैस्त्रैणानिसंख्यानिसंतिशालावृकाणां
हृदयान्येतानीत्यनेन १६ एवंपुंश्चल्यापहृतचित्तमित्यादिनातस्याअपकारोनास्तीतः इदानींमममेवायमपराधइत्याह किमेत

पुंश्चल्यापहृतंचित्तंकोन्वन्योमोचितुंप्रभुः आत्मारामेश्वरमृतेभगवंतमधोक्षजं १५ बोधितस्यापिदेव्यामेसूक्तवाक्ये
नदुर्मतेः मनोगतोमहामोहोनापयात्यजितात्मनः १६ किमेतयानोपकृतंरज्ज्वावासर्पचेतसः रज्जुस्वरूपाविदुषो
योहंयदजितेंद्रियः १७ क्वायंमलीमसःकायोदौर्गंध्याद्यात्मकोऽशुचिः क्वगुणाःसौमनस्याद्याह्यध्यासोविद्यया

येनि[illegible]नः अस्माकंकामिनाएतयाकिमपकृतंनकिंचिदपियथारज्जुस्वरूपाविदुषोरज्ज्वाइष्टःपुंसःतस्यासर्पकल्पनयाविद्य
तोपिरज्ज्वाकिमपकृतंनतद्वत्यद्यस्मात्योहमेवभूतःसएवाजितेंद्रियत्वादपराधीइत्यर्थः १७ ननुतस्यापितेवसौग
ध्यप्रेमादिगुणाःसंतोहमूलमित्याशंक्यतेपिस्वपरिकल्पिताएवेत्याहचतुर्भिः क्वायमितिमलीमसःअतिमलिनः सुमनसां
कुसु मानामिवगंधसौकुमार्यादिसौमनस्यंशोभनस्यमनोभवोवा १८ ॥ ॥ ॥ ॥

भा॰ए॰
टी॰१०८
१११

ममत्वमपि तस्मिन्न रिकल्पितमेवेत्याह पित्रोः किं स्वं कायः जनकत्वात् नु वितर्के भार्याया वा भोगप्रदत्वात् अत्रानुपयुक्तमप्येतत्
व्यापत्तुल्यत्वादुक्तं स्वामिनो वाधीनत्वात् अग्नेर्वा ते ष्वां तद्दाहुतित्वात् श्वगृध्रयोर्वा भक्ष्यत्वात् किं वा आत्मनस्त्वत्कृतस्य भोगित्वा
त् सुहृदां वा उपकारित्वात् एवं यो न निश्चीयते १९ तुच्छा कृमिविड्भस्मलक्षणा निष्ठा यस्य तस्मिन्कायैकलेवरे प्रियत्वेन
गृहीतेऽभिषंगमेवाह अहो इति सुनसं शोभननासिकं २० अतो गुणारोपेण रममाणाः सादृश्यात् कृमिसमा इत्याह त्वगादि

पित्रोः किं स्वं नु भार्यायाः स्वामिनोऽग्नेः श्वगृध्रयोः किमात्मनः किं सुहृदामिति यो नावसीयते १९ तस्मिन्कलेवरेऽमेध्ये
तुच्छनिष्ठे विषज्जते अहो सुभद्रं सुनसं सुस्मितं च मुखं स्त्रियः २० त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहतौ
विण्मूत्रपूये रमतां कृमीणां कियदन्तरं २१ अथापि नोपसज्जेत स्त्रीषु स्त्रैणेषु चार्थवित् विषयेन्द्रियसंयोगा
न्मनः क्षुभ्यति नान्यथा २२ अदृष्टादश्रुताद्भावान्न भाव उपजायते असंप्रयुंजतः प्राणान् शाम्यति स्तिमितं मनः २३

संहतौ तत्संघाते देहे विण्मूत्रादिसंहतौ रमतां कृमीणां वा २१ यद्यप्येवं बीभत्सिता एव स्त्रियः अथापि नोपसज्जेत अवलोकनादि
नापि संगं न कुर्यात् अर्थवित् विवेकी अत्र हेतुः विषयेति २२ ननु कश्चिन्निमीलितनयनादेरपि मनःक्षोभो दृश्यते सत्यं सोऽपि पूर्व
दर्शनादिकं विना न भवतीत्याह अदृष्टादिति भावात् पदार्थात् भावो मनःक्षोभः अतः प्राणानिन्द्रियाणि असंप्रयुंजतः नियच्छतः स्ति
मितं निश्चलं सत् २३ ॥

१०८
१११

ेंद्रियैः स्त्रीत्वाच्च विस्रब्धः अविश्वसनीयः मादृशाम विविक्तेनां २४ फलितमाह द्वाभ्यां एवमिति न्त्येभुदेवेषु चेदेव्यतीतितया २५ उक्तेभिः हितोपदे
शैरितितीसु देवादिसंगादपि सत्संगः श्रेयानिति दर्शयति २६ सतांलक्षणमाह संतइति विशेषणषट्कस्य पंचे हेतुहेतुमद्भावः २७ नवे
तेसूपदेशायेत्वाञ्च पितु केवलं तत्संनिधिरेव तारयतीत्याह तेष्विति सप्तभिः २८ श्रवणादिभिरेव मत्पराः श्रद्दधानाश्च संतो भक्तिं विंदंति २९
३० विभावसुमग्निं सेवमानस्य अपैति नश्यति तथा कर्मादिजाड्यं आगामि संसारभयं तन्मूलमज्ञानं च नश्यतीत्यर्थः ३१ निमज्ज्य

तस्मात्संगो न कर्तव्यः स्त्रीषु स्त्रैणेषु चेंद्रियैः विदुषां चाप्यविस्रब्धः षड्वर्गः किमु मादृशां २४ श्रीभगवानुवाच एवं प्रगाय
न्नृपदेवदेवः स उर्वशीलोकमथो विहाय आत्मानमात्मन्यवगम्य मां वै उपारमत् ज्ञानविधूतमोहः २५ ततो दुःसंगमुत्सृ
ज्य सत्सु सज्जेत बुद्धिमान् संत एतस्य छिंदंति मनोव्यासंगमुक्तिभिः २६ संतोऽनपेक्षा मच्चित्ताः प्रशांताः समदर्शिनः निर्ममो
निरहंकाराः निर्द्वंद्वाः निष्परिग्रहाः २७ तेषु नित्यं महाभाग महाभागेषु मत्कथाः संभवंति हिता नृणां जुषतां प्रपुनंत्यघं २८
ये वास्य शृण्वंति गायंति ह्यनुमोदंति चादृताः मत्पराः श्रद्दधानाश्च भक्तिं विंदंति ते मयि २९ भक्तिं लब्धवतः साधोः किमन्य
दवशिष्यते मय्यनंतगुणे ब्रह्मण्यानंदानुभवात्मनि ३० यथोपश्रयमाणस्य भगवंतं विभावसुं शीतं भयं तमोऽप्येति साधून्सं
सेवतस्तथा ३१ निमज्ज्योन्मज्जतां घोरे भवाब्धौ परमायणं संतो ब्रह्मविदः शांता नौर्दृढेवाप्सु मज्जतां ३२ अन्नं हि प्रा
णिनां प्राण आर्तानां शरणं त्वहं धर्मो वित्तं नृणां प्रेत्य संतोऽर्वाग्बिभ्यतोऽरणं ३३ श्रीरस्तु श्रीरस्तु श्री

न्मज्जतां उच्चावचा योनीर्गच्छतां परमायणं परमाश्रयः ३२ किं च यथान्नमेव प्राणिनां जीवनं अहमेव यथा शरणं धर्म एव यथा प्रेत्य परलो
के वित्तं तथा संत एवार्वाक् संसारापाताद्बिभ्यतः पुंसः शरणं इत्यर्थः ३३

श्रीरस्तु श्रीरस्तु श्रीरस्तु

भा॰टी॰
९
११२

किंच संतमर्थं विमृश्य [illegible] निर्गुणं जानाति अर्कः स मय्युपस्थितो पि बहिस्तद्रूपेण स्वचक्षु दिक्सर्वः ३४ अधमायार्थमुपते [illegible] वैतसेन [illegible] भावेन उमाव
तेन्ग विद्ध [illegible] वीति [illegible] भावं प्राप्ताय स्पतस्य [illegible] वैतसेन: पुरूरवा एव [illegible] वैश्यालोक [illegible] तिः [illegible]
गादपि हेतो [illegible] सर्गः [illegible] वैकारेति ३५ ऐकादशः षड्विंशः २६ सम्प्रति क्रियायोगः [illegible] सर्वकामापूर्ति
[illegible] समासतः १ [illegible] इति [illegible] २ क्रियायोगमिति भगवदाराधनरूप
यस्मादिति [illegible] सर्वकाव [illegible] विधित्वात् [illegible] वक्ष्यते [illegible] तिः
[illegible] एतत् [illegible] ३ [illegible]
पावतै ३ सर्ववर्णानां त्रैवर्णिकानां ४ [illegible] वामीश्वरः ५ [illegible] पदाख्य वाति
स्य ६ वैदिक एव मंत्रो वैदिकान्येवांगानि च [illegible] वैदिकः एवं तान्त्रिको [illegible] मिश्रो [illegible] मिश्रः ७ जा [illegible]

त्मा

मू॰ संतोऽदिधांति [illegible] बहिरर्कः समुपस्थितः देवताबांधवाः संतः संत आत्माहमेव च ३४ वैतसेन [illegible] एवं मर्त्यलोक
[illegible] एतसंगो महीमेतां [illegible] चचार ह ३५ ऐकादशो [illegible] षड्विंशोऽध्यायः २६ उद्धवः क्रिया
योगं समाचक्ष्व भवदाराधनं प्रभो यस्मात्त्वां ये यथार्चंति सात्वताः सात्वतर्षभ १ एतद्वदंति मुनयो मुहुर्निःश्रेयसं नृणां नारदो भगवान्व्यासः आचार्योऽङ्गिरसः सुतः २ निःसृतं ते मुखांभोजाद्यदाह भगवानजः पुत्रेभ्यो भृगुमुख्येभ्यो देव्यै च भगवान्भवः एतद्वै सर्ववर्णानामाश्रमाणां संमतं श्रेयसामुत्तमं मन्ये स्त्रीशूद्राणां च मानद ४ एतत्कमलपत्राक्ष कर्मबंधविमोचनं भक्ताय चानुरक्ताय ब्रूहि विश्वेश्वरेश्वर ५ श्रीभगवानुवाच न ह्यंतोऽनंतपारस्य कर्मकांडस्य चोद्धव संक्षिप्तं वर्णयिष्यामि यथावदनुपूर्वशः ६ वैदिकस्तांत्रिको मिश्र इति मे त्रिविधो मखः त्रयाणामीप्सितेनैव विधिना मां समर्चयेत् ७ यदा स्वनिगमेनोक्तं द्विजत्वं प्राप्य पूरुषः यथा यजेत मां भक्त्या श्रद्धया तन्निबोध मे ८ अर्चायां स्थंडिलेऽग्नौ वा सूर्ये वाप्सु हृदि द्विजे द्रव्येण भक्तियुक्तोऽर्चेत्स्वगुरुं माममायया ९ पूर्वं स्नानं प्रकुर्वीत धौतदंतोऽङ्गशुद्धये उभयैरपि च स्नानं मंत्रैर्मृद्ग्रहणादिना

श्रीभा॰
११
२७

[illegible] ८
कोऽवजेत तत्र विशेषमाह गर्भाष्टमे [illegible] स्वनिगमेन स्वाधीन [illegible] द्विजत्वमुपनयनं
अर्चायां प्रतिमादौ ९ स्नानविशेषमाह उभयैर्वैदिकैस्तांत्रिकैश्च मंत्रैः १० श्रीरस्तु श्रीरस्तु श्रीरस्तु श्रीरस्तु

भाग॰
१०९
११२

किं वा संध्योपासनादीनि कर्माणि [illegible] चोदितानि साक्षान्मनविहितानि यानि तैः सह मे पूजां कुर्यान्नत्वानि परित्यजेदित्यर्थः सम्यक्कारमेश्व रविषय एव संकल्पो यस्य तथाभूतः सन् पावनीं कर्मनिर्हारिणीं ११ अर्चाभेदानाह शैलीति शैली शिलामयी लौही सुवर्णादिधातुमयी लेप्या मृच्चंदनादिमयी हृदि पूजायां मनोमयी १२ प्रकर्षेण तिष्ठत्यस्यामिति प्रतिष्ठा प्रतिमैव जीवस्य भगवतो मंदिरं यद्वा प्रतिष्ठया कलान्यासेन भगवन्मंदिरं भवतीति प्रतिमाभेदे विशेषमाह सार्धेन उद्वासो विसर्जनं १३ अस्थिरायामर्चने विकल्पः स्यात् सालग्रामे न कुर्यात् सैकतायां कुर्यात् अन्यत्र कुर्याद्वा न वेति अविलेप्यायां स्नपनं अविलेप्याव्यतिरिक्तायां अन्यत्र विलेप्यायां च परिमार्जनमेव १४ इदानीं सकामनिःकामभेदेन विशेषमाह द्रव्यैरिति प्रकर्षेण सिद्धैः सुशोभनैः अमायिनो निःकामस्य भक्तस्य तु यथालब्धैस्तत्र चंदनादि सर्वथा

संध्योपास्त्यादिकर्माणि वेदेनचोदितानि मे पूजां तैः कल्पयेत्सम्यक्संकल्पः कर्मपावनीं ११ शैली दारुमयी लौही लेप्या लेख्या च सैकता मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता १२ चलाचलेति द्विविधा प्रतिष्ठा जीवमंदिरं उद्वासावाहने न स्तः स्थिरायामुद्धवार्चने १३ अस्थिरायां विकल्पः स्यात् स्थंडिले तु भवेद्द्वयं स्नपनं त्वविलेप्यायामन्यत्र परिमार्जनं १४ द्रव्यैः प्रसिद्धैर्मद्यागः प्रतिमादिष्वमायिनः भक्तस्य च यथालब्धैर्हृदि भावेन चैव हि १५ स्नानालंकरणं प्रेष्ठमर्चायामेव तूद्धव स्थंडिले तत्त्वविन्यासो वह्नावाज्यप्लुतं हविः सूर्ये चाभ्यर्हणं प्रेष्ठं सलिले सलिलादिभिः श्रद्धयोपहृतं प्रेष्ठं भक्तेन मम वार्यपि १७ भूर्यप्यभक्तोपहृतं न मे तोषाय कल्पते गंधो धूपः सुमनसो दीपोऽन्नाद्यं च किं पुनः १८ ॥ ॥

संभवेन्न तु हृदि भावेन भावनया यद्वा हृदि चेन्मयाजस्तदा भावेन मनोमयैर्द्रव्यैरित्यर्थः १५ अधिष्ठानमधिष्ठानभेदेन प्रधानोपचारमाह सार्धेनेति तत्त्वविन्यासः यथास्थानमंगप्रधानादेवतानां तत्तन्मंत्रैः स्थापनं अभ्यर्हणं उपस्थानं अर्घ्यादि सलिले सलिलादिभिस्तर्पणादिना मज्जने १६ सर्वत्र साधारणमाह श्रद्धयेति १७ एवं मद्विचारादि [illegible] इदानीं पूजाप्रकारमाह शुचिरिति संभृताः संभाराः पूजासाधनानि येन सः प्राग्दर्भैः यद्वा प्रागेव संभृतसंभारः सन्नासीनः तत्रासीनः सम्मुखं [illegible] उदङ्मुखो वा

अनंतरं गुर्वादिनमस्कारपूर्वकं कथोपदेशं स्वस्मिन् कृतन्यासः कृतो मूलमंत्रन्यासः यस्मात् तां ममार्चां आस्ते निर्मलात्प्रायचुपकर्षणादि
नाशोधयेत् कलशं प्रोक्षणीं कुंभं प्रोक्षणीयं प्रोक्षणार्थोदकपात्रं उपसाधयेत् चंदनपुष्पादिभिः संस्कुर्यात् १९ तदद्भिः प्रोक्षणीपाद्भिर्दे
वयजनं देवपूजास्थानम् २० पाद्याद्यर्थं त्रीणि पात्राणि कलशोदकैः पूरितानि तैस्तैर्द्रव्यैः साधयेत् तत्र पाद्यादिद्रव्याणि पाद्यं श्यामाकदू
र्वाब्जविष्णुक्रांतादिरिष्यते गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपाः दूर्वा चेति क्रमादर्घ्यद्रव्याष्टकमुदीरितं जातीलवंगकंकोलै
र्मतमाचमनीयकमिति तानि च त्रीणि पात्राणि पात्राणि यथा ॐ हृदयादिमंत्रैर्गायत्र्या च सर्वाण्यभिमंत्रयेत् देशिकः पूजकः २१ न

शुचिः संभृतसंभारः प्राग्दर्भैः कल्पितासनः आसीनः प्रागुदग्वार्चेदर्चायां त्वथ संमुखः १९ कृतन्यासः कृतन्यासां मद
र्चां पाणिनामृजेत् कलशं प्रोक्षणीयं च यथावदुपसाधयेत् २० तदद्भिर्देवयजनं द्रव्याण्यात्मानमेव च प्रोक्ष्य पात्राणि त्रीण्य
द्भिस्तैस्तैर्द्रव्यैश्च साधयेत् २१ पाद्यार्घ्याचमनीयार्थं त्रीणि पात्राणि देशिकः हृदा शीर्ष्णाथ शिखया गायत्र्या चाभिमंत्र
येत् २२ पिंडे वाय्वग्निसंशुद्धे हृत्पद्मस्थां परां मम अण्वीं जीवकलां ध्याये न्नादांते सिद्धभाविताम् २३ तयात्मभूतया पिं
डे व्याप्ते संपूज्य तन्मयः आवाह्यार्चादिषु स्थाप्य न्यस्तांगं मां प्रपूजयेत् २४ ॥ ॥ ॥ ॥

दनंतरं पिंडे देहे वाय्वग्निसंशुद्धे इति कोष्ठगतेन वायुना शोषिते आधारगतेनाग्निना दग्धे पुनर्ललाटस्थचंद्रमंडलामृतप्लवेनामृतमये (
जाते तस्मिन् हृत्पद्मस्थां परां श्रेष्ठां जीवकलां श्रीनारायणमूर्तिं ध्यायेत् कथंभूतां नादांते सिद्धभाविताम् प्रणवस्याकारोकारमका
रबिंदुनादाः पंच प्राणाः तत्र नादांते सिद्धैर्ध्यातां तथा च श्रुतिः यो वेदादौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः तस्य प्रकृतिलीनस्य यः प
रः स महेश्वर इति २३ तयात्मभूतया स्वेनैव भावेन चिंतितया अमृतमये पिंडे दीपेन प्रभया गृहमिव व्याप्ते सति तस्मिन्नेवादौ मा
नसैरुपचारैः संपूज्य तन्मयः सन् सर्वादिष्वावाह्य स्थापनमुद्रया स्थापयित्वा उभाभ्यां मां पूजयेत् २४ ॥ ॥ ॥

कथं पूजयेत् तत्राह पाद्यैरिति द्वाभ्यां धर्मादिभिर्मम मासनं २४ तत्र पद्मं च कल्पयित्वा भाभ्यां वेद तत्राभ्यां नमभयसिद्धये मह्यं पाद्यादीनुपचारान् प्रकल्प
येत् इत्यन्वयः उपसर्गाः आचमनं अर्घ्यम् ... भयसिद्धये वेद तत्रोक्ति ... अयमर्थः धर्मज्ञानवैराग्यैश्वर्याण्यासन
पर्यंकस्याग्नेयादिचतुष्कोणेषु पादाः अधर्मादीनि पूर्वादिदिक्षु गात्राणि मध्ये च कर्णिकायां त्रयो गुणाः पट्टिकास्तत्र पूर्वादिक्रमेण मध्ये च
विमलोत्कर्षिणी ज्ञान क्रिया योगा प्रह्वी सत्येशानानुग्रहे प्रति नव शक्तयः एवं यथोपदेशं धर्मादिभिः शक्तिभिश्चासनं कल्पयेत् त्रिकर्णिकायाः
केसरैः तत्रस्थस्य रूपादि ... ज्वलमित्यर्थः २५ आयुधादिपूजामाह सुदर्शनमिति त्रिभिः तत्र ... पूजा ... विना आ
सनेनैव ... आवरणमित्युक्तेः तनः सुदर्शनादिमुसलांतान्यायुधानि ... कौस्तुभमालाश्रीवत्सांनुरसि २६ नंदादीन्पार्षदानष्टदिक्ष

पाद्याद्यैः पूजयेद् ... पाद्यादीनुपचारान्प्रकल्पयेत् धर्मादिभिश्च नवभिः कल्पयित्वासनं मम २४ पद्ममष्टदलं तत्र कर्णिकाकेसरो
ज्ज्वलं उभाभ्यां वेदतंत्राभ्यां मह्यं तूभयसिद्धये सुदर्शनं पाञ्चजन्यं गदासीषुधनुर्हलान् मुसलं कौस्तुभं मालां श्रीवत्सां
श्चानुपूजयेत् २६ नंदं सुनंदं गरुडं प्रचंडं चंडमेव च महाबलं बलं चैव कुमुदं कुमुदेक्षणं दुर्गां विनायकं व्यासं विष्वक्सेनं गुरून्
सुरान् स्वे स्वे स्थाने त्वभिमुखान् पूजयेत्प्रोक्षणादिभिः २८ चंदनोशीरकर्पूरकुंकुमागुरुवासितैः सलिलैः स्नापयेन्मंत्रै
र्नित्यदा विभवे सति २९ स्वर्णघर्मानुवाकेन महापुरुषविद्यया पौरुषेणापि सूक्तेन सामभी राजनादिभिः ३० ॥

गरुडप्रमुखः २७ दुर्गादीनि कोणेषु गुरूंस्त्वामतः सुरानिंद्रादिलोकपान् पूर्वादिदिक्षु एवमेतान्देवताभिमुखान् प्रोक्षणादिभिः अर्चादिभिः पूजये
दित्यर्थः पाद्यादीनुपचारान्प्रकल्पयेदित्युक्तानेव ... विधिभिः प्रपंचयति षड्भिः चंदनेति २९ मंत्रानाह स्वर्णघर्मानुवाकः सुवर्णं घर्मं परि
वेदवेनमित्यादि महापुरुषविद्या जितंते पुण्डरीकाक्ष नमस्ते विश्वभावन सुब्रह्मण्य नमस्तेऽस्तु महापुरुष पूर्वजेति पौरुषसूक्तं सहस्रशीर्षे
त्यादि राजनादीनि सामानि इंद्रं नरो नेमधिता हवंत इत्यस्यामृचि गीतानि आदिशब्दात् ... रोहिणादीनि ३० ॥

कुर्वीतलुक्कार्थं सर्वसाधारणं ३१ अनुलक्षणं गुणं विधत्ते पाद्यमिति ३२ नैवेद्ये वैभवलक्षणं गुणं विधत्ते गुडपायसेति शष्कुल्यस्तैल=२

भा॰ए॰ ११ १२ ११४

वस्त्राद्युपचारेष्वलंकारलक्षणं गुणं विधत्ते वस्त्रेति पत्राणि कपोलवक्षःस्थलादिषु लिखिताः पत्रभंगाः मद्भक्तः चेतसप्रेम यथा भवति तथा यथोचितमलंपकाविशेषाः आपूपाः अपूपानां मंडकादीनां समूहाः सूपाख्यं जनानि सति विभवे इति शेषः ३३ कालभेदेन गुणं विधत्ते अभ्यंगेति अभिषेचनं पंचामृतादिस्नपनं अन्नाद्येति अन्नं भोज्यं आद्यं भक्ष्यं पर्वणि एकादश्यादौ अन्वहं प्रत्यहं वा विभवे सतीति ३४ फलभूयस्त्वार्थिनाग्नावपि पूजाप्रकारमाह विधिनेति स्वगृह्योक्तप्रकारेण मेखलादिभिरुपलक्षिते निर्मिते तदुक्तं विस्तारो ज्ञायतस्त्रिस्रो मेखला

वस्त्रोपवीताभरणपत्रस्रग्गंधलेपनैः अलंकुर्वीत सप्रेम मद्भक्तो मां यथोचितं ३१ पाद्यमाचमनीयं च गंधं सुमनसोक्षतान् धूपदीपोपहार्याणि दद्यान्मे श्रद्धयार्चकः ३२ गुडपायससर्पींषि शष्कुल्यापूपमोदकान् संयावदधिसूपांश्च नैवेद्यं सति कल्पयेत् ३३ अभ्यंगोन्मर्दनादर्शदंतधावाभिषेचनं अन्नाद्यगीतनृत्यानि पर्वणि स्युरुतान्वहं ३४ विधिना विहिते कुंडे मेखलागर्तवेदिभिः अग्निमाधाय परितः समूहेत्पाणिनोदितं ३६ परिस्तीर्याथ पर्युक्षेदन्वाधाय यथाविधि प्रोक्षण्यासाद्य द्रव्याणि प्रोक्ष्याग्नौ भावयेत मां तप्तजाम्बूनदप्रख्यं शंखचक्रगदाम्बुजैः लसच्चतुर्भुजं शांतं पद्मकिंजल्कवाससं ३८ स्फुरत्किरीटकटककटिसूत्रवरांगदं श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनं ध्यायन्नभ्यर्च्य दारूणि हविषाभिघृतानि च प्रास्याज्यभागावाघारौ दत्त्वा चाज्यप्लुतं हविः ४० ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्चतुरंगुलाः हस्तमात्रो भवेद्गर्तः सयोनिर्वेदिका ततः येस्माद्दिनं प्रज्वलितमग्निं परितः समूहेत् एकत्र मेलयेत् ३५ दर्भैः परिस्तीर्य परितः प्रोक्षयेत् अन्वाधाय अन्वाधानसंज्ञकमाद्य इतिभिः समित्प्रक्षेपादिरूपं कर्म कृत्वा अग्रे रूपरतो द्रव्याणि होमोपयोगीन्यासाद्य निधाय प्रोक्षण्या प्रोक्षणीपात्रोदकेन प्रोक्ष्याग्नौ मां ध्यायेत् ३६ शंखादिभिरुल्लसंतः शोभमानाश्चत्वारो भुजा यस्य तं ३७ स्फुरत्किरीटादीनि यस्य तं ३८ हविषा घृतेनाभिघृतानि संसिक्तानि दारूणि शुष्कसमिधः प्रास्य प्रक्षिप्य आघारौ तत्संज्ञकौ याज्यौ आज्यभागौ च दत्त्वा तदर्थ आहुतीर्हुत्वेत्य

२८ ११ २३

सुपुष्कलंयथाभवतितथाब्रह्मदायस्यब्रह्मददातीतितथातस्यज्ञानोपदेष्टुः २६ समधीयीतउच्चैःपरमंशुचिअन्येषामपिशोधकंपूज
येतशुद्धेत २७ २८ सम्यक्ज्ञानान्नस्ततोपुनरुपदेष्टुमीत्याशयेनपृच्छतिअपिकिंत्वयावधारितमाकलय्यात् २९ नैतदितिशठा
यवंचकाय ३० शूद्राणांयोषितांचयदिभक्तिःस्यात्तर्हिब्रूयात् ३१ एतत्ज्ञानेनकृतार्थोभवतीत्याहनैतदितिअत्रदृष्टांतमाहपीत्वेति
पीयूषंस्वादु ३२ ननुसंतिबहूनिज्ञेयानितत्तत्फलसाधनानिसत्यंसत्यंभक्तानांभक्तस्यतसर्वंअहमेवेतोमदेकशरणोभवेत्या

यएतन्ममभक्तेषुसंप्रदद्यात्सुपुष्कलं तस्याहंब्रह्मदायस्यददाम्यात्मानमात्मना २६ यएतत्समधीयीतसपवित्रंपरमंशु
चि सपूयेताहरहर्मांज्ञानदीपेनदर्शयन् २७ यएतच्छ्रद्धयानित्यमव्यग्रःशृणुयान्नरः मयिभक्तिंपरांकुर्वन्कर्मभिर्न
सबध्यते २८ अप्युद्धवत्वयाब्रह्मसखेसमवधारितं अपितेविगतोमोहःशोकश्चासौमनोभवः नैतत्त्वयादांभिकायना
स्तिकायशठायच अशुश्रूषोरभक्तायदुर्विनीतायदीयतां ३० एतैर्दोषैर्विहीनायब्रह्मण्यायप्रियायच साधवेशुच
येब्रूयाद्भक्तिःस्याच्छूद्रयोषितां ३१ नैतद्विज्ञायजिज्ञासोर्ज्ञातव्यमवशिष्यते पीत्वापीयूषममृतंज्ञातव्यंनावशिष्यते
३२ ज्ञानेकर्मणियोगेचवार्तायांदंडधारणे यावानर्थोनृणांताततावांस्तेहंचतुर्विधः ३३ ॥ ॥ ॥

ह ज्ञानइतिज्ञानादौयावान्धर्मादिलक्षणश्चतुर्विधार्थस्तावान्सर्वोपितवज्ञानेमोक्षःकर्मणिविहितेधर्मःकर्मण्येवस्वाभाविके
तुकामःयोगेत्वणिमादिसिद्धयःवार्तायांकृष्यादौअर्थः दंडनीत्यावैश्वर्यमितिसिद्धौस्वर्गयोरपिकामांतर्गतत्वाच्चातुर्विध्यं ३३

क्रीताइत्यत आह मर्त्य इति यदास्यक्तसमस्तकर्मा सन्मे निवेदितात्मा भवति वित तदा मे सो से विचिकीर्षितः विशिष्टं कर्त्तुमिष्टो भवति ततस्मात्स्वत
त्वं मोक्षं प्रतिपद्यमानो मयात्मभूयाय मदैक्याय मत्समानैश्वर्यायेति यावत्कल्पते योग्यो भवति वै ध्रुवं ३४ आदर्शितो योगमार्गो यस्मै स
३५ एवं प्रणयेन सावघूर्णं ह्रोमितं चित्तं धैर्येण विष्टभ्य बहुमन्यमानः आत्मानं कृतार्थं मन्यमानः ३६ मायया मोहः आश्रितः आसीत्

मर्त्यो यदा त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे तदामृतत्वं प्रतिपद्यमानो मयात्मभूयाय च कल्पते वै ३४ श्रु
कः स एवमादर्शितयोगमार्गस्तदुत्तमश्लोकवचो निशम्य बद्धांजलिः प्रीत्युपरुद्धकंठो नहूवेश्रुपरिप्लुताक्षः विष्टभ्य चित्तं प्र
णयावघूर्णं धैर्येण राजन्बहु मन्यमानः कृतांजलिः प्राह यदुप्रवीरं शीर्ष्णा स्पृशंस्तच्चरणारविंदं ३६ उद्धवः विद्रावि
तो मोहमहांधकारो य आश्रितो मे तव सन्निधानात् विभावसोः किं नु समीपगस्य शीतं तमो भीः प्रभवंत्यजाद्यः ३७ प्रत्य
र्पितो मे भवतानुकंपिना भृत्याय विज्ञानमयः प्रदीपः हित्वा कृतज्ञस्तव पादमूलं कोन्यं समीयाच्छरणं त्वदीयं ३८
वृक्णश्च मे सुदृढः स्नेहपाशो दाशार्हवृष्ण्यंधकसात्वतेषु प्रसारितः सृष्टिविवृद्धये त्वया स्वमायया ह्यात्मसुबोधहेतिना ३९

सतव संनिधाने नैव विद्रावितः प्रभवंति किं न बाधाय समर्था भवति अजाद्य ब्रह्मणोपि जनक ३७ किंच यद्यपि तव संनिधानादेव गत
स्तथाप्यनुकंपिना भवता विज्ञानमयः प्रदीपश्च प्रत्यर्पितः स्वमायया पहृतः पुनः समर्पितः अतस्तव कृतज्ञो यस्त्वया कृतमनुग्रहं जा
नाति स कोनाम त्वदीयं पादमूलं हित्वान्यच्छरणं समीयादाश्रयेत ३८ किंच दाशार्हादिषु त्वया यः स्वमायया स्नेहपाशः प्रसारित

मूलमंत्रेणाष्टाक्षरेण तथा षोडशाक्षरेण चोपचारैस्तेन पुरुषसूक्तेन वा सावधानतः प्रत्यृचमाकृतिग्रहणेनेत्यर्थः ॥ पुरुषसूक्तेनाराधनपक्षे
स एवं मूलमंत्रस्तेन वा प्रत्यृचमर्चनादानतोदितमइति ॥ मंत्रैः स्वाहांतैर्नाममंत्रैर्यथाक्रमेणैवाग्नये स्विष्टकृते स्वाहेत्येवं स्विष्टकृतं हुत्वा
४२ ॥ ततो वह्निस्थं भगवंतमभ्यर्च्योपनमस्कृत्य नंदादिभ्यः पार्षदेभ्यो गुरुभ्यश्च दिक्षु बलिं हरेत् ॥ ततः पूजास्थानमागत्य देवस्याग्रे समुप
विश्य यथाशक्ति मूलमंत्रं जपेत् ॥ ४३ ॥ ततश्च भगवतो भोजनसमाप्तिं ध्यात्वाचमनं दत्वा केशवं विष्वक्सेनाय कल्पयित्वा तदनु
ज्ञया पश्चात्स्वयं भुंजीत ॥ ततः सुरभिमद्धवत्रांबूलादिमुखवासं दत्वाथ पुनरर्घ्यं दत्वा पुष्पांजलिना पूजयेत् ॥ ४४ ॥ अभिनयस्वस्मि

हुत्वान्मूलमंत्रेण षोडशार्चावधानतः । धर्मादिभ्योऽथ यान्याग्यं मंत्रैः स्विष्टकृतं बुधः ॥ ४२ ॥ अभ्यर्च्योपनमस्कृत्य पा
र्षदेभ्यो बलिं हरेत् । मूलमंत्रं जपेद्भक्त्या स्मरन्नारायणात्मकं ॥ ४३ ॥ दत्वाचमनमुत्केशं विष्वक्सेनाय कल्पयेत् । मुख
वासं सुरभिमत्तांबूलाद्यमथार्हयेत् ॥ ४४ ॥ उपगायन्गृणन्नृत्यन्कर्माण्यभिनयन्मम । मत्कथाः श्रावयञ्शृण्वन्मुहूर्तं क्ष
णिको भवेत् ॥ ४५ ॥ स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि । स्तुत्वा प्रसीद भगवन्निति वंदेत दंडवत् ॥ ४६ ॥ शिरो मत्पादयोः कृत्वा
बाहुभ्यां च परस्परं । प्रपन्नं पाहि मामीश भीतं मृत्युमहाग्रहात् ॥ ४७ ॥ इति शेषां मया दत्तां शिरस्याधाय सादरं । उद्वासयेच्चेदुद्वास्यं
ज्योतिर्ज्योतिषि तत्पुनः ॥ ४८ ॥

त्वा विष्णुर्वेन क्षणिकः स्वेच्छया ग्रंथं परित्यज्य लब्धावसरो भवेत् ॥ ४५ ॥ स्तवैः स्तोत्राणां भेदं स्तोत्रैः पौराणैः प्राकृतैरिति ॥ ४६ ॥ कथं प्रणमेदित्यपेक्षा
यामाह शिर इति ॥ बाहुभ्यां पादद्वयं दक्षिणोत्तराभ्यां मम दक्षिणोत्तरौ पादौ गृहीत्वा यद्वा गृहीत्वा ततः परस्परं निबद्धाभ्यां कृतापराधश्च प्रपन्नमित्यादि
स्तिस्त्वा प्रणमेत् ॥ ४७ ॥ ततः शेषां गृहीत्वा स्वे केवले कल्पिकोद्वासनप्रकारमाह इतीति ॥ अनया प्रार्थनया शेषां निर्माल्यं मया दत्तां ध्यात्वा
शिरस्याधाय धृत्वा यद्युद्वासयेत् तर्हि प्रतिमायां यज्ज्योतिस्तत्पुनरपि हृत्पद्मस्थज्योतिषि उद्वासनीयं ॥ ४८ ॥ राम

दर्शयति १

एतेष्वधिष्ठानेषु किं मुख्यमित्यपेक्षायामाह अर्चादिष्विति ॥ यदा यत्र श्रद्धा तदा तत्र न त्वधिष्ठाने मुख्यामुख्यत्वं कुतो यतः सर्वभूतेष्विति ॥४८
उभयतः इहामुत्र च ॥४९॥ समर्थं प्रत्याह मदर्चामिति त्रिभिः ॥ पुष्पोद्यानानि च कारयेत् पूजायात्रोत्सवाश्रितान् पूजा प्रत्यहं यात्रा विशि
ष्टपर्वणि उत्सवः जनसमागमः उत्सवः दवसेनादिमहोत्सवः तदाश्रितान् क्षेत्रादीन् दत्त्वा ॥५०॥ पूजायात्रोत्सवाश्रितानित्यस्य विवरणमाह
पूजादीनामिति ॥ प्रवाहार्थं संततानुवृत्त्यर्थं मत्सात्म्यतां मत्समानैश्वर्यं ॥५१॥ प्रतिष्ठादीनां व्यस्तसमस्तानां फलमाह प्रतिष्ठयेति म

अर्चादिषु यदा यत्र श्रद्धा मां तत्र चार्चयेत् ॥ सर्वभूतेष्वात्मनि च सर्वात्माहमवस्थितः ॥४८॥ एवं क्रियायोगपथैः पुमान्वैदिक
तांत्रिकैः ॥ अर्चन्नुभयतः सिद्धिं मत्तो विंदत्यभीप्सितां ॥४९॥ मदर्चां संप्रतिष्ठाप्य मंदिरं कारयेद्दृढं ॥ पुष्पोद्यानानि रम्याणि
पूजायात्रोत्सवाश्रितान् ॥५०॥ पूजादीनां प्रवाहार्थं महापर्वस्वथान्वहं ॥ क्षेत्रापणपुरग्रामान्दत्वा मत्सात्म्यतामियात् ॥५१॥
प्रतिष्ठया सार्वभौमं सद्मना भुवनत्रयं ॥ पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ॥५२॥ मामेव नैरपेक्ष्येण भक्ति
योगेन विंदति ॥ भक्तियोगं स लभत एवं यः पूजयेत मां ॥५३॥ यः स्वदत्तां परैर्दत्तां हरेत सुरविप्रयोः ॥ वृत्तिं स जायते विड्
भुग्वर्षाणामयुतायुतं ॥५४॥ कर्तुश्च सारथेर्हेतोरनुमोदितुरेव च ॥ कर्मणां भागिनः प्रेत्य भूयो भूयसि तत्फलं ॥५५॥
इति श्रीभागवते एकादशस्कंधे महापुरुषपूजाविधिर्नाम सप्तविंशोध्यायः ॥२७॥ राम

मत्साम्यतां मया साम्यमित्यर्थः ॥५२॥ सकामं प्रस्तुत्य केवलं भक्तं प्रत्याह मामेवेति ॥ अहो तत्कथं क्रियायोगः कथं भवति न त्वाह भक्तियोग
मिति ॥५३॥ दातुः फलमुक्त्वा अपहर्तारं निंदति य इति ॥ विड्भुक् विष्ठाभोजी क्रिमिः ॥५४॥ कर्तव्यं तत्फलं तदेवान्येषामप्याह कर्तुरिति ॥ सा
रथेः सहकारिणः हेतोः प्रयोजकस्यानुमोदितुः प्रेत्य यत्तत्फलमित्यन्वयः कुतो यतः कर्मणामेते भागिनः भागाधिक्ये तत्रापि विशेषमाह ॥
भूयसि कर्मणि सारथ्यादौ च भूयोधिकं फलमिति ॥५५॥ परः परात्परादिमात्रेण पूजितो यः परं पदं ॥ प्रागाद्दिशतु श्रीनः सहरिः शरणं मम ॥१

अष्टाविंशे तु यः पूर्वं विस्तरेणोपवर्णितः ॥ ज्ञानयोगः पुनश्चासौ समाहृत्य निरूप्यते ॥ इदानीमतिविस्तरेणोक्तं ज्ञानयोगं संक्षेपेण वक्तु
माह ॥ परेषां स्वभावान् शांतघोरादीन् कर्माणि च धर्माधर्मादीनि कस्यापि न प्रशंसेन्न निंदेत् तत्र हेतुः विश्वमिति ॥ १ ॥ विपक्षे दोषमाह
स्वार्थात् ज्ञाननिष्ठालक्षणात् असति मिथ्याभूते द्वैते अभिनिवेशात् ॥ २ ॥ भ्रंशमेव दृष्टांतेनोपदर्शयति ॥ तैजसे राजसाहंकारकार्ये इंद्रिय
गणे निद्रयापन्ने अभिभूते सति पिंडस्थो जीवः केवलं मनोमात्रेण मायां स्वप्नरूपां प्राप्नोति ॥ ततो मनसि लीने सति नष्टचेतनः मृत्युव
न्मृत्युतुल्यां सुषुप्तिमिव प्राप्नोति यथा तद्वदेव नानार्थदृक् ॥ द्वैताभिनिवेशी विक्षेपं लयं च प्राप्नोतीति यथाज्ञसंपर्कात् ॥ विश्व

श्रीभगवानुवाच ॥ परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत् ॥ विश्वमेकात्मकं पश्यन्प्रकृत्या पुरुषेण च ॥ १ ॥ परस्वभाव
कर्माणि यः प्रशंसति निंदति ॥ स आशु भ्रश्यते स्वार्थादसत्यभिनिवेशतः ॥ २ ॥ तैजसे निद्रयापन्ने पिंडस्थो नष्टचेत
नः ॥ मायां प्राप्नोति मृत्युं वा तद्वन्नानार्थदृक् पुमान् ॥ ३ ॥ किं भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियत् ॥ वाचोदितं तदनृतम
नसा ध्यानमेव च ॥ ४ ॥ छायाप्रत्याह्वयाभासा ह्यसंतोऽप्यर्थकारिणः ॥ एवं देहादयो भावा यच्छंत्यामृत्युतो भयं ॥ ५ ॥

स्वप्नलयलक्षणं भ्रंशरूपम् अनात्मसंपर्कादात्मनोऽपि स्वरूपभ्रंश इति भावः ॥ ३ ॥ द्वैतासत्यतया स्तुतिनिंदयोर्निर्विषयत्वं प्रपंचयति सार्धैः
षड्भिः किं भद्रमिति ॥ अवस्तुनो द्वैतस्य मध्ये किं भद्रं किं वाभद्रं कियद् भद्रं कियद्वाभद्रमित्यर्थः ॥ अवस्तुत्वमेवाह वाचेति वाचेंद्रियोपलक्ष
णं वाचोदितमुक्तं च चक्षुरादिभिर्गृह्यद्रूपं तदनृतमिति ॥ ४ ॥ नन्वेवं सति देहादिभावानामप्यसत्यत्वात् कथं भयहेतुत्वं तत्र सदृष्टांतमाह ॥
छायाप्रतिबिंबं प्रत्याह्वयः प्रतिध्वनिः आभासः शुक्तिरजतं एते यथाऽसंतोऽप्यर्थकारिणो भवंति आमृत्युतः मृत्युमभिव्याप्य यद्वा मृत्युलयो

श्री
भा॰ टी॰
११
११८
११८

ननु स्रष्ट्रादिश्रुतिभिरेव द्वैतं निरूपितं कथमसत्यं स्यात्तत्राह आत्मैवेति द्वाभ्यां त्रायते पाल्यते त्राति पालयति ॥ ६ ॥ अन्यस्मात्स्रष्ट्रादि
व्यतिरिक्तात् त्रिविधा अध्यात्मादिरूपा भातिः प्रतीयते ॥ ७ ॥ ननु कथं निर्मूलं प्रतीयते तत्राह इदमिति ॥ ज्ञानविज्ञानयोर्नैपुणं निष्ठं सूर्यव
त्क्तो स्रोष्ट्वा ॥ ८ ॥ एतन्निष्ठाप्राप्त्युपायमाह प्रत्यक्षेणेति ॥ यदाद्यन्तवद्वैतं तत्तदसदिति ज्ञात्वा निःसंगो विचरेत् आद्यन्तवत्त्वे प्रमाणानि प्रत्यक्षे
णघटादेरनुमानेन सावयवत्वेन दृष्टं पृथिव्यादि निगमेन प्रत्यक्षमाकाशादि आत्मसंविदा स्वानुभवेन सर्वं दृश्यमाद्यन्तवदसत्त्वेति

आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः ॥ त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः ॥ ६ ॥ तस्मान्न ह्यात्मनोऽन्यस्मादन्यो भावो
निरूपितः ॥ निरूपितेयं त्रिविधा निर्मूला भातिरात्मनि ॥ इदं गुणमयं विद्धि त्रिविधं मायया कृतं ॥ एतद्विद्वान्मदुदितं ज्ञान
विज्ञाननैपुणं ॥ ७ ॥ न निंदति न च स्तौति लोके चरति सूर्यवत् ॥ ८ ॥ प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा ॥ आद्यंतव
दसज्ज्ञात्वा निःसंगो विचरेदिह ॥ ९ ॥ उद्धव उवाच ॥ नैवात्मनो न देहस्य संसृतिर्द्रष्टृदृश्ययोः ॥ अनात्मस्वदृशोरीश कस्य
स्यादुपलभ्यते ॥ १० ॥ आत्माव्ययोऽगुणः शुद्धः स्वयंज्योतिरनावृतः ॥ अग्निवद्दारुवदचिद्देहः कस्येह संसृतिः ॥ ११ ॥

ज्ञात्वेति ॥ ९ ॥ ननु यद्यात्मसंविदा सर्वं दृश्यमसदित्युच्यते तर्ह्यात्मा स्वप्रकाशो देहादिद्वैतं च जडमित्युक्तं स्यात् तथा च न संसारप्रतिभासो
घटेतेति चोदयति नैवेति ॥ अनात्मस्वदृशोर्जडाजडयोः अत्र देहः दृष्टृदृश्ययोः मध्ये द्वयोरपि तत्राह उपलभ्यत इति ॥ १० ॥ एतत्प्रपंचयति
आत्मेति ॥ अव्ययत्वादिपंचविशेषणैर्नाशादिरागादिपुण्यापुण्यापाज्ञानपरिच्छेदानामसंभवं दर्शयन्निदं तमस्तं ह्येव यथोष्ठमग्निवत् जडः स्व
यं भावः यथैवाग्निदारुणोरभेदेनानुपलंभेऽपि दारुप्रकाश्यमेवाग्निः स्वप्रकाशकः तथा देहात्मनोरपीति न संसृतिः तयोरन्यतरस्यापि घटत इति
भावः ॥ ११ ॥

नचित् २

स्क
११८

११८

त्वो

६५ा

तदेवकार्यस्यकारणमात्रात्मतानुत्वात्प्रकाशस्यप्रकाशात्मतामाह विज्ञानमिति ॥ त्रियवस्थंयकारस्यएष्वक्यातः छन्दोनुरोधेनजाग्रदादित्र्य
वस्थंयद्विज्ञानंमनः तदवस्थाकारणभूतंचयद्गुणत्रयंकारणकार्यकर्तृकारणमध्यात्मकार्यमधिभूतंकर्तृअधिदैवमेवंगुणत्रयकार्यभूतं
त्रिविधंजगत् एतदेनतुर्येणसामान्यज्ञानमात्रेणसमन्वयेनभवतियेनानुमतंप्रकाशतइत्यर्थः ॥ तमेवभान्तमनुभातिसर्वंतस्यभासासर्व
मिदंविभातीति ॥ तथाचद्रष्टृदृश्यदर्शनश्रोतृश्रोत्रश्रवणमननमनोमन्तृइत्यादिश्रुतेः ॥ नतुविशेषविज्ञानव्यतिरेकेणनतुर्येणसोपल
भामहेतत्राह व्यतिरेकतस्तुसामान्यादेर्यद्दृश्यतेतदेवसत्यमिति ॥ २० ॥ एवंकालत्रयेऽप्यव्यभिचारिणः सत्यत्वमुक्त्वाव्यभिचारिणस्त्वस
त्यतामाह नयदिति ॥ मध्येचतत्स्यथङ्गास्तिकिंतुव्यपदेशमात्रंकृतोयतः यद्यत्परेणान्येनभूतंजातंप्रसिद्धंप्रकाशितंचतत्तदेवकारणप्रकाश

विज्ञानमेतत्त्रियवस्थमंगगुणत्रयंकारणकार्यकर्तृ ॥ समन्वयेनव्यतिरेकतश्चयेनैवतुर्येणतदेवसत्यं ॥ २० ॥ नयत्पुरस्तादु
तयत्रपश्चान्मध्येचतत्रव्यपदेशमात्रं ॥ भूतंप्रसिद्धंचपरेणयद्यत्तदेवतत्स्यादितिमेमनीषा ॥ २१ ॥ अविद्यमानोप्यवभास
तेयोवैकारिकोराजससर्गः ॥ ब्रह्मस्वयंज्योतिरतोविभातिब्रह्मेंद्रियार्थात्मविकारचित्रं ॥ २२ ॥ राम

कंतावन्मात्रंस्यात्पृथगितिमेमनीषाबुद्धिः वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यं ॥ सर्वंखल्विदंब्रह्मेत्यादिश्रुतेः कारणप्रकाशक
व्यतिरेकेणचकार्यस्यप्रकाश्यस्यचानुपलंभादितिभावः ॥ २१ ॥ एवंसामान्यतः कार्यप्रकाश्ययोः कारणप्रकाशकाभ्यामभेदमुक्त्वाद्यप्रस्तु
तेतदुभयंविवेकपूर्वकंप्रपंचस्यब्रह्माभेदेनाह अविद्यमानइति ॥ योयंवैकारिकः विकारसमूहः एषप्रागविद्यमानोराजसः सर्गः रजोद्वारे
णब्रह्मकार्यभूतइत्यर्थः अवभासतेपिब्रह्मप्रकाश्यभूतइत्यर्थः ॥ ब्रह्मतुस्वयंस्वतः सिद्धंनतुकार्यमित्यर्थः ज्योतिःस्वप्रकाशकमित्यर्थः
अतःकारणादिंद्रियाणिचअर्थाःतन्मात्राणिचआत्मामनश्चदेवानामप्युपलक्षणंविकाराःपंचभूतान्येवंचित्रंब्रह्मैवभातीति ॥ २२ ॥

उपसंहरति ॥ एवं निगमतपः प्रभृत्य द्वैतिस्यानुमानैः स्फुटं यथा भवति तथा ब्रह्मविवेकहेतुभिः ॥ तथा परस्य देहादेरपवादेनात्मतत्त्वनिरा
सेन कीदृशेन विशारदेन निपुणेन गुरुणा निमित्तभूतेन तिवा आत्मविषयं संदेहं छित्त्वा स्वानंदतुष्टः सन् अखिलेभ्यः कामकेभ्य इंद्रिया
दिभ्य उपारमेत निःसंगो भवेत् ॥ २५ ॥ अपवादं प्रपंचयति ॥ वपुरात्मा न भवति पार्थिवत्वात् घटवत् एवं इंद्रियाणि तदधिष्ठातारो देवाः अ
सुर्मनः धिषणा बुद्धिः सत्त्वं चित्तं अहंकृतिः इत्येते आत्मानो न भवंति जडत्वात् अन्नमात्रमत्रोपष्टंभत्वात् ॥ शरीरवद्वायुर्जलं च कुतः शब्दे
जः खं क्षितिरिति पंचभूतानि अर्थाः शब्दादयः साम्यं प्रकृतिश्च नात्मा जडत्वात् दृश्यवदिति ॥ यद्वा हिंसाहेतुनानुमानेतराणीति सूचितानि

एवं स्फुटं ब्रह्मविवेकहेतुभिः परापवादेन विशारदेन ॥ छित्त्वात्मसंदेहमुपारमेत स्वानंदतुष्टोऽखिलकामुकेभ्यः ॥ २५ ॥
नात्मा वपुः पार्थिवमिंद्रियाणि देवा ह्यसुर्वायुर्जलं हुताशः ॥ मनोऽन्नमात्रं धिषणा च सत्त्वमहंकृतिः खं क्षितिरर्थसाम्यम् ॥ २६ ॥
समाहितैः कः करणैर्गुणात्मभिर्गुणो भवेन्मत्सुविविक्तधाम्नः ॥ विक्षिप्यमाणैरुत किं नु दूषणं घनैरुपेतैर्विगतै रवेः किम् ॥ २७ ॥
यथा नभो वाय्वनलांबुभूगुणैर्गतागतैर्वर्तुगुणैर्न सज्जते ॥ तथाक्षरं सत्त्वरजस्तमोमलैरहंमतेः संसृतिहेतुभिः परम् ॥ २८ ॥

तद्यथा ॥ इंद्रियाण्यात्मा न भवंति तैजसत्वात् प्रदीपवत् करणत्वान्मनो वा प्राणश्च वायुत्वाद्बाह्यवायुवदिति ॥ २६ ॥ एवं विवेकज्ञानवतो
मुक्तस्य नेंद्रियादिकृतो गुणदोषसंबंध इत्याह समाहितैरिति ॥ मत्तु विविक्तधाम्नः मम सुष्ठु विविक्तं धाम स्वरूपं येन तस्य प्रकाशकस्य प्रका
श्यगुणदोषा न भवंतीति रविदृष्टांतेनोक्तं ॥ २७ ॥ असंगब्रह्मत्वेनावस्थितस्य केऽपि गुणदोषा इत्याकाशदृष्टांतेनाह यथेति ॥ वाय्वादीनां शो
षणदहनक्लेदनरजोधूसरत्वादिभिः गतागतैः रागमायादिभिः ऋतुगुणैः शीतोष्णादिभिर्वा अहंमतेः अहंकारस्य मलैः संसृतिहेतुभिर्न

नि

सत्यं तथाप्युभयोरेव मविवेकएव संसारालंबनमित्याह पंचभिः यावदिति सन्निकर्षणं संबंधनं च स एतस्य ज्ञातः संबंधस्तत्राह अविवेकि
नः अज्ञानकृत उत्पद्यते ॥ ननु स्वप्रकाशस्य कथमज्ञानं ततः संसारस्तत्राह अपार्थोपि मिथ्याभूतोपि केवलं फलत्वाच्च फलस्फूर्तिर्न तु स्व
तो सत्यत्वं ॥ १२ ॥ नन्वसतो देहादेः कृतः संसारस्फूर्तिहेतुत्वमपि तत्राह अर्थे इति अस्यात्मनः ॥ १३ ॥ ननु कथं चिज्ज्ञानतो विषय
स्फूर्तिः जीवन्मुक्तस्यापि पुनरपि स्वप्नसंगः स्यात्तत्राह तथाहीति ॥ प्रस्वापः स्वप्नः बहूननर्थान्बिभर्ति पुष्णातीति तथा ॥ १४ ॥

श्रीभगवानुवाच ॥ यावद्देहेंद्रियप्राणैरात्मनः सन्निकर्षणं ॥ संसारः फलवांस्तावदपार्थोप्यविवेकिनः ॥ १२ ॥ अर्थे ह्य
विद्यमानेपि संसृतिर्न निवर्तते ॥ ध्यायतो विषयानस्य स्वप्नेनर्थागमो यथा ॥ १३ ॥ तथाप्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थ
भृत् ॥ स एव प्रतिबुद्धस्य न वै मोहाय कल्पते ॥ १४ ॥ शोकहर्षभयक्रोधलोभमोहस्पृहादयः ॥ अहंकारस्य दृश्यंते ज
न्ममृत्युश्च नात्मनः ॥ १५ ॥ देहेंद्रियप्राणमनोभिमानो जीवोंतरात्मा गुणकर्ममूर्तिः ॥ सूत्रं महानित्युरुधेव गीतः
संसार आधावति कालतंत्रः ॥ १६ ॥ राम राम राम राम

८५

संनिकर्षण १

अहंकारलक्षणो देहादिसंसारालंबनमित्यन्वयव्यतिरेकाभ्यां दर्शयति शोकेति ॥ सुषुप्त्यादौ तेषामदर्शनात् अहंसुखीतिवदेचैत
न्ये स्वरूपे तीत्यभावाच्चाहरूपत्वाच्चास्तुवादीनां हर्षादिवत्त्वनहदृष्टधर्मतानुपपन्नेति भावः ॥ १५ ॥ ननु यद्यहंकारस्य संसारस्तर्हि मु
क्तिमपि तस्यैवेति मुक्तावहंकारावशेषः प्रसज्येत तत्राह देहेति ॥ देहादिष्वभिमानो यस्य सः आत्मैकत्वे पामंतर्हितो जीवः अत एव गुणकर्ममयी
मूर्तिर्यस्य सः एवं च सूत्रं मायाधिष्ठितैकमेव सूत्रादिशब्देनोक्तः संसारे परमेश्वराधीनः सर्वत्र आधावति अतो नायं दोष इति भावः ॥ १६ ॥

तदेवमहंकारहतं बंधमुपपाद्येदानीं ज्ञानेन तन्निवृत्तौ मुक्तिरित्याह अमूलमिति ॥ वस्तुतोऽमूलमन्यं अज्ञानं ततस्तु बहुभी रूपैः रूपितं प्र
काशितमैंद्रजालिकतुल्यमिति वा किं तदाह मन इति ॥ मनआदीनां द्वंद्वः येऽहामन आदिषु क्रियंते इति कर्माहंकारगं गुरूपासनया [illegible] शि
तेन ज्ञानखड्गेन छित्त्वा ॥ १७ ॥ तदेव ज्ञानं स्वरूपसाधनफलैर्निरूपयति ज्ञानमिति ॥ विवेको ज्ञानं तत्र साधनान्याह निगमो वेदः तपः स्वध
र्मः प्रत्यक्षं स्वानुभवः ऐतिह्यं गुरूपदेशः अनुमानं तर्कः फलमाह ॥ आद्यंतयोरस्य जगतः मध्येपि तदेव केवलं न तु जगदिति किं तत

अमूलमेतद्बहुरूपरूपं मनोवचःप्राणशरीरकर्म ॥ ज्ञानासिनोपासनया शितेन छित्त्वा मुनिर्गां विचरत्यतृष्णः ॥ १७ ॥
ज्ञानं विवेको निगमस्तपश्च प्रत्यक्षमैतिह्यमथानुमानं ॥ आद्यंतयोरस्य यदेव केवलं कालश्च हेतुश्च तदेव मध्ये ॥ १८ ॥
यथा हिरण्यं स्वकृतं पुरस्तात्पश्चाच्च सर्वस्य हिरण्मयस्य ॥ तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत् ॥ १९ ॥

कालः कलयति प्रकाशयति यः तथा हेतुः कारणं स्वयमतः तदेव तत्तत्संभवति ॥ यदस्य विश्वस्य कारणं प्रकाशकं च ब्रह्म तदात्मकमेवैतत्त
न ततः पृथगित्येवं निश्चयफलो निगमादिसाधनैर्जायते यो विवेकस्तज्ज्ञानमिति ॥ १८ ॥ तत्र नानाभेदव्यवहारावलंबनस्यापि विश्वस्य कार
णमात्रात्मकत्वं तद्दृष्टांतमाह यथेति ॥ स्वकृतं स्वस्य कुंडलादिरूपेण विचित्रितं यद्धिरण्यं कीदृशं हिरण्मयस्य कुंडलादेरुत्पत्तेः पुरस्तान्नाशाच्च
पश्चाच्च यदस्ति कटककुंडलमित्यादिना व्यपदेशैर्व्यवहर्तव्यं प्राप्यमानमपि तदेव यथा तद्वदस्य विश्वस्य कारणभूतोऽहमेव नानाव्यवहारावलंबने

[illegible]

मुक्तवदसम्यग्ज्ञानी न यथेष्टमाचरेदित्यादृश्यं तथापीति ॥ गुणेषु विषयेषु रजो रागः मनसः कषाय इत्युच्यते निरासनामाह ॥ २७ ॥ एतदेव दृष्टां
तेनोपपादयति यथेति ॥ रोगामामयो रोगः असाधुः असम्यक्पथ्या भवति तथा पाककषायकर्म अशुद्धाः कषाया रागादयः तन्मूलानि च कर्मा
णि यस्मिंस्तत अतएव सर्वसंगं सर्वेषु पुत्रादिषु सज्जमानं मनः कुयोगिनम सम्यग्ज्ञानिनं विध्यति भ्रंशयति ॥ २८ ॥ ननु कथंचिद्विषयसंगे य
दि योगभ्रंशः स्यात्तर्हि सोपायेन येन मार्गेण तत्रारुरुक्षुयोगिन इति ॥ मनुष्यस्तैर्बंधुशिष्यादिरूपैः विदग्धैः उपसृष्टैः प्रेरितैः ॥ तथा च श्रु
तिः ॥ तस्मान्नैदेषां न प्रियं यदेतन्मनुष्या विदुरिति ॥ स येजन्मांतरे नष्टकर्मतंत्रे कर्मविस्तारं ॥ २९ ॥ ननु विदुषामपि सर्वथा कर्म दुष्परि

तथापि संगः परिवर्जनीयो गुणेषु मायारचितेषु तावत् ॥ मद्भक्तियोगेन दृढेन यावद्रजो निरस्येत मनःकषायं ॥ २७ ॥ यथामयो
साधु चिकित्सितो नृणां पुनः पुनः संतुदति प्ररोहन् ॥ एवं मनोऽपक्वकषायकर्म कुयोगिनं विध्यति सर्वसंगं ॥ २८ ॥ कुयो
गिनो ये विहितांतरायैर्मनुष्यभूतैस्त्रिदशोपसृष्टैः ॥ ते प्राक्तनाभ्यासबलेन भूयो युंजंति योगं न तु कर्मतंत्रं ॥ २९ ॥ करोति
कर्म क्रियते च जंतुः केनाप्यसौ चोदित आनिपातात् ॥ न तत्र विद्वान्प्रकृतौ स्थितोऽपि निवृत्ततृष्णः स्वसुखानुभूत्या ॥ ३० ॥
तिष्ठंतमासीनमुत व्रजंतं शयानमुक्षंतमदंतमन्नं ॥ स्वभावमन्यत्किमपीहमानमात्मानमात्मस्थमतिर्न वेद ॥ ३१ ॥

रन्तमिति पुनः संसारः स्यादत आह करोतीति ॥ विदुषोन्योसौ जंतुर्देह एव भोजनादि कर्म करोति क्रियते विक्रियते । ते न कर्मणा पुरुषार्थ्यापि
प्राप्नोतीत्यर्थः ॥ केनापि संस्कारादिना चोदितः सन् आनिपातान्मरणपर्यंतं करोति विद्वांस्तु प्रकृतौ देहे स्थितोपि न च कर्मणा न विक्रियते
निवृत्तकामित्वात् हर्षविषादादिभिः संसारं न प्राप्नोति ॥ ३० ॥ किं चासंतानावद्देहिकं कर्मभिर्विकारशंकायतो देहमप्यसौ न नु पश्यतीत्याह तिष्ठं
तमिति ॥ उक्षंतं मूत्रयंतं स्वभावप्राप्तमन्यदपि दर्शनस्पर्शनादीहमानं कुर्वंतमात्मानं देहं ॥ ३१ ॥ रम रम

श्री
भागी
ए
११७
१२०

नत्विंद्रियवतः सर्वथा कथं नैरंतर्येण दर्शनं संभवति तत्राह यदिस्मेति ॥ यद्यप्यसंतं देहोत्थानां इंद्रियाणामर्थं पश्यति तथापि नानात्वात् अनुमि
थ्यात्वात् स्वप्नवदित्यनुमानेन विरुद्धं बाधितं सत् अन्यदात्मव्यतिरिक्तं मनीषी वस्तुतया न मन्यते स्वापादुत्थाय प्रबुद्धः संस्कारमात्रेण स्वप्न
विषयं स्फुरंतमप्येवं स्वयमेव तिरोभवंतं यथा तद्वत् ॥ ३२ ॥ तदेवमात्मा न विक्रियत इत्युक्तं नत्वेतदुपपन्नं बुद्ध्यवस्थायाः स्वात्मन्यध्यासमा
नत्वात् । मुक्तावस्थायां चाऽगृह्यमाणत्वात् ॥ न हि व्रीहिस्वरूपेण व्रीह्यादिभावत्यागतः तंडुलीभावेन गृह्यमाणाः किं विक्रियंते तत्राह पूर्वमिति

स्वप्ना

यदिस्म पश्यत्यसदिंद्रियार्थं नानानुमानेन विरुद्धमन्यत् ॥ न मन्यते वस्तुतया मनीषी स्वप्नं यथोत्थाय तिरोदधानं ॥ ३२ ॥
पूर्वं गृहीतं गुणकर्मचित्रमज्ञानमात्मन्यविविक्तसंगं ॥ निवर्तते तत्पुनरीक्षयैव न गृह्यते नापि विसृज्य आत्मा ॥ ३३ ॥
यथा हि भानोरुदये नृचक्षुषां तमो निहन्यान्न तु सद्विधत्ते ॥ एवं समीक्षा निपुणा सती मे हन्यात्तमिस्रं पुरुषस्य बुद्धेः ॥ ३४ ॥

बंधावस्थायां गुणैः कर्मभिश्चित्रितमज्ञानकार्यं देहेंद्रियादि तदात्मन्यध्यासेन अविविक्तं गृहीतमासीत् एतदेव पुनरीक्षणेन विनिवर्तते
आत्मा तु न केनापि रूपेण गृह्यते नापि त्यज्यते अयं भावः मुक्तेः क्रियाफलत्वे न तावदात्मनो विकारः तस्यास्तु ॥ आरोपितनाशनमात्रं निवृत्ति
रूपत्वात् नात्मसंस्पर्शित्वं बंधमोक्षयोः अतो न विकार इति ॥ ३३ ॥ एतदेव दृष्टांतेन स्पष्टयति यथेति ॥ न तु पूर्वमेव सद्घटादि पुनर्विधत्ते करोति तथा
समीक्षा आत्मविद्या ॥ ३४ ॥

स्यात् २

राम
११७
१२०

आत्मनो निर्विकारत्वं प्रपंचयति ॥ व्यवहृत्यनेनापरोक्षतया नित्यप्राप्तस्यात्मनः प्राप्तिं वारयति स्वयंज्योतिरिति ॥ अनेन च ज्ञानमलाप
करणलक्षणां विहतिं वारयति अज इत्युत्पत्तिं वारयति अप्रमेय इति ज्ञानलक्षणातिशयाधानेन संस्कारं महानुभूतिरिति ॥ देशका
लपरिच्छेदाभावेनास्तित्ववृद्धिविपरिणामापक्षयनाशान् स्वयंज्योतिष्ट्वादेरेव तु सकलानुभूतिरिति ॥ एको द्वितीय इति विकारहेतोर
न्यस्याभावान्न कोपि विकार इति दर्शयति ॥ न च स्मृतिविषयस्य कथं ज्योतिष्ट्वादित आह ॥ वचसां विरामे अगोचरत्वेन निरुक्तोस्तत्वं तेषां च
श्रुतिः ॥ यतो वाचो निवर्तंते अप्राप्य मनसा सहेति न केरुतः येनेषिताः प्रेषिताः ॥ तथा च श्रुतिः केनेषितं पतति प्रेषितं मनः केन प्राणः प्र

एष स्वयंज्योतिरजोऽप्रमेयो महानुभूतिः सकलानुभूतिः ॥ एकोऽद्वितीयो वचसां विरामे येनेषिता वागसवश्चरंति ॥३४॥
एतावानात्मसंमोहो यद्विकल्पस्तु केवले ॥ आत्मन्नृते स्वमात्मानमवलंबो न यस्य हि ॥३५॥ राम

थमः प्रैति युक्तः ॥ केनेषितां वाचमिमां वदंति चक्षुः श्रोत्रं क उ देवो युनक्ति ॥ श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स प्राणस्य प्राणः चक्षु
षश्चक्षुरिति ॥३४॥ अद्वितीयत्वमुपपादयितुं भेदस्यात्मीयत्वमाह एतावानिति ॥ केवले अभिन्ने आत्मन् आत्मनि विकल्प इति यत् एता
वानेवैष्यात्मनो मनसः संमोहः भ्रमो यतः स्वमात्मानं ऋते विना यस्य विकल्पस्यावलंबः आश्रयो नास्ति रज्जुभ्रमस्येव वस्तु किं विना नेदं
नानास्ति किंचन ॥ इंद्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशेत्यादि श्रुतेरित्यर्थः ॥३५॥ ॥ राम

श्री
भारी
१
११८
१२१

केचित्तु नः प्रत्यक्षादिप्रतीतप्रपंचस्य बाधायोगात् वेदार्थानां च भ्रान्तत्वे कर्तृत्वप्रतिपादनपरत्वेनार्थवादत्वात् ॥ द्वैतं सत्यमिति मन्यंते तेन मत
मतस्य अनुवादं कुर्वाणाह पश्यतीयदिति ॥ नामाकृतिभिर्नामरूपोपलक्षितं पंचभूतात्मकं द्वयं द्वैतं यत्तद्बाधितमिति ॥ पंडितमानिनाम् एव वय
मेव पंडिता इत्यभिमानवतां वेदांतेषु यमर्थवाद इति प्रतीतेः ॥ ननु त्वदिदं यतः तदर्थेनापि विनाप्यर्थे न साप्रतीतिः ॥ तथाहि न तावद्द्वैतकर्म
कर्तृत्वं तेषामस्तियतो र्थवादत्वं स्यान्न वा कर्मभोक्तृपरमानंदरूपात्मप्रतिपादने कर्मविधिशेषत्वं भजते न च बाधितत्वं द्वैतस्य नामरूपात्म
कत्वात् ग्राह्यत्वात् पंचवर्णात्मकत्वात् स्वप्नवदित्याद्यनुमानैः वाचारंभणादिश्रुतिभिश्च बाधितत्वादिति ॥ ३७ ॥ तदेवं ज्ञानयोगं सपरि

यन्नामाकृतिभिर्ग्राह्यं पंचवर्णमबाधितं ॥ व्यर्थेनाप्यर्थवादोयं द्वयं पंडितमानिनां ॥ ३८ ॥ योगिनो पक्वयोगस्य युंज
तः काय उत्थितैः ॥ उपसर्गैर्विहन्येत तत्रायं विहितो विधिः ॥ ३८ ॥ योगधारणया कांश्चिदासनैर्धारणान्वितैः ॥ तपोमंत्रौ
षधैः कांश्चिदुपसर्गान्विनिर्दहेत् ॥ ३९ ॥ कांश्चिन्ममानुध्यानेन नामसंकीर्तनादिभिः ॥ योगेश्वरानुवृत्त्या च हन्यादशु
भदान् शनैः ॥ ४० ॥ केचिद्देहमिमं धीराः सुकल्पं वयसि स्थिरं ॥ विधाय विविधोपायैरथ युंजंति सिद्धये ॥ ४१ ॥ राम

करं निरूप्येदानीं तन्निष्ठस्य विघ्नप्रतीकारमाह योगिन इति त्रिभिः योगं युंजतः काये यस्य तत्रैर्विविधैरुपसर्गैः रोगाद्युपद्रवैः अभिहन्यते विधिः
प्रतीकारः ॥ ३८ ॥ योगधारणया सोमसूर्यादि धारणया संतापशैत्यादीन् आसनैः वायुधारणान्वितैः वातादिरोगान् ॥ तपोमंत्रौषधैः पाप
ग्रहसर्पादिकृतान् ॥ ३९ ॥ ममानुध्यानादिभिः कामादीन् योगेश्वरानुवृत्त्या दंभमानादीन् हन्यात् ॥ ४० ॥ अन्ये तु देहसिद्ध्यर्थमेवैतत्सर्वं कु
र्वंति तन्न इत्याह केचित्तु नैतैर्नैर्विधैरुपायैर्देहमेव सुकल्पं जरारोगादिरहितं वयसि तारुण्ये स्थिरं च कृत्वा अणिमादि परकायप्रवेशादि
सिद्ध्ये तद्धारणारूपं योगं युंजंति तन्न तु ज्ञाननिष्ठारूपं ॥ ४१ ॥ राम राम राम

राम
११८
१२१

न

कुशलैः प्राज्ञैरादरणीयं न भवति वनस्पतिर्वृक्षःस्थायी शरीरं तु फलवन्नश्वरमित्यर्थः ॥४२॥ ननु क्वचित्समाधियोगत्वेनापि द्रागप्यायामादियो
गैः किं योगे क्रियमाणे जरारोगाद्यभावो दृश्यते ॥ सत्यं तथापि समाधिसुखं त्यक्त्वा न तत्र सज्जेतेत्याह योगमिति ॥ न तच्छ्रद्दध्यात्सिद्धिं न श्रद्दध्यात्तेन न वि
सृजेत ॥४३॥ तदेवं विघ्नप्रतीकारैर्योगं कुर्वीतेत्युक्त्वा मद्भक्तिकरणस्य तु विघ्नशंकापि नास्तीत्याह योगचर्यामिति ॥ विचरन्नाचरन् स्वसुखस्यैवेनानुभवः अनुभ
तिर्यस्य सः स्पृहास्पदत्वाद्धि विघ्नाः सत्वमदपाश्रयस्य निवर्तन्ते अन्तरायैर्विहतः स्वानंदपूर्णो भवतीति ॥४४॥ समाहृत्य स्वयोगांतेसम

न हि तत्कुशलादृत्यं तदायासो ह्यपार्थकः ॥ अन्तवत्त्वाच्छरीरस्य फलस्येव वनस्पतेः ॥४२॥ योगं निषेवतो नित्यं कायश्चेत्क
ल्पतामियात् ॥ तच्छ्रद्दध्यान्न मतिमान्योगमुत्सृज्य मत्परः ॥४३॥ योगचर्यामिमां योगी विचरन्मदपाश्रयः ॥ नान्तरायै
र्विहन्येत निःस्पृहः स्वसुखानुभूः ॥४४॥ इति श्रीभागवते एकादशस्कंधे परमात्मनिर्णयो नामाष्टाविंशोऽध्यायः ॥२८॥
उद्धव उवाच ॥ सुदुस्तरामिमां मन्ये योगचर्यामनात्मनः ॥ यथांजसा पुमान्सिध्येत्तन्मे ब्रूह्यंजसाच्युत ॥१॥ प्रायशः
पुंडरीकाक्ष युंजंतो योगिनो मनः ॥ विषीदंत्यसमाधानान्मनोनिग्रहकर्षिताः ॥२॥ राम राम

स्त्वोपनिषद्रसं ॥ सद्योमुक्त्यमृतं मां भक्तिं स्म उद्धवोऽनुरूपादिशत् ॥१॥ इति श्री एकादशस्कंधे टीकायां अष्टाविंशोऽध्यायः ॥२८॥ ऊनत्रिंशे त्वयः पूर्वं विस्तरे
णानिरूपितः ॥ भक्तियोगस्तमेवाह स्वभक्ताय समासतः ॥ अतिक्लेशमिवालक्ष्य योगे संगे कसंपदि ॥ सुखोपायं पुनः सम्यगुद्धवः परिपृ
च्छति ॥ ॥१॥ अनात्मनः अवशीकृतमनसः अंजसा सुखेन यथा सिध्येत्तथा अंजसा सावबोधयथा तथा मे ब्रूहि ॥१॥ सुदुष्करतां प्रपंचयति
प्रायश इति ॥ मनो युंजतो निग्रहतः विषीदंति खिद्यंति कुतः असमाधानात् अनिग्रहात् कथंचिन्मनोनिग्रहे चेत्कर्षिताः श्रांताः संतः ॥२॥

यस्मादेवं केवलं विषीदंति अथात एव ये हंसाः सारासारविवेकचतुराः ते त्वानंददुघं समस्तानंदप्रपूरकं तव पादांबुजमेव सुखं यथा भव
ति तथा निश्चितं श्रयेरन् अमी त्वन्मायया विहताः केचिद्योगकर्मभिर्मानिनः संतो न श्रयेरन् यद्वा अमी त्वद्भक्ताः त्वन्मायया न विहताः अ
तएव योगकर्मभिः हताभिमानिनो भवंति अन्ये तु त्वन्मायया मोहिताः संतो वयं योगज्ञाः वयं याज्ञिकाः कर्मकुशला इति केवलं गर्ववंतो भ
नै

अथात आनंददुघं पदांबुजं हंसाः श्रयेरन्नरविंदलोचन ॥ सुखं नु विश्वेश्वर योगकर्मभिस्त्वन्मायया मी विहता न
मानिनः ॥ ३ ॥ किं चित्रमच्युत तवैतदशेषबंधो दासेष्वनन्यशरणेषु यदात्मसात्त्वं ॥ यो रोचयत्सह मृगैः स्वयमी
श्वराणां श्रीमत्किरीटतटपीडितपादपीठः ॥ ४ ॥ राम राम राम

वंति न तु मुच्यंते इत्यर्थः ॥ ३ ॥ त्वद्भक्तास्तु त्वत्प्रसादेन कृतार्था भवंतीति नातिचित्रमित्याह किमिति ॥ अनन्यशरणेषु दासेषु न त्वात्मसात्त्वं त
दधीनत्वं यद्यथा नंद गोपी बलि प्रभृतिषु एतत् किं चित्रं नाश्चर्यमित्यर्थः ॥ यतो यो भवान् श्रीरामरूपेण मृगैर्वानरैः सह रुचिं सख्यमिति यावत्
अरोचयत् प्रीत्या कृतवान् कथंभूतः ईश्वराणां ब्रह्मादीनां यानि श्रीमंति किरीटानि तेषां तटान्यग्राणि तैः पीडितं विलुलितं पादपीठं यस्य स स्वयं
तथाभूतोपि स त्वं ॥ ४ ॥

अतस्त्वां परित्यज्य कोऽन्यमान्यं संश्रयेदित्याह तं त्वेति ॥ तमेवं स्तं त्वां को नु विसृजेत कथं भूतः स्वकृतविद्धुलिप्रल्हादादिषु त्वयाहृतमनु
ग्रहं ज्ञानेन ॥ यद्वा स्वस्मिन्नेवांतर्यामितया हृतमुपकारं विद्वानु तदेदाह ॥ अखिलात्मदयिते मुरं अखिलस्य जगत आत्मानं चेतयितारं आ
त्मत्वाद्देवदयितं प्रेष्ठं स्तु सेव्यमीश्वरत्वादवश्यं भजनीयं किंचाश्रितानां सर्वार्थदं न हि हि किंफलाइ शेनाहसंपः न हि न हि किमप्यतिरिक्तं त्वदु
तिरिक्तं स्वर्गादित्वयादत्तमपि को वा भजेत्स वै तत्कथं भूतं ततत्वयत्केवलं भवते इंद्रियभोगाय अतश्च नंतरमेव त्वद्विस्मृतये भवति यद्वा त्वद्व्यति
रिक्तं किमपि देवतांतरधर्मज्ञानादिसाधनं वाभ्रत्यैवैश्वर्याय संसारस्य विस्मृतये मोक्षाय वा को वा भजेत न कोपि ॥ ननु तत्साधनं विनाभो

तं त्वाखिलात्मदयितेश्वरमाश्रितानां सर्वार्थदं स्वकृतविद्विसृजेत को नु ॥ को वा भजेत्किमपि विस्मृतये नु भूत्यै किं वा भ
वेत्तव पादरजोजुषां नः ॥ ५ ॥ नैवोपयंत्यपचितिं कवयस्तवेश ब्रह्मायुषापि कृतमृद्धमुदः स्मरंतः ॥ योंतर्बहिस्तनुभृता
मशुभं विधुन्वन्नाचार्यचैत्यवपुषा स्वगतिं व्यनक्ति ॥ ६ ॥ राम राम राम

गमोक्षादिफलं कथं स्यात्तत्राह किं वेति न तूक्तं ॥ यावै साधनसंपत्तिः पुरुषार्थचतुष्टये ॥ तया विना तदाप्नोति नरो नारायणाश्रय इति ॥ ५ ॥
आस्तामन्यभजनं सर्वात्मना कृतोपकारस्य त्वय्यात्मनिवेदनेनैव निष्कृतिर्नान्यथेत्याह नैवेति ॥ अपचितिं प्रत्युपकारमाहृत्येमिति यावत्
कवयो ब्रह्मविदोपि नैव प्राप्नुवंति यतस्त्वत्कृतमुपकारं स्मरंतः ऋद्धमुदः उपचितपरमानंदाः उपकारमेवाह ॥ योंतर्बहिरिति आचार्यवपुषा
करूपेणांतश्चैत्यवपुषा अंतर्यामिरूपेण अशुभं विषयवासनां विधुन्वन् निरस्यन् स्वगतिं निजं रूपं प्रकटयति तस्य तव ॥ ६ ॥ राम

ईश्वरेश्वरत्वे हेतुः जगत्क्रीडनकं जगत्क्रीडोपकरणं यस्य सः ननु जगत्सृष्ट्यादिना ब्रह्मेशादयः क्रीडंतीति तत्राह ॥ स्वशक्तिभिः सत्त्वादिभिः गृहीतं मूर्तित्रयं येन सः सप्रेम प्रेमसहितं मनोहरं स्मितं यस्य सः सप्रेम यथा तथा जगादेति वा ॥ ७ ॥ मद्धर्मान् कथयिष्यामीति हंतेति सहर्षसंबोधनेसुमंगलान् स्वतस्साधनरूपान् मृत्युं संसारं दुर्जयमन्यैरुपायैः ॥ ८ ॥ धर्मानेवाह कुर्यादिति त्रयोदशभिः ॥ मां स्मरन् शनकैरसंरंभतः कुर्यात् तदात्मनयीति ॥ अर्पितमनश्चित्ते संकल्पविकल्पानुसंधानात्मके येन अतएव मद्धर्मेषु आत्मनो मनसो रतिर्यस्य सः ॥ ९ ॥ पुण्यदेशान्

श्री शुक उवाच ॥ इत्थमुद्धवेनात्यनुरक्तचेतसा पृष्टो जगत्क्रीडनकः स्वशक्तिभिः ॥ गृहीतमूर्तित्रय ईश्वरेश्वरो जगाद सप्रेम मनोहरस्मितः ॥ ७ ॥ श्री भगवानुवाच ॥ हंत ते कथयिष्यामि मम धर्मान्सुमंगलान् ॥ यान्श्रद्धयाचरन्मर्त्यो मृत्युं जयति दुर्जयं ॥ ८ ॥ कुर्यात्सर्वाणि कर्माणि मदर्थं शनकैः स्मरन् ॥ मय्यर्पितमनश्चित्तो मद्धर्मात्ममनोरतिः ॥ ९ ॥ देशान्पुण्यानाश्रयेत मद्भक्तैः साधुभिः श्रितान् ॥ देवासुरमनुष्येषु मद्भक्ताचरितानि च ॥ १० ॥ पृथक्सत्रेण वा मह्यं पर्वयात्रामहोत्सवान् ॥ कारयेद्गीतनृत्याद्यैर्महाराजविभूतिभिः ॥ ११ ॥ मामेव सर्वभूतेषु बहिरंतरपावृतं ॥ ईक्षेतात्मनि चात्मानं यथा खममलाशयः ॥ १२ ॥ इति सर्वाणि भूतानि मद्भावेन महाद्युते ॥ सभाजयन्मन्यमानो ज्ञानं केवलमाश्रितः ॥ १३ ॥

श्रितान् मद्भक्तैरिति ॥ देवादिषु ये मद्भक्ताः तेषामाचरितानि कर्माणि आश्रयेत ॥ १० ॥ सत्रेण संभूय वा ॥ ११ ॥ अंतरंगां भक्तिमाह त्रिभिः सर्वेषु भूतेषु आत्मनि चात्मानमीश्वरं मामेवेक्षेत ननु कथमेकस्य सर्वेषु वृत्तिस्तत्राह बहिरंतः पूर्णमित्यर्थः तत्र हेतुः अपावृतमनावरणमनाकृष्टं तत्र दृष्टांतः यथा खमसंगत्वादित्यर्थः ॥ १२ ॥ हे महाद्युते निष्पापेति ॥ अनेन प्रकारेण केवलं ज्ञानं तत्त्वदृष्टिमाश्रितः सन् सर्वाणि भूतानि मद्भावेन मन्यमानः सभाजयन्पूजितो मत्तः उत्तरेणान्वयः ॥ १३ ॥ राम स्व

नरेष्वेतेमाधममध्यमेष्वेकरूपेणसंभाजनमपांडित्यमेवस्यात् पूज्यपूजादिव्यतिक्रमादित्याशंक्य तामेवज्ञानदृष्टिं प्रपंचयति ब्राह्मणइ
ति ॥ विषमेष्वपिसमदृक् सम्ममामेवपश्यन्नु वैषम्यमेव चतुर्धा दर्शयति ॥ ब्राह्मणेपुक्कसइतिजातितो वैषम्यं पुक्कसोंत्यजजातिविशेषः ॥ स्ते
नेब्रह्मण्यइतिशिष्ट ब्राह्मणेब्रह्मण्येभ्योदातरीतिकर्मतः अर्केविस्फुलिंगइति गुणतः अक्रूरेशांतेक्रूरेचेतिस्वभावतः ॥१४॥ नरेष्वभीक्ष्णंमद्दृष्टिं
र्वतः स्पर्धासूयाफलविशेषमोदनरेष्विति ॥ समोत्तमहीनेषुस्पर्धादयः स्वस्मिन्देहाभिमानेन्यहिनिश्चितं वियंतिनश्यंति ॥१५॥ अतोंतर्यामीश्व

ब्राह्मणेपुक्कसेस्तेनेब्राह्मण्येऽर्केस्फुलिंगके ॥ अक्रूरेक्रूरकेचैवसमदृक्पंडितोमतः ॥१४॥ नरेष्वभीक्ष्णंमद्भावंपुंसोभाव
यतोऽचिरात् ॥ स्पर्धासूयातिरस्काराःसाहंकारावियंतिहि ॥१५॥ विसृज्यस्मयमानान्स्वान्दृशंव्रीडांचदैहिकीं ॥ प्रणमेद्दंड
वद्भूमावाश्वचंडालगोखरं ॥१६॥ यावत्सर्वेषुभूतेषुमद्भावोनोपजायते ॥ तावदेवमुपासीतवाङ्मनःकायवृत्तिभिः ॥१७॥
सर्वंब्रह्मात्मकंतस्यविद्ययात्ममनीषया ॥ परिपश्यन्नुपरमेत्सर्वतोमुक्तसंशयः ॥१८॥ अयंहिसर्वकल्पानांसध्रीची
नोमतोमम ॥ मद्भावःसर्वभूतेषुमनोवाक्कायवृत्तिभिः ॥१९॥ राम राम राम

रदृष्ट्यासर्वान्प्रणमेदित्याह विसृज्येति ॥ स्मयमानानुपहसतःस्वान्संबंधिनस्त्यक्त्वादैहिकींदृशमहमुत्तमःसतुनीचइतिदृष्टिं तयादृशायाव्रीडा
लज्जातांचविसृज्यश्वचंडालादीनभिव्याप्यप्रणमेत्तेनविरोधंकुर्यादित्यर्थः ॥१६॥ एवंपंचभिःश्लोकैरुक्तायाःसमदृष्टेरवधिमाहयाव
दिति ॥१७॥ तस्यैवंकुर्वतःपुंसःसर्वंब्रह्मात्मकमेवभवतिकुतआत्ममनीषयासर्वत्रेश्वरदृष्ट्यायाविद्यातया ॥ अतःपरितोब्रह्मैवपश्यन्नुस
र्वक्रियाभ्यउपरमेत ॥१८॥ किमयमेवोपायोस्तिअन्योपीत्यपेक्षायांसतिबहुकःसमीचीनः स्वयमेवेत्याह अयंहीति ॥१९॥

भगवद्धर्मलक्षणोपायस्य समीचीनत्वमेवोपपादयति द्वाभ्यां नहीति ॥ अंग हे उद्धव अनाशिषो निष्कामस्य मद्धर्मस्योपक्रमे सत्यण्वपीषद
पि वैगुण्यादिभिर्नाशो नास्त्येव यतो मयैवं निर्गुणत्वादयं धर्मः सम्यग्व्यवसितः निश्चितः न तु मन्वादिमुखेन कथंचित् किंतु ॥ २० ॥ किंच यो यद्
ति ॥ अयमर्थः किंवक्तव्यं मद्धर्मस्य न ध्वंस इति यतो लौकिकोपि यो यो निरर्थो यासः सोपि मयि परे निष्फलाय चेत् कल्पते निष्कामतयार्पित
श्चेत्तर्हि धर्म एव स्यात् निरर्थायासे दृष्टांतः ॥ यथा भयशोकादेर्हेतोः पलायनाक्रंदनादिक्लेशस्तद्वत् ॥ २१ ॥ अतो मद्भजनमेव बुद्धेर्विवेकस्य

नह्यंगोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि ॥ मया व्यवसितः सम्यङ्निर्गुणत्वादनाशिषः ॥ २० ॥ यो यो मयि परे धर्मः कल्प्यते
निष्फलाय चेत् ॥ तदायासो निरर्थः स्याद्भयादेरिव सत्तम ॥ २१ ॥ एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणां ॥ यत्सत्यम
नृतेनेह मर्त्येनाप्नोति मामृतं ॥ २२ ॥ एष तेभिहितः कृत्स्नो ब्रह्मवादस्य संग्रहः ॥ समासव्यासविधिना देवानामपि दु
र्गमः ॥ २३ ॥ अभीक्ष्णशस्ते गदितं ज्ञानं विस्पष्टयुक्तिमत् ॥ एतद्विज्ञाय मुच्येत पुरुषो नष्टसंशयः ॥ २४ ॥ सुविविक्तं
तव प्रश्नं मयैतदुपधारयेत् ॥ सनातनं ब्रह्मगुह्यं परं ब्रह्माधिगच्छति ॥ २५ ॥ राम राम

मनीषा चातुर्यं तस्य च फलमित्याह एषेति ॥ तामेव दर्शयति सत्यममृतं च मामं अनृतेनासत्येन मर्त्येन विनाशिना मनुष्यदेहेन इहास्मि
न्नेव जन्मनि प्राप्नोतीति यत् सैव बुद्धिर्मनीषा चेति बुद्धिर्विवेकः मनीषा चातुर्यं ॥ २२ ॥ महाप्रकरणार्थमुपसंहरति एष त इति द्वाभ्यां ॥ समा
स व्यासविधिः संक्षेपविस्तारप्रकारेण ॥ २३ ॥ किंच अभीक्ष्णशो गदितं ज्ञानं चैतदनुसंधानकथनपठनश्रवणानां मध्ये तदेव फलं भवतीत्याह चतु
र्भिः सुविविक्तमिति ॥ सुविविक्तं तवोत्तरमेतत् व्याख्यानमपि यो धारयेदनुसंदध्यात् ब्रह्मगुह्यं वेदेपि रहस्यं ॥ २५ ॥ राम

एवं यद्यपि त्वया बहूक्तं तथाप्येतावत् स्वार्थे यदुक्त्वा नमोऽस्त्विति अनुशाधि अनुशिक्षय अनुशासनीयमाह यथेति त्वच्चरणाम्भोजे अनपायि-
नी ॥४०॥ तदुक्तमेवमिति मां गीहत्यत तथापि मयादिष्टोऽपि लोकसंग्रहार्थमेतावत् कुर्विति गच्छेति आदिष्टो नियुक्तः ॥४१॥ स्नानादिः मूर्ध्नैव
मत्पादतीर्थोदकस्तया अलकनन्दायाः गंगायाः ईक्षया दर्शनेन वसानः परिदधानः ॥४२॥ द्वंद्वमात्राणां शीतोष्णादिविषयाणां सुशी-

नमोऽस्तु ते महायोगिन् प्रपन्नमनुशाधि मां ॥ यथा त्वच्चरणाम्भोजे रतिः स्यादनपायिनी ॥४०॥ श्रीभगवानुवाच ॥ गच्छो-
द्धव मयादिष्टो बदर्याख्यं ममाश्रमं ॥ तत्र मत्पादतीर्थोदे स्नानोपस्पर्शनैः शुचिः ॥४१॥ ईक्षयालकनन्दाया विधूता-
शेषकल्मषः ॥ वसानो वल्कलान्यंग वन्यभुक् सुखनिःस्पृहः ॥४२॥ तितिक्षुर्द्वंद्वमात्राणां सुशीलः संयतेंद्रियः
शान्तः समाहितधिया ज्ञानविज्ञानसंयुतः ॥४३॥ मत्तोऽनुशिक्षितं यत्ते विविक्तमनुभावयन् ॥ मय्यावेशितवाक्चित्तो
मद्धर्मनिरतो भव ॥४४॥ अतिव्रज्य गतीस्तिस्रो मामेष्यसि ततः परं ॥४४॥ श्रीशुक उवाच ॥ स एवमुक्तो हरिमेधसोद्ध-
वः प्रदक्षिणं तं परिसृत्य पादयोः ॥ शिरो निधायाश्रुकलाभिरार्द्रधीर्न्यषिंचदद्वंद्वपरोऽप्यपक्रमे ॥४५॥ सुदुस्त्यजस्ने-
हवियोगकातरो न शक्नुवंस्तं परिहातुमातुरः ॥ कृच्छ्रं ययौ मूर्धनि भर्तृपादुके बिभ्रन्नमस्कृत्य ययौ पुनः पुनः ॥४६॥

ल आर्जवादिस्वभावः ॥४३॥ ते त्वया विविक्तं सु विचारितं तिस्रः त्रिगुणात्मिका गतीः अतिक्रम्य ॥४४॥ हरिमेधसा संसारहरणमेधायस्य
तेन श्रीहरिणा नाहं द्वन्द्वपरोऽपि स्नेहवैवश्याद्विनिर्गतो अपि अपक्रमे निर्गमनसमये ॥४५॥ सुदुस्त्यजः स्नेहः यस्मिंस्तेन वियोगात्कातरो
भीतः अत एव तं परिहातुमशक्नुवन् कृच्छ्रं दुःखं विह्वलः सन् हरेः पादुके हृदये ययौ प्राप ॥४६॥ राम राम

सर्वांतर्यामी भगवानुद्धवस्य हार्दं ज्ञात्वा आलिंग्यावनतस्य भर्त्तुः पादुके तेनैव रूपयाधेन मूर्ध्नि बिभ्रत इति निर्बंधरूपया तदा तया तं पुनः
पुनः नमस्कृत्य ययौ अत्र प्रहृतोन्वगमं भर्तुः पादविश्लेषणात्क्षमइत्यादि द्वितीयस्याध्यायस्य क्रमो नानुसंधेयः बदर्याश्रमं गच्छन् भगवतः प्र
भासयात्रामुपस्पृश्य शनैः प्रहृतो गतः सन् उपसंहृतं निजकुलं भगवंतमेकांते दृष्ट्वा तत्काले प्राप्तेन मैत्रेयेण संपृष्टः पुनः कृपया भगवतो
पदिष्टं तत्त्वमकलेवरं तदाज्ञातो यया विनिर्दिष्टां विशालां बदरिकाश्रमं गतः स तु हरेर्गतिमगात् तद्रूपभूतः तेनैव जगदेकबंधुना यथोपदि
ष्टं तदाष्टं तत्त्वं प्रतिपाद्यमानो मयात्मन्यायाय च कल्पते वै ॥ अतिव्रज्य गतीस्तिस्रो मामेष्यसि ततः परमित्येतत्संक्षेपकाले ॥४७॥ आनंद

ततस्तमंतर्हृदि सन्निवेश्य गतो महाभागवतो विशालां ॥ यथोपदिष्टां जगदेकबंधुना तपः समास्थाय हरेरगाद्गतिं ॥४७॥
य एतदानंदसमुद्रसंभृतं ज्ञानामृतं भागवताय भाषितं ॥ कृष्णेन योगेश्वरसेविताङ्घ्रिणा सच्छ्रद्धयासेव्य जगद्विमुच्यते ॥४८॥
भवभयमपहंतुं ज्ञानविज्ञानसारं निगमकृदुपजह्रे भृंगवद्वेदसारं ॥ अमृतमुदधितश्चापाययद्भृत्यवर्गान्पुरुषमृषभमाद्यं
कृष्णसंज्ञं नतोस्मि ॥४९॥ इति श्रीभागवते एकादशस्कंधे उद्धवबदर्याश्रमप्रवेशो नामैकोनत्रिंशोध्यायः ॥२९॥

समुद्रो भगवदुक्तिसंगः तस्मिन्संभृतमेकीभूतममेतत् यः सश्रद्धया आसेव्य ईषदपि सेवित्वा वर्तते स मुच्यते इति किं वक्तव्यं तत्संगाज्जगदपि वि
मुच्यते इत्यर्थः ॥४८॥ एवं कृतोपदेशं जगद्गुरुं प्रणमति भवभयमिति ॥ भवः संसारः भयं च जरारोगादिनिमित्तं तदुभयं निहंतुं ज्ञानं ज्ञानां कृते
वर्गाणां यथायोग्यं भवभयमपहंतुं योमृतं यमुपजह्रे उद्धृतवान् ॥ तदेवाह वेदसारमेकं किं तत् ज्ञानविज्ञानरूपं च तत्सारं श्रेष्ठं च भृंगवत् यथा
पुष्पमकोपयन्नेव रसं तदुपहरति तथा स्वयं स्वकृतवेदानुसारेणैव उदधितश्च केनचिन्मथनं यथा अप्ययं च भृत्यवर्गान् पाययत् तं तेन नतोस्मीति ॥४९॥
येनानुकंपितं विश्वं [illegible] निर्णयैः ॥ तं वंदे परमानंदं नंदनंदनरूपिणं ॥१॥ इति श्री एकादशस्कंधे एकोनत्रिंशोध्यायः ॥२९॥

विंशे तु प्रागुपक्षिप्तमौसलं कथ्यते हरिः ॥ स्वधाम गंतुमन्विच्छन् संजहार निजं कुलं ॥ द्विरागाय पुराप्योरसुपद्विष्टं हि मौसलं ॥ कथावसा-
ने तस्यैव विशेषं परिपृच्छति ॥ तत इति त्रिभिः ॥ १ ॥ ब्रह्मशापोपसंसृष्टे कुले सति अयं भावो भगवति न हि शापः प्रभवति यादवत्वात्तु करणाच्च
सोपि कथंचिन्मानुषः श्रुतः किमकरोदिति तदेतदुक्तं कथमत्यजदिति सर्वनेत्राणामिति सर्वेंद्रियोपलक्षणं ॥ २ ॥ तत्स्वरूपं वर्णयति प्रत्याक्रष्टुमि-
ति ॥ यस्मिन्रूपे लग्नं नयनं परावर्तयितुं अबला न शेकुः ॥ यच्च कर्णरंध्रं प्रविष्टं यत्सतामात्मनि लग्नं लिखितमिव तिष्ठति ॥ ततो नेत्स-

त

राजोवाच ॥ ततो महाभागवत उद्धवे निर्गते वनं ॥ द्वारवत्यां किमकरोद्भगवान्भूतभावनः ॥ १ ॥ ब्रह्मशापोपसंसृष्टे स्व-
कुले यादवर्षभः ॥ प्रेयसीं सर्वनेत्राणां तनुं स कथमत्यजत् ॥ २ ॥ प्रत्याक्रष्टुं नयनमबला यत्र लग्नं न शेकुः कर्णाविष्टं न स-
रति ततो यत्सतामात्मलग्नं ॥ यच्छ्रीर्वाचां जनयति रतिं कीर्त्यमाना कवीनां दृष्ट्वा जिष्णोर्युधि रथगतं यच्च तत्साम्यमीयुः ॥ ३ ॥
श्रीशुक उवाच ॥ दिवि भुव्यंतरिक्षे च महोत्पातान्समुत्थितान् ॥ दृष्ट्वासीनान्सुधर्मायां कृष्णः प्राह यदूनिदं ॥ ४ ॥ श्रीभग-
वानुवाच ॥ एते घोरा महोत्पाता द्वार्वत्यां यमकेतवः ॥ मुहूर्तमपि न स्थेयमत्र नो यदुपुंगवाः ॥ ५ ॥ स्त्रियो बालाश्च वृद्धाश्च
शंखोद्धारं व्रजंत्वितः ॥ वयं प्रभासं यास्यामो यत्र प्रत्यक्सरस्वती ॥ ६ ॥ तत्राभिषिच्य शुचय उपोष्य सुसमाहिताः ॥ देवताः पू-
जयिष्यामः स्नपनालेपनार्हणैः ॥ ७ ॥ ब्राह्मणांस्तु महाभागान्कृतस्वस्त्ययना वयं ॥ गोभूहिरण्यवासोभिर्गजाश्वरथवेश्मभिः ॥ ८

रतिं न निर्गच्छति यस्य श्रीः शोभा संकीर्त्यमानापि कवीनां वाचां रतिमुल्लासविशेषं जनयति तेषां मानं जगत्सु ज्यतां जनयतीति किं तु वृत्तं यच्च
जिष्णोः रूपं जिष्णो रथे न सारथ्ये स्थितं दृष्ट्वा युधि हतास्तत्साम्यं सारूप्यमीयुः प्रापुः तत्केन रूपेणात्यजदित्यन्वयः ॥ ३ ॥ दिवि स्वर्गे परिवेषादीन्
भुवि भूकंपादीन् अंतरिक्षे दिग्दाहादीन्महोत्पातान् स्वयमेवोत्पादितत्वादनैर्दुःप्रतीकारान् ॥ ४ ॥ यमस्य केतवो ध्वजा इव मृत्युसूचका इत्यर्थः नः
अस्माभिः ॥ ५ ॥ प्रत्यक्पश्चिमवाहिनी ॥ ६ ॥ अभिषिच्य स्नात्वा ॥ ७ ॥ ब्राह्मणांश्च कृतस्वस्त्ययनिकाः संतो गवादिभिः पूजयिष्यामः ॥ ८ ॥ ९ ॥ वय

विधिः स्वस्तीकारः मंगलायतनं च किं च देवद्विजगवां पूजा भूतेषु कः हेतुः देवलोके परमः उद्भवो भविष्यतीति भावः ॥९॥ मधुद्विषो वाक्य
माकर्ण्य तथेत्यभिनंद्य समुद्रमुत्तीर्य ॥१०॥ सर्वश्रेयोपबृंहितमित्यत्र संधिरार्षः भगवता उक्तैरपि तैर्वैः श्रेयोभिः सहितं चक्रुरिति ॥११॥
पीयत इति पानं मैरेयकं मदिराविशेषं मधुरसं दिष्टेन दैवेन विभ्रंशिता धियः ॥ नश्यन्नाप्या न विस्मिन्स्याने ततु चितमिति भावः यस्य द्रवैः

विधिरेष ह्यरिष्टघ्नो मंगलायनमुत्तमं ॥ देवद्विजगवां पूजा भूतेषु परमो भवः ॥९॥ इति सर्वे समाकर्ण्य यदुवृद्धा
मधुद्विषः ॥ तथेति नौभिरुत्तीर्य प्रभासं प्रययू रथैः ॥१०॥ तस्मिन्भगवतादिष्टं यदुदेवेन यादवाः ॥ चक्रुः परमया
भक्त्या सर्वश्रेयोपबृंहितं ॥११॥ ततस्तस्मिन्महापानं पपुर्मैरेयकं मधु ॥ दिष्टविभ्रंशितधियो यद्द्रवैर्भ्रश्यते मतिः
१२॥ महापानाभिमत्तानां वीराणां दृप्तचेतसां ॥ कृष्णमायाविमूढानां संघर्षः सुमहानभूत् ॥१३॥ युयुधुः
क्रोधसंरब्धा वेलायामाततायिनः ॥ धनुर्भिरसिभिर्भल्लैर्गदाभिस्तोमरर्ष्टिभिः ॥१४॥ पतत्पताकै रथकुंजरादिभिः ख
रोष्ट्रगोभिर्महिषैर्नरैरपि ॥ मिथः समेत्याश्वतरैः सुदुर्मदा न्यहन् शरैर्दद्भिरिव द्विपा वने ॥१५॥ प्रद्युम्नसांबौ युधि रू
ढमत्सरावक्रूरभोजावनिरुद्धसात्यकी ॥ सुभद्रसंग्रामजितौ सुचारुगदौ सुमित्रसुरथौ समीयतुः ॥१६॥ अन्ये च
ये वै निशठोल्मुकादयः सहस्रजिच्छतजिद्भानुमुख्याः ॥ अन्योन्यमासाद्य मदांधकारिता जघ्नुर्मुकुंदेन विमोहिता भृशं ॥१७॥

रसैः ॥१२॥ कृष्णमायाविमूढानामिति तस्य त्याज्यत्वे हेतुः संघर्षः कलहः ॥१३॥ ते तो युयुधुस्तु ॥१४॥ पतंत्य इतस्ततः स्खलंत्यः पताका येषु तैः रथादिभिः
समेत्य मिथो न्यहन् न्यघ्नन्नित्यर्थः दद्भिर्दंतैरिव ॥१५॥ मिथः समेत्येत्यस्यैव प्रपंचः प्रद्युम्नेत्यादि चतुर्भिः ॥ सुचारुगदौ श्रीकृष्णस्यानेकः पुत्रश्च भ्रा
तः तौ सुमित्रासुरथाविति दैर्घ्यमार्षं सुमित्रसुरथो वा नाम कृष्णपुत्रः ॥१६॥ मदांधेन मदरूपेण तमसा बलात्कारिताः ॥१७॥ राम

दाशार्हादयो नव तत्तद्देश्याः मध्वर्बुदा माथुराः शूरसेनाश्च तत्तद्देशीयाः ॥ १८ ॥ भ्रातृभिश्चेति भ्रात्रादिशब्दानां संबंधितियोगिवाचित्वात् भ्रातरो मात-
लाइत्यादि ज्ञेयं ॥ मित्रैश्च मित्राणि च सुहृद्भिः सुहृदश्चैवं ततः ॥ १९ ॥ धन्वसु धनुःषु जह्रुः जगृहुः ॥ २० ॥ परिघा लोहदंडाः भृता धृतास्ते च श्रीकृष्णमपि
।२१।

दाशार्हवृष्ण्यंधककुभोजसात्वता मध्वर्बुदा माथुरशूरसेनाः ॥ विसर्जनाः कुकुराः कुंतयश्च मिथस्ततस्तेथ विसृज्य सौहृदं ।१८।
पुत्रा अयुध्यन्पितृभिश्च भ्रातृभिः स्वस्रीयदौहित्रपितृव्यमातुलैः ॥ मित्राणि मित्रैः सुहृदः सुहृद्भिर्ज्ञातींस्त्वहन् ज्ञातय एव
मूढाः ॥ १९ ॥ शरेषु हीयमानेषु भज्यमानेषु धन्वसु ॥ शस्त्रेषु क्षीयमाणेषु मुष्टिभिर्जह्रुरेरकाः ॥ २० ॥ ता वज्रकल्पा ह्यभ-
वन्परिघा मुष्टिना धृताः ॥ जघ्नुर्द्विषस्तैः कृष्णेन वार्यमाणास्तु तं च ते ॥ २१ ॥ प्रत्यनीकं मन्यमाना बलभद्रं च मोहिताः ॥ हं-
तुं कृतधियो राजन्नापन्ना आततायिनः ॥ २२ ॥ अथ तावपि संक्रुद्धावुद्यम्य कुरुनंदन ॥ एरकामुष्टिपरिघौ चरंतौ जघ्नतु-
र्युधि ॥ २३ ॥ ब्रह्मशापोपसृष्टानां कृष्णमायावृतात्मनां ॥ स्पर्धाक्रोधः क्षयं निन्ये वैणवोग्निर्यथा वनं ॥ २४ ॥ एवं नष्टे-
षु सर्वेषु कुलेषु स्वेषु केशवः ॥ अवतारितो भुवो भार इति मेनेवशेषितः ॥ २५ ॥ रामः समुद्रवेलायां योगमास्थाय पौरुषं
तत्याज लोकं मानुष्यं संयोज्यात्मानमात्मनि ॥ २६ ॥ रामनिर्याणमालोक्य भगवान्देवकीसुतः ॥ निषसाद धरोपस्थे
तूष्णीमासाद्य पिप्पलं ॥ २७ ॥ बिभ्रच्चतुर्भुजं रूपं भ्राजिष्णु प्रभया स्वया ॥ दिशो वितिमिराः कुर्वन्विधूम इव पावकः ॥ २८

प्रत्यनीकं प्रतिपक्षं ॥ २२ ॥ एरकामुष्टिरूपौ परिघावुद्यम्य ॥ २३ ॥ स्पर्धानिमित्तं क्रोधः कुलं संक्षयं निन्ये ॥ २४ ॥ पौरुषं योगं परमपुरुषध्या-
नलक्षणं तमेवाहु संयोज्येति ॥ मानुष्यं लोकं मनुष्यलोकं मनुष्यरूपतां वा ॥ २६ ॥ धरोपस्थे भूतले ॥ २७ ॥ भ्राजिष्णु रूपं ॥ २८ ॥ ॥ राम

ॐ

श्री
भा॰टी॰
१
१२५
१२८

तदेवानुवर्णयति श्रीवत्सांकमिति चतुर्भिः ॥२९॥ सुंदरं स्मितवक्त्राब्जं यस्मिंस्तत् पुंडरीकवदभिरामे सुंदरे अक्षिणी यस्मिंस्तत् ॥३०॥ वनमा
लयापरीतान्यंगानि यस्मिंस्तत् निजायुधैरुपरीतांगं पंकजारुणं दक्षिणं पादं दक्षिणे ऊरौ कृत्वा आसीनं रूपं बिभ्रत् ॥३१॥ जरानामकश्चिल्लुब्ध
कोहृगयुः मृगस्यास्यमिवाकारो यस्य तं चरणं ॥३२॥ मुसलशापहतमेतन्त्र तच्चापराध इति चेदत आह ॥ यस्य तत्वात्मयोगरचितं स्वाधीन

श्रीवत्सांकं घनश्यामं तप्तहाटकवर्चसं ॥ कौशेयांबरयुग्मेन परिवीतं सुमंगलं ॥२९॥ सुंदरस्मितवक्त्राब्जं नीलकुंत
लमंडितं ॥ पुंडरीकाभिरामाक्षं स्फुरन्मकरकुंडलं ॥३०॥ कटिसूत्रब्रह्मसूत्रकिरीटकटकांगदैः ॥ हारनूपुरमुद्राभिः
कौस्तुभेन विराजितं ॥३१॥ वनमालापरीतांगं मूर्तिमद्भिर्निजायुधैः ॥ कृत्वोरौ दक्षिणे वाममासीनं पंकजारुणं ॥३२॥
मुसलावशेषायःखंडकृतेषुर्लुब्धको जरा ॥ मृगास्याकारं चरणं विव्याध मृगशंकया ॥३३॥ चतुर्भुजं तं पुरुषं दृष्ट्वा
स कृतकिल्बिषः ॥ भीतः पपात शिरसा पादयोरसुरद्विषः ॥३४॥ अजानता कृतमिदं पापेन मधुसूदन ॥ क्षंतु
मर्हसि पापस्य उत्तमश्लोक मेनघ ॥३५॥ यस्यानुस्मरणं नृणामज्ञानध्वांतनाशनं ॥ वदंति तस्य ते विष्णो मया साधु
कृतं प्रभो ॥३६॥ तन्माशु जहि वैकुंठ पाप्मानं मृगलुब्धकं ॥ यथा पुनरहं त्वेवं न कुर्यां सदतिक्रमं ॥३७॥ यस्यात्मयोग
रचितं न विदुर्विरिंचिरुद्रादयोस्य तनयाः पतयो गिरां ये ॥ त्वन्मायया पिहितदृष्टय एतदंजः किं तस्य ते वयमसद्गतयो गृणी
मः ॥३८॥ श्रीभगवानुवाच ॥ मा भैर्जरे त्वमुत्तिष्ठ काम एष मतो हि मे ॥ याहि त्वं मदनुज्ञातः स्वर्गं सुकृतिनां पदं ॥३९॥

मायया रचितं विरिंचोस्य तनया रुद्रादयः ऐवान्ये गिरां पतयो देवेंद्रादयः ते पि न विदुः तस्य ते अचिंत्यमायस्य एतन्मुसलशापाद्यं जस्ता निश्चयेन
असद्गतयः पापयोनयो वयं किं गृणीमः कथं वर्णयामः अत एव दासं त्वं माशु तव रितं मां जहीति भावः ॥३८॥ राम

राम
१२५
१२८

रथं पतिं दृष्ट्वा पादयोर्निपपात ४२

इच्छाशरीरेत्यस्यायं भावः शुद्धसत्त्वमयीं निजां श्रीमूर्तिमन्तर्धाय तत्प्रतिकृत्यैव विडंबनमात्रमिति ॥ एतदेव स्फुटीकरिष्यति देवा ब्रह्मादयो
ब्रह्मभवाद्यो इत्यादिना ॥४०॥ निर्याणं योगमार्गेणमद्दृशामिति इच्छाशरीरत्वमभिप्रायेण ॥४६॥ अर्जुनेनाविताः इन्द्रप्रस्थं गमिष्यथ

श्रीशुक उवाच ॥ इत्यादिष्टो भगवता कृष्णेनेच्छाशरीरिणा ॥ त्रिः परिक्रम्य तं नत्वा विमानेन दिवं ययौ ॥४०॥ दारुकः
कृष्णपदवीमन्विच्छन्नधिगम्य तां ॥ वायुं तुलसिकामोदमाघ्रायाभिमुखं ययौ ॥४१॥ तं तत्र तिग्मद्युभिरायुधैर्वृतं
ह्यश्वत्थमूले कृतकेतनं पतिं ॥ स्नेहप्लुतात्मा निपपात पादयो रथादवप्लुत्य सबाष्पलोचनः ॥४२॥ अपश्यतस्ते
चरणाम्बुजं प्रभो दृष्टिः प्रणष्टा तमसि प्रविष्टा ॥ दिशो न जाने न लभे च शांतिं यथा निशायामुडुपे च नष्टे ॥४३॥ इति ब्रु
वति सूते वै रथो गरुडलांछनः ॥ खमुत्पपात राजेंद्र साश्वध्वज उदीक्षतः ॥४४॥ तमन्वगच्छन्दिव्यानि विष्णुप्र
हरणानि च ॥ तेनातिविस्मितात्मानं सूतमाह जनार्दनः ॥४५॥ गच्छ द्वारवतीं सूत ज्ञातीनां निधनं मिथः ॥ संकर्ष
णस्य निर्याणं बंधुभ्यो ब्रूहि मद्दशां ॥४६॥ द्वारकायां च न स्थेयं भवद्भिश्च स्वबंधुभिः ॥ मया त्यक्तां यदुपुरीं समुद्रः प्ला
वयिष्यति ॥४७॥ स्वं स्वं परिग्रहं सर्वे आदाय पितरौ च नः ॥ अर्जुनेनाविताः सर्व इंद्रप्रस्थं गमिष्यथ ॥४८॥ त्वं तु म
द्धर्ममास्थाय ज्ञाननिष्ठ उपेक्षकः ॥ मन्मायारचनामेतां विज्ञायोपशमं व्रज ॥४९॥ इत्युक्तस्तं परिक्रम्य नमस्कृत्य
पुनः पुनः ॥ तत्पादौ शीर्ष्ण्युपाधाय दुर्मनाः प्रययौ पुरीं ॥५०॥ इति श्रीभागवते एकादशस्कंधे त्रिंशोऽध्यायः ॥३०॥

ब्रूहीति पूर्वेणान्वयः ॥४६॥ मन्मायारचनामेतां विज्ञायेति निजश्रीमूर्तेरंतर्धानं तत्त्वाद्यप्यशोच्यं मां [illegible] विस्मयः ॥४९॥ उत्पस्य दिनष्ट
त्वाद्दुर्मनाः ॥५०॥ इति श्रीभागवते एकादशस्कंधे त्रिंशोऽध्यायः ॥३०॥ राम ॥ राम

श्री
भा॰टी
११
१२६

१२८

एकविंशेस्वकंधामजगामभगवानितः ॥ तमेवानुययुःप्रीत्यावसुदेवादयस्ततः ॥ ५ देवानपिनिविधायादौभूयोदेवान्विधायच
श्रीकृष्णः स्वकृपयाधामस्वतन्त्रेवसमाविशत् ॥ १ ॥ मुनयःसनकादयःप्रजेश्वरामरीच्यादयः ॥ १ ॥ द्विजागरुडलोकेलोकवासिनः
पक्षिणःमैत्रेयादयोवाभगवतोनिर्याणंद्रष्टुकामाःसंतःपरमोत्सुकाःसंतःतत्रागमन् ॥ २ ॥ तेषामौत्सुक्यहेतुंमहोत्सवमाह

श्रीशुक उवाच ॥ अथतत्रागमद्ब्रह्माभवान्याचसमंभवः ॥ महेन्द्रप्रमुखादेवामुनयःसप्रजेश्वराः ॥ १ ॥ पितरःसि
द्धगंधर्वाविद्याधरमहोरगाः ॥ चारणायक्षरक्षांसिकिन्नराप्सरसोद्विजाः ॥ द्रष्टुकामाभगवतोनिर्याणंसमुपागताः ॥ २ ॥
गायंतश्चगृणंतश्चशौरेःकर्माणिजन्मच ॥ ववृषुःपुष्पवर्षाणिविमानावलिभिर्नभः ॥ ३ ॥ कुर्वंतःसंकुलंराजन्भक्त्या
परमयायुताः ॥ ४ ॥ भगवान्पितामहंवीक्ष्यविभूतीरात्मनोविभुः ॥ संयोज्यात्मनिचात्मानंपद्मनेत्रेन्यमीलयत् ॥ ५ ॥

सार्धेन ॥ गायंतश्चेति ॥ ३ ॥ विभूतीरिंद्रादीन्दृष्ट्वापद्मनेत्रेन्यमीलयदित्ययंभावः पूर्वंब्रह्मादिभिःसलोकांल्लोकपालान्नःपाहिवैकुंठ
किंकरानितिप्रार्थितत्वादिदानींचस्वंस्वंलोकंप्रतिनेतुमागतत्वाद्दृष्टुचतेषुदाक्षिण्यापन्नान्वंचयितुंसमाधिमिवकुर्वन्नेत्रेन्यमीलयदि
ति ॥ ५ ॥

राम
१२६

१२८

योगिनामिव स्वस्य कृतं देहं मनि निवारयति लोकाभिरामामिति ॥ योगिनो हि स्वदेहं दग्ध्वा स्वतनुमाग्नेय्या धारणया दग्ध्वा लोकांतरं स्व विशंति अ
यं तु स्वतनुं नन्वया किंतु अदग्ध्वैव स्वतनुसहित एव स्वकं धाम वैकुंठाख्यम विशत् ॥ तत्र हेतुः लोकानामभिरामः अभितो रमणं स्थितिः य
स्यां तां जगदाश्रयत्वेन जगतोपि द्दाहप्रसंगादित्यर्थः ॥ किंच धारणाया ध्यानस्य मंगलं शोभनं विषयं इतरथा तयोर्निर्विषयत्वं स्यात् ॥
इदं स्पते चाग्या उपासकानां तद्ध्येदतद्रूपसाक्षात्कारफलप्राप्तिर्न स्यादिति भावः ॥ इदं च शरीरं अभिप्रायेण वायथाश्रुतमेवास्तु तत्रापि ल

लोकाभिरामां स्वतनुं धारणाध्यानमंगलं ॥ योगधारणयाग्नेय्यादग्ध्वा धामाविशत्स्वकं ॥६॥
दिवि दुंदुभयो नेदुः पेतुः सुमनसश्च खात् ॥ सत्यं धर्मो धृतिर्भूमेः कीर्तिः श्रीश्चानु तं ययुः ॥७॥
देवादयो ब्रह्ममुख्या न विशंतं स्वधामनि ॥ अविज्ञातगतिं कृष्णं ददृशुश्चातिविस्मिताः ॥८॥

लोकाभिरामामित्यादिविशेषणानामानर्थक्यप्रसंगात् दग्ध्वा तिरोधाय निर्गत इत्येव सांप्रतं ॥५॥ तदनु स्वं स्वमेव लोकमागमि
ष्यतीति संभ्रमेण देवाधिष्ठितः सर्वतो दुंदुभिनादपुष्पवृष्ट्यादिमहोत्सवो भवदित्याह दिवीति ॥ भूमेः सकाशात् श्रीकृष्णमन्वीयुः
॥७॥ तदा श्रीकृष्णे अंतर्हिते सति कृतो गत इति वितर्कयंतोपि ब्रह्ममुख्या देवादयः स्वधाम विशंतं श्रीकृष्णं ददृशुः तत्र हेतुः अविज्ञा
तगतिमिति कश्चित् ॥ कश्चित् ददृशुस्तत्तोति विस्मिताः बभूवुरित्यर्थः ॥८॥ राम राम

श्री भा॰ ए॰ १२७

अविज्ञातगतिं दृष्टान्तेन स्पष्टयति ॥ सौदामिन्या गतिर्यथा मर्त्यैर्न लक्ष्यते देवैस्तु लक्ष्यत इति तथा भ्रमंडलं हित्वा गच्छतः श्रीकृष्णस्य देवैरपि न लक्ष्यते किं तत मर्त्यैरिति दैवे वेत्यर्थः ॥९॥ अभिप्रायापरिज्ञानतः प्रथमं ब्रह्मादि दृष्टान्तेनास्य ... पुनस्तमेवार्थं प्रपंचयति राजन्निति त्रिभिः ॥१०॥ परस्य सर्वकारणस्य तनुभृत्सु यादवादिषु जननाप्ययेहा आविर्भावतिरोभावचेष्टाः मायया नुकरणमात्रमवेहि ॥ नटो यथा विरुद्धतेवं नानारूपैर्जडादीन्विडंबयति तद्वत् आत्मलीलार्थं यादवादिषु जन्मादि दर्शयतीत्यर्थः ... निरो

सौदामिन्या यथाकाशे यान्त्या हित्वाभ्रमंडलं ॥ गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैः ॥९॥ ब्रह्मरुद्रादयस्ते तु दृष्ट्वा योगगतिं हरेः ॥ विस्मितास्तां प्रशंसन्तः स्वं स्वं लोकं ययुस्तदा ॥१०॥ राजन्परस्य तनुभृज्जननाप्ययेहा मायाविडंबनमवेहि यथा नटस्य ॥ सृष्ट्वात्मनेदमनुविश्य विहृत्य चान्ते संहृत्य चात्ममहिनोपरतः स आस्ते ॥११॥ मर्त्येन यो गुरुसुतं यमलोकनीतं त्वां चानयच्छरणदः परमास्त्रदग्धं ॥ जिग्येऽन्तकान्तकमपीशमसावनीशः किं स्वावने स्वरनयन्मृगयुं सदेहं ॥१२॥

धादिषु स्वयमेव स्थितत्वात् तत इत्याह सृष्ट्वेति ॥ आत्मना स्वयमेवेदं जगत्सृष्ट्वान्तर्यामित्वेनानुविश्य आत्ममहिम्ना स्वमहिम्ना उपरतश्चास्ते ॥११॥ न पुनरन्यथा मन्तव्यं यतोऽस्मिन्नेवावतारे तत्प्रभावो निरतिशयो दृष्ट इत्याह मर्त्येनेति ॥ यमेन स्वलोकं प्रतिनीतं गुरुसुतं मर्त्येन तेनैव शरीरेण य आनयत् आनीतवान् शरणदः शरणागतरक्षकः त्वां च ब्रह्मास्त्रदग्धं येनावितवान् यस्त्वन्तकानामन्तकमपि ईशं ... बाणसंग्रामे जितवान् ... लुब्धकं स्वः स्वर्गमनयत् निन्ये असौ स्वावने स्वरक्षणे अनीशः असमर्थः किं ॥१२॥ ॥

राम १२७

ननु यदि समर्थः तर्हि देहं किंचित्कालमेवैवं तेन वपुषा किं नातिष्ठत् तत्राह न त्याज्येति ॥ यद्यप्युक्तप्रकारेणाशेषस्य जगतः स्थित्यादिहेतुः न
न्यहेतुर्निरपेक्षः एककारणं स्वयं यद्यस्मादशेषशक्तिधृक् तेन त्याज्यादरोक्तं हि त्यन्निजं वपुरत्र शोषितं उपेक्षितं एतेनैवं कृतं नैकेन
किंतु स्वमेव लोकमनयत् तत्र हेतुः मर्त्येन देहेन किं न किंचित्कार्यमिति ॥ स्वस्या नामात्म निष्ठानां दिव्यां गतिमेव प्रदर्शयन्

तथाप्यशेषस्थितिसंभवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक् ॥ नैतत्त्वपेक्षितं वपुरत्र शोषितं मर्त्येन किं स्वस्य गतिं प्र
दर्शयन् ॥ १३ ॥ य एतां ज्ञानसंयाय कृष्णस्य पदवीं परां ॥ प्रयतः कीर्तयेदस्य नामैवाप्नोत्यनुत्तमां ॥१४॥ दारुकोद्वारका
मेत्य वसुदेवोग्रसेनयोः ॥ पतित्वा चरणौ वस्तैर्न्यषिंचत्कृष्णविच्युतः ॥१५॥ कथयामास निधनं वृष्णीनां कृत्स्नशो द्वि
प ॥ नकुलोद्विग्नहृदया जनाः शोकविमूर्छिताः ॥ १६ ॥ तत्र स्मत्वरिताजग्मुः कृष्णविश्लेषविह्वलाः ॥ वसुदेवः शोरते य
त्र ज्ञातयो चैव तत्र्यानेनं ॥ १७ ॥ देवकी रोहिणी चैव वसुदेवस्तथाहुतैः ॥ कृष्णरामावपश्यंतः शोकार्ता व्यजहुः स्मृतिं ॥१८॥
प्राणांश्च व्यजहुस्तत्र भगवद्विरहातुराः ॥ उपगृह्य पतीन्सर्वान्स्त्रियोग्निं तामारुरुहुः स्त्रियः ॥ १९ ॥ रामपत्न्यश्च तद्देहं
मुपगृह्याग्निमाविशन् ॥ वसुदेवपत्न्यस्तद्वत्प्रद्युम्नादीन्हरेः स्नुषाः ॥२०॥

रम रम

व

अन्यथा ते पि दिव्यां गतिमनादृत्य योगबलेन देहसिद्धिं विधायात्रैवरंजयतेर चन्मा भूदित्येतदर्थमिति भावः ॥१२॥ एतास्त्वन्प्रकारां पदवीं
गतिं ॥१३॥ तदेकं भगवन्नास्व नोकंगन्क तावसुदेवादीनामपि यन्त्याम्नयेय उपाय श्लिंतितमासीत्तमाह दारुकइत्यादिना ॥ १४ ॥ हे कृष्णरामो स्तुता
वपश्यंतः ॥ १५ ॥

एकादश स्कंधः

१८८ 743

श्री
भाग
द
१२८

सदुक्तिभिः सत्योक्तिभिः यावत् कृष्णो येषु तैः ॥ नाहं प्रकाशः सर्वस्य योगमायासमावृतः मूढोऽयं नाभिजानाति लोको मामजमव्ययमित्यादिभिः
२१ नष्टसंततीनां सांपरायिकीं पिंडोदकादिकां ॥ २४ ॥ प्रदित श्वान्यद्भी कृष्णचरितकीर्तनस्य फलमाह य एतदिति द्वाभ्यां ॥ २५ ॥ शंत

कृष्णपत्न्योविशन्नग्निं रुक्मिण्याद्यास्तदात्मिकाः ॥ अर्जुनः प्रेयसः सख्युः कृष्णस्य विरहातुरः ॥ २१ ॥ आत्मानं सांत्वया
मास कृष्णगीतैः सदुक्तिभिः ॥ २२ ॥ बंधूनां नष्टगोत्राणामर्जुनः सांपरायिकी । सर्वांश्च कारयिविधिवत्कृष्णस्य स्नेहविमु
तः ॥ स्नानानां कारयामास यथावदनुपूर्वशः ॥ २३ ॥ द्वारकां हरिणा त्यक्तां समुद्रो प्लावयत्क्षणात् ॥ वर्जयित्वा महाराज
श्रीमद्भगवदालयं ॥ २४ ॥ नित्यं सन्निहितस्तत्र भगवान्मधुसूदनः ॥ स्मृत्याशेषाशुभहरः सर्वमंगलमंगलं ॥ २५ ॥
स्त्रीबालवृद्धानादाय हतशेषान्धनंजयः ॥ इंद्रप्रस्थं समावेश्य वज्रं तत्राभ्यषेचयत् ॥ २६ ॥ श्रुत्वा सुहृद्वधं राजन्नर्जु
नात्ते पितामहाः ॥ त्वां तु वंशधरं कृत्वा जग्मुः सर्वे म[illegible]ं ॥ २७ ॥ य एतद्देवदेवस्य विष्णोः कर्माणि जन्म च ॥ कीर्तये
च्छ्रद्धया मर्त्यः सर्वपापैः प्रमुच्यते ॥ २८ ॥ इत्थं हरेर्भगवतो रुचिरावतारवीर्याणि बालचरितानि च शंतमानि
अन्यत्र चेह च श्रुतानि गृणन्मनुष्यो भक्तिं परां परमहंसगतौ लभेत ॥ ३० ॥ इति श्रीभागवते महापुराणे एकाद
श स्कंधे भगवत्स्वधामगमनं नामैकत्रिंशोध्यायः ॥ ३१ ॥ समाप्तोयमेकादशस्कंधः ॥ ॥ राम ॥ राम

मानि परममंगलानि परमहंसगतौ श्रीकृष्ण इत्यर्थः ॥ ३० ॥ एवमेकादशस्कंधभावार्थस्य प्रदीपिका ॥ स्वाज्ञानध्वांतभेदेन श्रीध
रेण प्रकाशिता ॥ १ ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे वैयासिक्यां पारमहंस्यां संहितायामष्टादशसाहस्र्यामेकत्रिंशोध्यायः
३१

राम
१३०
१३०